गायत्री

पुष्प

१२०१ से २३००

January

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A Collection of Rare & Extraordinary Sanskrit Works,

NO. 301.

गादाधरी ।

श्रीगदाधरभट्टाचार्यचक्रवर्त्तिविरचिता ।

श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या
श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता ।

GÂDÂDHARÎ

A Commentary on Dîdhiti the Commentary
of Tattva Chintâmani.

By Gadádhara Bhattâchârya Charavartin. With Text.

Edited by Nyâyâchârya Vâmâcharana Bhaṭṭâchârya
Professor Govt. Sanskrit College, Benares
and Nyáyācharya Sreerâma Sâstrî Bhândârî.
Professor of the same College,
BENARES.

FASCICULUS XIII–१३

PUBLISHED & SOLD BY THE SECRETARY
CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES.
AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:
PANDITA JYESHTHÂRAM MUKUNDAJI, BOMBAY:
PROBSTHAIN & CO; BOOKSELLERS LONDON.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1923.

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा—संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥
स्तवकः—३०१

पृथग् व्याप्तिनिश्चयः । पर्वतीयधूमत्वपुरस्कारेण व्याप्तिनिश्चयः । वाच्यः । अनुमितिहेतुतया स्वीकार्यः ।

यद्यपि पूर्वं धूमत्वदर्शनस्यैव व्यावर्त्तकधर्मदर्शनविधया संशयविरोधित्वमुक्तं न तु व्याप्तिनिश्चयस्येति धूमसामान्ये व्याप्तिनिश्चयात्तत्सामान्ये संशयानुत्पादोपगमेन विशेषसंशयोपपादनं न युज्यते, तथाऽपि पर्वतवृत्तित्वसामानाधिकरण्येन धूमत्वदर्शनात्तदवच्छेदेन व्याप्त्यभावसंशयनिवृत्तावपि पर्वतीयधूमत्वावच्छेदेन व्याप्त्यभावसंशयो दुर्वारः पर्वतीयत्वावच्छेदेन धूमत्वानिश्चयासम्भवादिति शङ्काया धूमत्वज्ञानस्य विशेषदर्शनत्वेनेत्यादिसिद्धान्तोपरिसम्भवाद् धूमत्वपुरस्कारेण व्याप्तिनिश्चयस्य पर्वतीयधूमत्वावच्छेदेन तदभावसंशयनिवर्त्तकत्वमपि तादृशग्रन्थतात्पर्यविषयस्तन्नैवेयं शङ्का ।

अथ पर्वतवृत्तित्वावच्छेदेन तत्सहितधूमत्वावच्छेदेन वा व्याप्तिविरहशङ्का नैयायिकसिद्धानुमितिहेतुताकस्य व्याप्तिविशिष्टे धूमे पक्षधर्मतावैशिष्ट्यावगाहिनिश्चयस्याप्यनिवर्त्त्या, असमानधर्मितावच्छेदकत्वात्पक्षधर्मताविशिष्टे व्याप्तिनिश्चयश्च तच्छङ्कानिवर्त्तकोऽपि नानुमितिहेतुः, व्याप्तिविशिष्टवैशिष्ट्यबोधस्यैवानुमितिहेतुताया वक्ष्यमाणत्वात् । उभयविधपरामर्शस्य तथात्वेऽपि व्याप्तिविशिष्टवैशिष्ट्यबोधघटितानुमितिसामग्रीदशायां तादृशशङ्काया दुरुच्छेदतया तत्सत्त्वे नैयायिकैरनुमितिस्वीकारे मीमांसकानामपि ज्ञानद्वयसत्त्वे तच्छङ्कासत्त्वेऽप्यनुमितावापत्तिसम्भवेन तादृशशङ्कोच्छेदोपायानुसरणप्रयासवैयर्थ्यात् ।

यत्तु व्याप्तिविशिष्टधूमे पर्वतवृत्तित्वशङ्कादशायां मीमांसकमतेऽनुमित्यापत्तिपरतया मूलशङ्कावर्णनेनोक्तापत्तिसमाधनं 'पृथग्व्याप्तिनिश्चयो वाच्य' इत्यस्यापि व्याप्तिविशिष्टधूमे पक्षधर्मतानिश्चयस्यानुमितिहेतुत्वस्वीकारपरतया वर्णनम्, तदशुद्धम्, मीमांसकमते धूमत्वावच्छेदेन पक्षधर्मत्वासत्त्वेनान्यथाख्यातिस्वीकारप्रसङ्गभयेन धूमत्वसामानाधिकरण्येनैव पक्षधर्मतानिश्चयहेतुताया वाच्यतया विशिष्टधूमत्वावच्छेदेन पक्षावृत्तित्वशङ्कायाः शुद्धधूमत्वसामानाधिकरण्येन पक्षधर्मतानिश्चयाप्रतिबध्यतया मीमांसकानामनुमितिजनकपक्षधर्मतानिश्चयस्य तादृशशङ्कोच्छेदकत्वाभिधाने-

न समाधानासङ्गतिरिति चेन्न। पक्षवृत्तिधूमत्वविशिष्टे व्याप्तिज्ञानमात्रस्यानुमितिहेतुत्वेऽपि नैयायिकानामुद्देश्यसिद्धेस्तदभ्युपगमेनैव तादृशपरामर्शप्रतिबध्यायाः पक्षवृत्तित्वावच्छेदेनाव्याप्यत्वशङ्काया ज्ञानद्वयसम्भवशङ्कनसङ्गतेः।

वस्तुतः पक्षवृत्तिधूमत्वावच्छेदेन व्याप्तिविरहशङ्कायां व्याप्तिविशिष्टे पक्षधर्मतानिश्चयो विरोधी, यज् ज्ञानं यदुभयधर्मसामानाधिकरण्यमवगाहते तस्य तदेकतरावच्छेदेनापरधर्माभावशङ्कानिवर्त्तकताया अनुभवसिद्धत्वात्, पक्षवृत्तिधूमत्वस्य उक्तपरामर्शधर्मितानवच्छेदकत्वेऽपि तदवच्छेदेनाव्याप्यत्वशङ्कायाः पक्षवृत्तिधूमत्वव्याप्यत्वसामानाधिकरण्यावगाहिकथितपरामर्शसत्त्वे उत्पत्त्यसम्भवादित्यभिप्रायकतया यथाश्रुतप्रकृतमूलसङ्गतिः। सामान्यघटितविशेषधर्मपुरस्कारेण संशये सामान्यधर्मसामानाधिकरण्यमात्रावगाहिनिश्चयस्याविरोधित्वेऽपि सामान्यधर्मावच्छेदेन विरोधिनिश्चयस्य विरोधित्वमावश्यकमवच्छेदकावच्छेदेन विपरीतज्ञानप्रतिबध्यतावच्छेदककोटौ तद्धर्मितावच्छेदकपर्याप्तधर्मितावच्छेदकत्वपर्यन्तानिवेशादित्यभिप्रायेण समाधत्ते। यत्र हीति। व्यावर्त्तकधर्मदर्शनस्य धर्मितावच्छेदकावच्छिन्नत्वावगाहितां स्फुटयितुं व्याचष्टे दीधितौ। यत्र यदवच्छिन्ने इति।

परं तु धूमसामान्ये संशयो मा भूदिति। व्यावर्त्तकधूमत्वेन निश्चिते पर्वतीयत्वसामान्यधर्मविशिष्टे तदवच्छेदेनाव्याप्यत्वसंशयो मा भूदित्यर्थः। विशेषसंशयस्त्वित्यादेः पूर्व एवार्थः। समानविषयकत्वमेव विरोधितायां तन्त्रं न तु समानप्रकारकत्वमपीत्याशयेन समाधत्ते। यत्र हीति। यथाश्रुतार्थकमेवेति। तच्च। समानधर्मिकव्यावर्त्तकधर्मदर्शनञ्च। सामान्ये। सामान्यधर्मविशिष्टविशेष्यकम्। विशेषे वा। विशेषधर्मविशिष्टविशेष्यकं वा। तथा च पर्वतीयधूमे पर्वतीयत्वमात्रेण धूमत्वनिश्चयेऽपि पर्वतीयधूमत्वपुरस्कारेण न संशयसम्भव इति भावः।

यद्यपि धूमत्वं व्याप्त्यवच्छेदकत्वावगाहिनिश्चयस्य धूमत्वघटितधर्मावच्छिन्नविशेष्यताकसंशयप्रतिबन्धकत्वात्तादृशनिश्चयादपि प्रकृते संशयनिवृत्तिः सम्भवति तथाऽपि शुद्धपर्वतीयत्वाद्यवच्छेदेनाव्याप्यत्वशङ्कानिरासार्थम् धूमत्वनिश्चयस्यादरणीयतया तत एव

पर्वतीयधूमत्वावच्छिन्नविशेष्यकसंशयनिवृत्तिरुपपादिता, समानविषयकत्वेन विरोधितावादिनां धर्मितावच्छेदकेऽवच्छेदकत्वावगाहिनोऽपि भिन्नधर्मिकज्ञानस्याविरोधित्वाभिप्रायेण वेति स्वातन्त्र्येण मूलं वर्णयन्ति ।

सामान्यप्रत्यासत्तिमनङ्गीकुर्वतां व्याप्तिनिश्चयस्य पर्वतीयधूमाविषयकतया धूमत्वे व्याप्त्यवच्छेदकत्वावगाहित्वेऽपि धूमत्वघटितधर्मावच्छिन्नपर्वतीयधूमधर्मिकसंशयविरोधित्वे विवादःसम्भवतीति दृष्टान्तेनानुभवं द्रढयंस्तं निराकुरुते ।यथा हीति । तदभावेन विशिष्टे न तत्संशय इति योजना । धर्मिविशेषणत्वञ्च तदभावादीनां धर्मितावच्छेदकताख्यं विषयत्वम् । स्थाणुत्वाभावव्याप्यं करादीति स्वतन्त्रज्ञानदशायामपि शुद्धकरत्वाद्यवच्छिन्नं धर्मितावच्छेदकीकृत्य स्थाणुत्वादिसंशयानुदयाद् व्याप्तिविशिष्टेनेत्युपेक्ष्य 'व्याप्यतया गृहीतेन' इत्युक्तम् । तदव्यवहितप्राक्क्षणे तत्क्षणे वा तस्य पुंसो व्याप्यतया निश्चयविषयेणेत्यर्थः । तदभावेन तदभावव्याप्तिविशिष्टेन च विशिष्टे तद्वत्त्वज्ञानमाहार्यमेव प्रसिद्धमिति तादृशज्ञाने इच्छाया एव हेतुत्वात्तदभावादेव नाहार्यतादृशसंशयप्रसङ्गः । करादिमान् स्थाणुर्न वेति संशयश्च करत्वाद्यवच्छिन्ने स्थाणुत्वाद्यभावव्याप्तिनिश्चयशून्यकाले इच्छां विनापि प्रसिद्ध इत्यनाहार्यतादृशज्ञाने तथाविधव्याप्तिनिश्चयत्वेन प्रतिबन्धकतां कल्पयित्वा तादृशनिश्चयदशायामसौ निरसनीयः । तथेत्यादि । तद्विशिष्टेऽपि न तत्संशय इत्यनुषङ्गेणान्वयः । यदवच्छेदेन तदभावादिनिश्चयस्तस्यापि तदभावादितुल्यत्वादिति भावः । अनुभवबलादित्यग्रिमहेत्वन्वयानुरोधेन 'इत्यविवाद' इति पूरणीयम् ।

ननु धूमत्वाद्यवच्छेदेन व्याप्त्यभावव्यावर्त्तकधर्मः प्रकृते न गृहीतः अपि तु तदभावो व्याप्तिरेवेति व्यावर्त्तकपदस्य तदभावावच्छेदकमात्रपरत्वाभिमानिनामाशङ्कां निराकरोति । "व्यावर्त्तकश्चेति" । स्थाणुत्वाभावव्याप्यः करः करवांश्चायमिति ज्ञानद्वयस्यापि अयं स्थाणुर्न वेति संशयविरोधितया व्याप्तिविशिष्ट इत्युपेक्ष्य व्याप्यतया गृहीत इत्युक्तम ।

अथ यदवच्छेदेन तदभावोऽवगत इत्यस्य यत्तदभावावच्छेदकत्वेनावगत इत्यर्थः अवच्छेदकत्वञ्चानतिरिक्तवृत्तित्वमेव न तु

स्वरूपसम्बन्धविशेषः, पुरुषत्वादौ स्थाणुत्वाभावादेस्तादृशावच्छेदकताया अप्रामाणिकत्वात् मीमांसकानामपि धूमत्वादौ व्याप्त्यनतिरिक्तवृत्तित्वज्ञानमेवानुमितिहेतुत्वेनोपगतमित्यभिप्रायेण मूलं सङ्गमनीयम्, एवञ्चानतिरिक्तवृत्तित्वस्य व्याप्तिरूपतया व्याप्यतया गृहीत इत्यनेन पौनरुक्त्यम्।

न च यदवच्छेदेनेत्यादेर्यत्र यदभावस्य व्याप्तिः संसर्गतयाऽवगतेति व्याप्यतयेत्यस्य व्याप्तिप्रकारेणेत्यर्थ इति भेदः। पुरुषो न स्थाणुरित्याकारके पुरुषत्वावच्छेदेन स्थाणुत्वाभावग्रहे च पुरुषत्वांशे व्याप्तिः संसर्गतयैव भासते न तु प्रकारतया तद्विशिष्टवाचकपदानुल्लेखात् संसर्गतया प्रकारतया च भानस्य पृथक्कथनं प्रतिबन्धकताया भेदसूचनाय तत्प्रकारकज्ञानस्य तदीयसंसर्गाविशेषावगाहित्वेनैव प्रतिबन्धकताया अनतिप्रसङ्गाय कल्पनीयतया तत्संसर्गकज्ञानस्य च तदीयसंसर्गानवगाहितया तेन रूपेणासङ्ग्रहादिति वाच्यम्। संसर्गतासंसर्गविशेषावच्छिन्नप्रकारतयोः संसर्गविशेषानवच्छिन्नप्रकारतान्यविषयतात्वेनानुगमेनातिप्रसङ्गविरहा—दिति चेन्न।

अवच्छेदकावच्छेदेन स्थाणुत्वाभावादिज्ञाने अवच्छेदकांशे व्याप्तिः संसर्गतयाऽपि न भासते, पुरुषो न स्थाणुरित्यादिज्ञानस्य पुरुषत्वाद्यंशे निष्प्रकारकतया अनुभवसिद्धत्वात्, किन्तु धर्मितावच्छेदकपुरुषत्वादिव्यापकताविशिष्टविशेषणतैव स्थाणुत्वाभावादेः पुरुषादौ संसर्गतया भासते, एवञ्च यद्व्यापकताविशेषणतासंसर्गेण तदभावो धर्मिण्यवगत इत्येव यदित्यादेरर्थ इति न पौनरुक्त्यम्।

यदि च विशेषणतात्वादिना व्यापकतायाः संसर्गघटकत्वे प्रमेयत्वाद्यवच्छेदेन स्थाणुत्वाभावादिज्ञानमपि प्रमा स्यादिति स्थाणुत्वाभावीयविशेषणतात्वेन व्यापकत्वमेव तथा वाच्यम् तथा च स्थाणुत्वाद्यभावस्यापि संसर्गान्तःपातित्वे तदंश एव व्यापकत्वभानमुचितम्। तथा सति स्थाणुत्वाभावः पुरुषनिष्ठाभावप्रतियोगी अयञ्च पुरुष इत्यादिज्ञानस्य स्थाणुत्वाभावादिधर्मिकपुरुषत्वव्यापकताग्रहसहितपुरुषत्वादिप्रकारकनिश्चयत्वेन प्रतिबन्धकताया अयं स्थाणुर्न वेति संशयं प्रति क्लृप्तत्वात् पुरुषो न स्थाणुरयञ्च पुरुष इत्यादिज्ञानस्य तद्रूपाक्रान्ततया न पृथक् प्रतिबन्धकत्वं, उक्त-

ज्ञानप्रतिबन्धकतायां व्यापकत्वीयसंसर्गाविशेषावगाहित्वनिवेशेऽपि न क्षतिः, व्यापकताविशिष्टघटितसंसर्गकज्ञानेऽपि विशिष्टघटकस्य वैशिष्ट्यस्यावश्यं भानादिति मन्यते तदा यद्वित्यादेरपि यद्व्यापकतया तदभावोऽवगत इत्येवार्थः।

न च व्याप्तिघटकसामानाधिकरण्यांशभानस्याप्रयोजकतया यो वेत्यादेरपि उक्त एवार्थ इति पौनरुक्त्यं दुर्वारमेवेति वाच्यम् । व्याप्तिपदेन तद्वदन्यावृत्तित्वस्यैवाभिहितत्वात्, व्यापकसामानाधिकरण्यज्ञानस्य यदवच्छेदेनेत्याद्यन्तर्भावेऽपि क्षतिविरहात् ।

वस्तुतस्तु ग्राह्याभावांशे तद्धर्मव्यापकतायाः संसर्गघटकविशेषणविधया भानमात्रं न विरोधितायां प्रयोजकम्, तथा सति यत्र पुरुषो न स्थाणुरित्यादिज्ञाने करादिव्यापकताविशिष्टस्थाणुत्वाद्यभावीयविशेषणतादेः संसर्गतया भानम्, तादृशज्ञानसहितस्य करादिमानयमित्यादिज्ञानस्याप्ययं स्थाणुर्न वेत्यादिज्ञानविरोधिताप्रसङ्गात् । अतस्तद्धर्मविशिष्टे ग्राह्याभावावगाहित्वसहितमेव तद्धर्मव्यापकतायास्तथा भानं विरोधिताप्रयोजकमित्युपेयम्, तथा च ग्राह्याभावांशे तद्धर्मव्यापकताप्रकारकस्य तद्धर्मविशिष्टे ग्राह्याभावाप्रकारकस्यापि ज्ञानस्य तद्धर्मवत्ताज्ञानधर्मितावच्छेदकविशिष्टविशेष्यकज्ञानाविरोधितया न तदभावव्याप्यतदभावावच्छेदकधर्मदर्शनयोरेकरूपेण प्रतिबन्धकतासम्भवः ।

न च ग्राह्याभावांशे तद्धर्मव्यापकताप्रकारकस्यैव संसर्गघटकतया तद्विषयकस्यापि तद्धर्मविशिष्टे ग्राह्याभावानवगाहिनो विरोधित्वमिष्टमेव संसर्गघटकविशेषणाविषयतायाः प्रकारतातुल्यत्वादिति वाच्यम् । तथा सति पुरुषत्वाद्यवच्छेदेन स्थाणुत्वाद्यभावावगाहिनः पुरुषः स्थाणुर्न वेत्यादिसंशयस्यापि स्थाणुत्वाद्यभावांशे पुरुषत्वादिव्यापकत्वविषयकतया तत्सहितपुरुषत्वादिप्रकारकज्ञानस्य स्वसमानधर्मितावच्छेदककस्थाणुत्वादिविशिष्टज्ञानाविरोधिताया निर्बीजतापातात् । न हि त्वन्मते तादृशसंशयस्य संशयत्वमेवाविरोधिताबीजमिति सम्भवति, पुरुषत्वादिविशिष्टे स्थाणुत्वाभावावगाहिताया विरोधितायामप्रयोजकत्वेन स्थाणुत्वाभावांशे संशयत्वस्य घटादिरूपोदासीनविषयांशे संशयत्वतुल्यत्वात् ।

एतेन पुरुषत्वादिसामानाधिकरण्येन स्थाणुत्वादिविशिष्टबुद्धौ पुरुषत्वाद्यवच्छेदेन तद्विपरीतनिश्चयस्य विरोधितायामभावांशे पुरुषत्वादिव्यापकतावगाहित्वमेव बीजं न तु पुरुषत्वादिविशिष्टे अभावावगाहित्वमपि, तत्र तदनवगाहिनोऽपि स्थाणुत्वाभावव्याप्यं पुरुषत्वं पुरुषत्वव्यापकः स्थाणुत्वाभाव इत्यादिव्यापकताप्रकारकज्ञानस्य पुरुषः स्थाणुरित्यादिधीविरोधित्वात् । तथा च तादृशव्यापकताप्रकारकज्ञानस्य तादृशव्यापकताविषयकत्वेनैव प्रतिबन्धकतासम्भवादवच्छेदकावच्छेदेन बाधबुद्धेः पृथक् प्रतिबन्धकतायां मानाभावः तस्या अपि उक्तरूपाक्रान्तत्वात् । एवं धर्मितावच्छेदकसामानाधिकरण्येनाभावविशिष्टबुद्धे र्धर्मितावच्छेदके प्रतियोगिव्यभिचारधीरूपतया अवच्छेदकावच्छेदेन प्रतियोगिविशिष्टज्ञानस्य तत्प्रतिबध्यत्वे प्रतियोगिन्यवच्छेदकव्यापकतावगाहित्वमेव बीजम्, तथा च व्यापकताप्रकारकतत्संसर्गकज्ञानसाधारणानुगतरूपेणैव तत्प्रतिबध्यताकल्पनसम्भवादवच्छेदकावच्छेदेन विशिष्टबुद्धाववच्छेदकसामानाधिकरण्यावगाहिबाधबुद्धेरपि पृथक् प्रतिबन्धकत्वे मानाभावः । न च तादृशव्यभिचारज्ञानस्य व्यापकताज्ञानविरोधित्वमेव नास्तीति वाच्यम् । लाघवेनैव तद्विरोधितास्वीकारौचित्यात् प्राचीनसिद्धान्तसिद्धत्वाच्च इति परास्तम् ।

संसर्गतया व्यापकतामात्रावगाहित्वस्य विरोधिताबीजत्वे ऽवच्छेदकावच्छेदेनाभावावगाहिनः पुरुषः स्थाणुर्न वेत्यादिसंशयस्य पुरुषः स्थाणुर्न वेति ज्ञानाविरोधितया निर्बीजत्वापातात् । तादृशव्यापकतावगाहित्वस्य व्यापकतानिरूपकधर्मविशिष्टे ग्राह्याभावावगाहित्वस्यैव विरोधिताबीजतया करादिव्यापकताविशिष्टस्थाणुत्वाद्यभावं संसर्गघटकतयाऽवगाहमानस्य पुरुषो न स्थाणुरित्यादिज्ञानस्य करादिमान् स्थाणुरित्यादिज्ञानाप्रतिबन्धकत्वनिर्वाहाय तद्धर्मावच्छिन्नविशेष्यकग्राह्याभावावगाहिज्ञानत्वेन बाधबुद्धेर्ग्राह्याभावांशे व्यापकताप्रकारकबुद्धेश्च व्याप्यधर्मधर्मितावच्छेदककबुद्धौ तादृशव्यापकताप्रकारकत्वेन पृथक् प्रतिबन्धकताया आवश्यकत्वात् व्यभिचारधियो व्यापकताग्रहविरोधित्ववादिनां प्राचां तत्संशयस्यापि तद्विरोधितया अनुमततया संसर्गविधया

व्यापकतावगाहित्वस्य तत्प्रतिबध्यताबीजत्वे पुरुषः स्थाणुर्न वेत्यादिसंशयेऽवच्छेदकावच्छेदेन स्थाणुत्वाद्यभावावगाहिताया एवानुपपत्तेश्चेति ।

यदि चावच्छेदकसामानाधिकरण्यमात्रेण तदवच्छेदेन विशेषणमवगाहमानयोर्बुद्ध्योर्वैलक्षण्यनिर्वाहायावच्छेदकावच्छेदेन बुद्धौ व्यापकतायाः संसर्गघटकतया भानमुपेयते पुरुषत्वादिधर्मितावच्छेदककबुद्धौ च करादिव्यापकतायाः संसर्गघटकतया भानमप्रामाणिकं तदा पुरुषो न स्थाणुरित्यादिधीसहितस्य करादिमत्ताज्ञानस्य स्थाणुत्वादिविशिष्टधीविरोधित्वाप्रसक्तेरनुगतरूपेणैव ग्राह्याभावांशे तद्धर्मव्यापकताप्रकारकज्ञानस्य तद्धर्मावच्छेदेन ग्राह्याभावज्ञानस्य च तद्धर्मदर्शनप्रतिबन्धकतायां निवेशः पुरुषः स्थाणुर्न वेत्यादिसंशयकालीनपुरुषत्वादिग्रहस्य चाविरोधितोपपत्तये व्यापकताज्ञाने पुरुषत्वाद्यवच्छिन्नविशेष्यकस्थाणुत्वादिसंशयभेदो निवेशनीयः । स्थाणुत्वाद्यभावांशे व्यापकताप्रकारकनिश्चयश्च तादृशस्थाणुत्वादिसंशयरूपो नास्त्येव तादृशनिश्चयस्य स्वकालेऽपि तादृशसंशयविरोधित्वादतो न तादृशसंशयरूपव्यापकताप्रकारकनिश्चयासङ्ग्रहभयेन तादृशसंशयभेदस्य प्रतिबन्धकत्वावच्छेदकत्वासम्भवस्यावकाशः । एवं तादृशसंशयभेदं निवेश्य पुरुषत्वाद्यवच्छेदेन स्थाणुत्वाद्यभावनिश्चयसाधारणेन रूपेण स्थाणुत्वाद्यभावः पुरुषत्वादिव्यापक इति बुद्धेः पुरुषः स्थाणुरित्यादिधीप्रतिबन्धकतासम्भव इति ध्येयम् ।

अत्रापि ज्ञानजन्तमुपेक्ष्य अवगतो गृहीत इति क्तान्तप्रयोगौ यदा संशयानुत्पादो निर्वाह्यः तदव्यवहितप्राक्क्षणे तज्ज्ञानसत्त्वमपेक्षितं न तु तदेव इति लाभाय ।

एतेन चिरविनष्टज्ञानजोद्बुद्धसंस्कारसत्त्वेऽपि संशयानुत्पादलाभाय तथाऽभिधानमिति हेयम् । उद्बुद्धसंस्कारज्ञानयोरनुगमासम्भवेन पृथक् पृथक् प्रतिबन्धकताया वाच्यतया गौरवात्, उद्बुद्धसंस्कारात् स्मरणस्याऽऽवश्यकतया तेनैव कार्यकालवर्त्तिना संशयप्रतिबन्धसम्भवाच्च ।

यदवच्छेदेन व्यावर्त्तकधर्मदर्शनं तद्धर्मविशिष्टे न संशय इत्युक्तमेव विशेष्य दर्शयति । यथेति । स्थाणुत्वाभावस्य पुरुषत्वाव-

च्छेदेन ग्रहे पुरुषोऽयं स्थाणुर्न वेति न संशय इत्येकोऽन्वयः। एवं स्थाणुत्वाभावस्य पुरुषत्वावच्छेदेन पुरुषत्वस्य चेदन्त्वावच्छेदेन ग्रहे अयं स्थाणुर्न वेति न संशय इत्यपरः। चरमः स्फुट एव। तद्व-दन्योन्याभावादिरित्यस्य व्यावर्त्तकतया बोद्धव्य इत्यर्थकेनाग्रि-मेण द्रष्टव्य इत्यनेन सम्बन्धः। सर्वत्रादिना तदवच्छेदकतद्याव-र्त्तकयोः परिग्रहः। तत्पदं सर्वत्र ग्राह्यम्। संशयत्वस्य व्यावर्त्त-कदर्शनप्रतिबध्यतावच्छेदकत्वभ्रमं निराकरोति। एवमिति। तद्-भ्रमोऽपीत्यस्य व्यावर्त्तकधर्मदर्शनदशायामित्यादिः। तथा च सं-शयनिश्चयसाधारणज्ञानत्वमेव तत्प्रतिबध्यतावच्छेदकमिति भा-वः। विशेषदर्शनस्य। तद्यावर्त्तकदर्शनस्य। विपरीतज्ञानमात्रेति। तज्ज्ञानसामान्येत्यर्थः। अग्रे। धूमत्वपुरस्कारेणेत्यादौ।

(चि०) ननु भावोऽभावो वा उभयथाऽपि प्र-मेयम् इत्यत्र भावत्वाभावत्वयोर्व्याप्यतावच्छेदक-योरग्रहादनुमानं न स्यात् तदन्यान्यत्वरूपस्यान्यतर-त्वस्य लिङ्गत्वाभावादिति चेन्न। भावत्वाभावत्वा-न्यान्यधर्मवत्त्वस्य लिङ्गत्वात्। एवं धूमालोकान्यतर-त्वमपि लिङ्गम्।

(दी०)नन्विसादि। इदं नीलत्वेन प्रतीयमानं भावोऽभावो वा। भावत्वाभावत्वयोः। तत्त्वयोरित्यर्थः। लिङ्गत्वाभावात्। अप्रसिद्धत्वेन तत्त्वासम्भवात्। भावत्वाभावत्वेत्यादिकं केव-लान्वय्यनुमानमतिरिक्तश्चाभावमभ्युपेत्य। केवलान्वयिनः सा-ध्यस्य धर्ममात्रमेव व्याप्यमिति तु मन्तव्यम्। एवमिति। लि-ङ्गं व्याप्यत्वे, लिङ्गतावच्छेदकं वा वह्नौ।

(गा०) प्रमेयमित्यस्य समानलिङ्गं पक्षरूपविशेष्यवाचकपदं पूरयति। इदमिति। इदन्त्वस्य तेजोऽभावत्वात्मकत्वे तदवच्छिन्ने भावत्वसंशयायोगात्तद्विवृणोति। नीलत्वेनेति। मूलेऽनुमानम्। अ-नुमितिः। उभयथाऽपीत्यनेनेदं प्रमेयमिति ज्ञानस्यावधारणत्वला-

भावाभावान्यतरत्वस्यानुमितिहेतुत्वावश्यकत्वं लभ्यते, तथा च इदं भावोऽभावो वेति संशयस्थले जायमानमिदमुभयथाऽपि प्रमेयमित्यनुमितिस्तव नये न स्यादित्यर्थः । अनुमित्यनुपपत्तौ हेतुरग्रहादित्युक्तम् । अग्रहादित्यस्य पक्षधर्मतानिश्चयप्रकारतयेत्यादिः । अग्रे तादात्म्यसम्बन्धेनान्यतरवतो लिङ्गत्वमुपेक्ष्यान्यतरस्य धर्मस्य लिङ्गतायां सिद्धान्तयिष्यमाणतया अत्रापि भावत्वादिधर्मवृत्तेरेव लिङ्गतावच्छेदकस्याग्रहे मूलतात्पर्यमवगम्यते इत्यभिसन्धाय भावत्वादिपदं भावत्वत्वादिपरतया व्याचष्टे दीधितौ । भावत्वेति । अप्रसिद्धानुयोगिकाभावस्य दुर्निरूपतया लिङ्गत्वाभावादित्यसम्भवपरतया हेतुं पूरयन् व्याचष्टे । अप्रसिद्धत्वेनेति । भावभेदवैशिष्ट्यस्याभावभेदावृत्तितया तद्विशेषणतया लिङ्गतावच्छेदकबाधकत्वासम्भवादिति पर्यवसितोऽर्थः ।

ननु मीमांसकैः केवलान्वय्यनुमानानङ्गीकाराद्भावभिन्नपदार्थानङ्गीकाराच्च भावभिन्नत्वरूपाभावत्वघटितान्यतरत्वावच्छिन्नलिङ्गकप्रमेयत्वानुमानोपपादनं विरुद्धमित्यत आह । भावत्वाभावत्वेत्यादिकमिति । अतिरिक्तश्चेति ।

यद्यप्यभावस्याधिकरणरूपत्वेऽपि स्वरूपसम्बन्धादिरूपाभावत्वघटितान्यतरस्य हेतुत्वसम्भवस्तथापि दर्शितसंशये भावभेदस्य कोटितया तदघटितान्यतरस्य हेतुत्वं मूलभिप्रेतमित्याशयेनेदम् । साध्यस्य केवलान्वयित्वज्ञानकाले यत्किञ्चिद्रूपावच्छिन्नस्यैव वृत्तिमतो लिङ्गता सम्भवतीति मूले तदकथनात् न्यूनताभङ्गायाह । केवलान्वयिन इति । अयमालोको धूमो वेति सन्देहे धूमालोकान्यतरत्वस्यानुमापकत्वरूपं लिङ्गत्वमुक्तं वह्नौ साध्ये व्यधिकरणतया न सम्भवतीति साध्यं पूरयति । व्याप्यत्व इति । वह्न्यादिव्याप्यत्वे साध्य इत्यर्थः । लिङ्गपदस्यात्रैव लिङ्गतावच्छेदकपरत्वे वह्न्यादिसाध्यपरतया मूलसङ्गतिरित्याह । लिङ्गतावच्छेदकं वेति ।

(चि०) अथ यद्व्यतिरेकज्ञानं यदुत्पत्तिप्रतिबन्धकं तत् तन्निश्चयसाध्यम्, तथा च पक्षधर्मस्य व्याप्यभेदज्ञानमनुमितिप्रतिबन्धकम्, अतो व्याप्याभेदज्ञानं तद्धेतुः सिध्यतीति चेन्न । धूमत्वपुरस्कारेण

व्याप्तिस्मरणपक्षधर्मताज्ञाने सति विशेषदर्शनान्न धूमे व्याप्यभेदज्ञानम्, किन्त्वनुमितेरेव तत्रोत्पत्तिः तत्सामग्रीसत्त्वात्। अतो न व्याप्यभेदज्ञानम् अनुमितिप्रतिबन्धकं येन व्याप्याभेदज्ञानं तद्धेतुः स्यात्। न च धूमत्वपुरस्कारेण व्याप्तिस्मरणपक्षधर्मताज्ञाने इयं धूमव्यक्तिर्वह्निव्याप्या नेति भ्राम्यतोऽनुमित्यापत्तिरतो विशिष्टज्ञानं तद्धेतुरिति वाच्यम्। धूमत्वस्य विशेषस्य दर्शनेन तादृशभ्रमानुत्पत्तेः तत्रानुमितिसद्भावादेव। अन्यथा निश्चयसामग्र्यां सत्यां भ्रमानन्तरं परामर्श एव कुतो न भवति।

(दी०) यद्व्यतिरेकेति। यत्संशयव्यतिरेकानिश्चयाविस्त्र व्याख्याततत्त्वमेतत्। यद्वा यद्व्यतिरेकनिश्चये कार्यानुत्पत्तौ तद्व्यतिरेकानिश्चयाभावस्य कारणतामपेक्ष्य तन्निश्चयस्यैव कारणत्वं युक्तं लाघवादित्यभिप्रायकमिदम्। अत एव क्लृप्तनियतपूर्वभावतया भेदग्रहाभाव एवानुमितिहेतुरित्यभिप्रेत्य अस्तु वेत्यादि वक्ष्यति। सामान्यतो विशेषदर्शनात् सामान्यतो भ्रमो न स्यात् विशेषतस्तु स्यादेवेत्यभिप्रायिकीमाशङ्कां निरस्यति। न चेति।

(गा०) ननु यद्धर्मिकयद्व्यतिरेकज्ञानप्रतिबध्यं तद्धर्मिकतन्निश्चयत्वावच्छिन्नजन्यमित्येतादृश्यां पक्षीयधूमधर्मिकसाध्यव्याप्तिनिश्चयत्वेनानुमितिहेतुत्वसाधिकायां मूलोक्तव्याप्तौ ग्राह्यव्यतिरेकानिश्चयप्रतिबध्ये घटज्ञानादौ व्यभिचारज्ञानसामान्यप्रतिबध्येऽव्यभिचारज्ञाने च व्यभिचार इत्याशङ्क्याह। यत्संशयेति।

व्याख्याततत्त्वमिति। तच्च तत्त्वं संशयसाधारणव्यतिरेकज्ञानत्वेन प्रतिबन्धकत्वं व्याप्तिघटकम्, ग्राह्यसंशयस्य सर्वत्रैवाप्रतिबन्धकत्वोपगमात्। अव्यभिचारग्रहेऽपि व्यभिचारनिश्चयत्वेनैव प्रतिबन्धकत्वमिति। अथेत्यादिशङ्काया व्याप्तिपरत्वे स्वयमनुप-

पत्तेर्वक्ष्यमाणतया फलानुत्पत्तिनियतत्वरूपप्रतिबन्धकत्वनिवेशनेन मूले वक्ष्यमाणस्वरूपासिद्धेः परिहारसम्भवेन समाधानासङ्गतेः लाघवेन विशिष्टपरामर्शकारणताव्यवस्थापनपरतया तां व्याचष्टे । यद्वेति । व्यतिरेकसंशये कार्यानुत्पत्त्यनुरोधेन निश्चयत्वेन हेतुतायाः पूर्वमाशङ्कितत्वात् पौनरुक्त्याशङ्कायाः परिहाराय मूलस्थव्याप्यभेदज्ञानपदस्य निश्चयपरतां स्फुटयितुं व्यतिरेकज्ञानसामान्यमुपेक्ष्य तन्निश्चयकथनम् । कार्यानुत्पत्तौ । कार्यानुत्पत्तिनियमे । इत्थञ्च मूले यदुत्पत्तिप्रतिबन्धकम् इत्यत्र प्रतिबन्धकत्वं गुरुधर्मावच्छिन्नभेदाग्रहकारणताप्रसञ्जकं कार्यानुत्पत्तिनियतत्वरूपमेवेति बोध्यम् । लाघवात् । अवच्छेदकलाघवात् । संशयसाधारणज्ञानत्वावच्छिन्नाभावहेतुत्वेऽप्यप्रामाण्यनिश्चयत्वावच्छिन्नाभावस्य विशेषणत्वाद्गौरवं बोध्यम् । अत एव । उक्तग्रन्थस्य लाघवप्रदर्शनपरत्वादेव । अनुमितिहेतुः । कल्पनालाघवादिति शेषः । वक्ष्यतीति । उक्तग्रन्थस्य व्याप्तिपरत्वे भेदग्रहाभावस्य हेतुत्वेऽपि व्याप्तिबलाद्विशिष्टपरामर्शकारणतासिद्धेरावश्यकत्वात् तामनिराकृत्य भेदाग्रहकारणत्वोपगमस्यासङ्गत्यापत्तेरिति भावः । एवञ्च समाधाने अनुमितिप्रतिबन्धकमित्यस्य मयोच्यत इति शेषः । येन । यदपेक्षया लाघवेनेत्यर्थः । विशेषदर्शनाद् भ्रमोत्पत्त्यभावस्य प्रागुक्तत्वान्न चेत्याद्याशङ्कानुत्थितेस्तदाशयं प्रकाशयति । सामान्यत इति ।

धूमत्वस्य विशेषस्य दर्शनेनेति मूलस्य उक्तभ्रमे ग्राह्याभावावच्छेदकतया भातस्य धूमत्वस्य धर्मितावच्छेदकतया स्फुरणेनेत्यर्थो दीधित्यनुसारेण बोध्यः ।

(चि०) अस्तु वा व्याप्यतया पक्षधर्मतया चावगतस्य भेदाग्रह एवानुमितिहेतुः, परामर्शहेतुतया तस्याऽऽवश्यकत्वात् । अत एवासन्निकृष्टधूमज्ञानादप्यनुमितिः । न चैवं गौरवम्, तदा विशिष्टज्ञानानुपस्थितेः । न च जनकज्ञानाविरोधिनो ज्ञानस्याप्रतिबन्धकत्वात् भेदग्रहो न प्रतिबन्धक इति वाच्यम् । अभेदज्ञान-

स्याजनकत्वात् त्वयाऽपि लिङ्गपरामर्शे तादृशस्य प्रतिबन्धकत्वस्वीकाराच्च । अथ गोत्वं मधुरत्वावान्तरजातिर्वा लिङ्गं न स्यात् तद्गतधर्मान्तरस्याभावात्, अत एव तस्य विलक्षणत्वात् इति चेन्न । व्यक्तेरेव तत्र प्रकारत्वात्, न हि गौर्गोत्वमिति ज्ञानयोरविशेषः, अन्यथा गोत्वमिति ज्ञानस्य निर्विकल्पकत्वापत्त्या व्याप्यत्वग्रहे परामर्शे चानुपयोगात् गवेतरावृत्तित्वे सति सकलगोवृत्तित्वं गोत्वत्वमित्यनुभवाच्च । न चैवमनवस्था, तदितरावृत्तित्वे सति तद्वृत्तित्वस्यानुभवेनापलापासम्भवात् ।

इति परामर्शपूर्वपक्षचिन्तामणिः ।

(दी०)अस्तु वेत्यभ्युपगमवादः । न चेत्यादि । अभेदज्ञानस्याहेतुत्वे भेदग्रहो न प्रतिबन्धको भवितुमर्हतीत्यर्थः । अभेदेति । तथा चातथाभूतस्यापि प्रतिबन्धकत्वमनायत्या वक्तव्यमिति भावः । अतथाभूतत्वस्य सन्दिग्धत्वे व्यभिचारमाह । त्वयापीति । विशेषणान्तरदाने चाप्रयोजकत्वमिति भावः । गोत्वे गोपदशक्यतावच्छेदकत्वमविशेषितं विशेषितं वा तदस्तीत्यतः मधुरत्वेति । मधुरत्वव्याप्यो धर्मो जातिरखण्डोपाधिर्वेति फलतो न विशेषः । गौरिति ज्ञाने गोत्वप्रकारकत्वं विशेषमाशङ्क्याह । अन्यथेति । व्यक्तेः प्रकारत्वेऽपि लिङ्गतावच्छेदकत्वासम्भवादाह । गवेतरेति । गोत्वत्वस्यात्राप्रवेशान्नात्माश्रयः, अत्र च यथासाध्यं गवेतरसमवेतत्वादिकमेवोपादेयं कालादौ व्यभिचारवाणाय समवायेन सम्बन्धेन हेतुत्वस्यावश्यवाच्यत्वेनाभावादिसाधारण्येऽप्यदोषात्, व्यतिरेकेऽपि रूपान्तरेण सम्ब-

न्धान्तरेण च गोत्वाभावस्यापि व्यभिचारितया गवेतरासमवेतस्य तत्त्वेन समवायसम्बन्धेनाभावस्यैव गमकत्वात् ।

इति परामर्शपूर्वपक्षदीधितिः ।

(गा०) विशेषदर्शने संशयवद् भ्रमस्यापि न सम्भव इति भेदाग्रहहेतुत्वाभिधानासङ्गतिरत आह । अस्तु वेति । ननु व्याप्यपक्षधर्मयोर्भेदाग्रहस्यानुमितिहेतुत्वे तेषां कारणबाधेनानुमित्यात्मकान्यथाख्यातिनिराकरणं विरुध्यते ह्रदवृत्तिबाष्पादौ वह्निव्याप्यधूमादेर्भेदाग्रहेण ह्रदादौ वह्न्याद्यनुमितेर्दुर्वारत्वात् । न च फलासिद्ध्या ह्रदादिपक्षं वह्न्यादिरूपसाध्यञ्चान्तर्भाव्य कारणत्वाकल्पनान्नापत्तिरिति वाच्यम् । पक्षमनन्तर्भाव्य पक्षनिष्ठप्रत्यासत्त्या कारणत्वकल्पनेनापत्तिसम्भवादिति चेन्न । एतन्मतानिर्भरेणैतद्दोषस्याकिञ्चित्करत्वात् । व्याप्यतावच्छेदकप्रकारकस्यैव पक्षधर्मताज्ञानस्य भेदाग्रहहेतुतावच्छेदकत्वोपगमेनान्यथाख्यातिवारणसम्भवाच्च[१] इतरसकलकारणसत्त्वे यत्सत्त्वे कार्यानुत्पादस्तस्यैव प्रतिबन्धकतायाः आवश्यकत्वादिति भावः । न च जनकज्ञानेत्यादिमूलशङ्काया भेदग्रहे नैयायिकानामनुमित्यप्रतिबन्धकत्वसाधनपरत्वेऽसङ्गतिः जनकज्ञानाप्रतिबन्धकस्यैव हेतुतायाः स्वीकरणीयत्वात् तस्य च स्वमतेऽसिद्धत्वात् इत्यतस्तस्या आपत्तिपरत्वं स्फुटीकरोति । अभेदज्ञानस्येति । मूले 'अभेदज्ञानस्याजनकत्वात्' अतीन्द्रियहेतुकानुमितावुक्तक्रमेण व्यभिचारेण जनकत्वासम्भवात् तथा च विपर्ययानुमाने बाध इति भावः । नन्वेवमप्युक्तव्याप्तिविरोधाद्भेदग्रहस्य प्रतिबन्धकत्वानुपपत्तिर्दुर्वारैवेत्यत आह दीधितौ । तथा चेति । अतथाभूतस्यापि । जनकज्ञानाविरोधिनोऽपि । भेदग्रहस्येति शेषः । अनायत्या वक्तव्यमिति । अन्यथा भेदग्रहदशायां अनुमित्यापत्तेरिति शेषः । तथा च तादृशव्याप्तिरेव

---

[१] पक्षमनन्तर्भाव्य पक्षनिष्ठप्रत्यासत्त्या कारणत्वकल्पनेनापत्तिसम्भवादित्यभिसन्धायास्तु वेत्यादिकल्पे अनिर्भरमाह अस्तु वेत्यादि—इति पु० पा० ।

बाधितेति भावः। सन्दिग्धत्व इति। नैयायिकैरतीन्द्रियादिहेतुक-स्थले मानसविशिष्टज्ञानोपगमेन व्यभिचारानिर्णयादिति भावः।

ननु लिङ्गपरामर्शे भेदग्रहस्य जनकज्ञानाविरोधिनः प्रतिबन्धकत्वेऽपि न व्यभिचारः ग्राह्याभावानवगाहित्वविशिष्टस्य जनकज्ञानाविरोधित्वस्याप्रतिबन्धकत्वव्याप्यत्वोपगमादित्यत आह। विशेषणान्तरदाने चेति।

ननु गोपदवाच्यत्वे साध्ये गोपदशक्यतावच्छेदकत्वस्य लिङ्गतावच्छेदकत्वसम्भवेऽपि सास्नादिसाध्यकस्थले न तथात्वसम्भवः गोपदस्य नानार्थतया अन्यत्रापि तच्छक्यतावच्छेदकसत्त्वात् इत्यत आह। विशेषितं वेति। सास्नादिमद्वृत्तित्वादिविशेषितं वेत्यर्थः। वाकारो व्यवस्थितविकल्पे।

ननु गुणगतजातिमनङ्गीकुर्वतां मधुरत्वव्याप्यरसगतजातेरभावात्तल्लिङ्गतानुपपत्तिरित्यत आह। मधुरत्वेति। फलत इति। तादृशधर्मस्य क्षीररसत्वाद्यनुमापकतायाः सर्वसम्मतत्वादिति भावः। गोत्वप्रकारकत्वं विशेषमिति। गोत्वमिति ज्ञाने तदभावादिति भावः। मूले अन्यथेति। गोत्वमिति ज्ञाने व्यक्तेरप्रकारत्वे अनुपयोगात्। उपयोगानुपपत्तेः। अवच्छेदकप्रकारकज्ञानविधयैव तस्यावच्छेद्यव्याप्तिग्रहे सम्बन्धितावच्छेदकप्रकारकज्ञानविधया व्याप्तिस्मारकत्वेनैव च तस्य परामर्शे उपयोगादिति भावः। दीधितौ लिङ्गतावच्छेदकत्वासम्भवादित्यस्य गोपदप्रवृत्तिनिमित्तत्वादिसाध्यके तादात्म्येन गोत्वादिहेतावित्यादिः। आधेयतया गोविशिष्टस्य गवाधेयत्वविशिष्टस्य च द्रव्यत्वादेरपि गोमात्रवृत्तितया सास्नादिसाध्यकस्थले व्यक्तेर्लिङ्गतावच्छेदकत्वं सम्भवत्येव इत्यवगन्तव्यम्।

ननु उक्तगोत्वत्वशरीरेऽपि भेदप्रतियोगितावच्छेदकमुद्रया गोत्वस्यानतिप्रसक्तगोत्वत्वेनैव निवेशनीयतया आत्माश्रय इत्यत आह। गोत्वत्वस्येति। अप्रवेशादिति। स्वरूपत एव तत्प्रवेशसम्भवादिति भावः। मूले न चैवमिति। स्वतो व्यावृत्ते गोत्वादावपि धर्मान्तरस्वीकारे। अनवस्था। अविश्रान्तधर्मधाराप्रसङ्गः। प्रामाणिकत्वादनवस्था न दोषायेति समाधत्ते। तदितरेति। सास्नादौ साध्ये गोत्वघटकसकलगोसमवेतत्वांशस्य वैयर्थ्यात् तत्र तं परित्यजाति

दीधितौ । अभावेति । अत्र एतद्घटकं यथासाध्यमिति । सास्नादौ साध्ये गवेतरासमवेतत्वं विशेषणीभूतं गोसमवेतत्वञ्च, सास्नाव्यापकजातित्वादौ साध्ये तादात्म्येन हेतुतायां सकलगोसमवेतत्वं केवलं व्याप्यतावच्छेदकं वाच्यं न तु विशिष्टं, विशिष्टन्तु(१) गोपदप्रवृत्तिनिमित्तत्वादिसाध्यके तादात्म्येन गोत्वे हेतावित्यर्थः।

ननु गवेतरासमवेतत्वस्याभावमेयत्वादावपि सत्त्वात् सास्नादिव्यभिचारितया सास्नादिसाध्यक एव कथं तद्व्याप्यतावच्छेदकं इत्यत आह । कालादाविति । सम्बन्धसामान्येन हेतुत्वे सकलगोसमवेतत्वांशनिवेशेऽपि गोत्ववति सास्नादिशून्ये कालादौ व्यभिचारस्याऽऽवश्यकतया समवायेन हेतुत्वस्यावश्यं स्वीकरणीयत्वात् गवेतरासमवेतत्वस्याभावादिसाधारणस्यापि समवायेन व्यभिचारितायामनवच्छेदकत्वादित्यर्थः(१) । एतच्च साध्याभाववद्वृत्तित्वमेव व्याप्तिरित्यभिप्रायेण । यदि च हेतुतावच्छेदकसम्बन्धेनावृत्तिव्यावृत्तं तेन सम्बन्धेन वृत्तिमत्त्वमपि तत्र निवेश्यते तदा अवच्छेदकस्यानतिप्रसक्तत्वनियमेन गवेतरासमवेतत्वमात्रस्य समवायसम्बन्धेन वृत्तिमत्त्वमात्रघटितव्याप्तेरतिप्रसक्ततयाऽनवच्छेदकत्वात् समवेतत्वांशोऽपि तद्विशेष्यविधया हेतुतावच्छेदककोटौ निवेश्य इति ध्येयम् । सास्नाभावसाध्यकगोत्वाभावादिहेतुकस्थलेऽपि समवायसम्बन्धावच्छिन्नगवेतरासमवेतत्वावच्छिन्नप्रतियोगिताकाभावत्वमेव व्याप्यतावच्छेदकं न तु सकलगोसमवेतत्वमपि हेतुभूताभावप्रतियोगितावच्छेदके निवेश्यं वैयर्थ्यात् (२)।

न च गवेतरासमवेतत्वस्य प्रतियोगितावच्छेदकतया निवेशे तद्वैयर्थ्येऽपि प्रतियोगित्वसमानाधिकरणतया निवेशे न तथात्वं गवेतरासमवेतत्द्रूपाद्यभावस्य गोसाधारणत्वेन व्यभिचारित्वादिति शङ्क्यम् । सकलगोसमवेतगोत्वस्यापि द्वित्वादिना अभावस्य गोसाधारणत्वात् सकलगोसमवेतत्वनिवेशेऽपि तादृशरूपावच्छिन्नाभावस्यैव हेतुतया वाच्यतया तदंशवैयर्थ्यस्य दुर्वारत्वात् । विशिष्टस्य गौरवेणाभावप्रतियोगितायामप्यनवच्छेदकतया तदव-

(१) गवेतरावृत्तित्वविशिष्टं सकलगोवृत्तित्वमित्यर्थः ।
(२)समवायेनाव्यभिचारितायामवच्छेदकत्वादित्यर्थ इति पु०पा०।

च्छिन्नाभावाप्रसिद्धेश्चेत्यत आह। व्यतिरेकेऽपीति । सम्बन्धान्तरेण गोत्वाभावस्य व्यभिचारितया समवायेति दृष्टान्तविधयोक्तम् ।

यत्तु गवेतरासमवेतस्य मेयत्वादेः केवलान्वयितया सम्बन्धसामान्येन तत्त्वावच्छिन्नाभावाप्रसिद्धिरतः समवेतत्वं निवेश्यमेवेत्याशङ्कानिराकरणाय तदिति तत्तुच्छम्। सम्बन्धसामान्येन गवेतरासमवेतसमवेताभावस्याव्यभिचारितयाक्तग्रन्थस्य यत्किञ्चित्सम्बन्धावच्छिन्नाभावहेतुतायामेव व्यभिचारप्रदर्शनपरतया तद्धेतुतायाश्चाप्रसिद्धिविरहेण तामादाय समवेतत्वांशसार्थक्यशङ्कानवतारेण तत्र व्यभिचारप्रदर्शनस्यानौचित्येनासङ्गतेः सम्बन्धान्तरेण सम्बन्धसामान्येन गोत्वाभावस्यापि व्यभिचारितया कालादेः पक्षत्वे स्वरूपासिद्धतयेति व्याख्यायामुदक्षरत्वात् ।

इति परामर्शपूर्वपक्षविवृतिः समाप्ता ।

(चि०) अत्रोच्यते, अयमालोको धूमो वा उभयथापि वह्निव्याप्य इति ज्ञानं ततोऽनुमितिः । न च धूमत्वेनाऽऽलोकत्वेन वा तत्र निश्चयः। अथ तदन्यान्यत्वमेव तत्र लिङ्गम् । न च तदज्ञानदशायामनुमितिदर्शनात् न तथेति वाच्यम् । धूमालोकान्यान्यत्वज्ञानं विना तवापि तत्र व्याप्यत्वानिश्चयेन तदर्थं तद्बोधावश्यकत्वादिति चेन्न। न हि धूमालोकान्यान्यत्वं धूमान्यान्यत्वं वा व्याप्यतावच्छेदकं गौरवात् व्यभिचारावारकाविशेषणवत्त्वाच्च किन्तु धूमत्वादिकं तच्च तत्र सन्दिग्धमेव । ननु तदन्यान्य-

(१) तदा अवच्छेदकस्यानतिप्रसक्तत्वनियमेन गवेतरासमवेतत्वे सति समवेतत्वमेव साध्यादिव्याप्यतावच्छेदकं वाच्यं गोत्वाभावे साध्याभावादिसाध्यकेऽपि प्रतियोगिविशेषणतया गवेतरासमवेतत्वस्यैव निवेशो न तु सकलगोसमवेतत्वस्यापि वैयर्थ्यात् इति पु०पा० ।

वह्निव्याप्यमेव व्यभिचाराभावेन व्याप्तिविरहसा-
धनस्य बाधितत्वात् पुरुषस्तु तत्र नीलधूमवत्त्वादि-
त्यत्रैवाधिकेन निगृह्यते न तु व्याप्यत्वासिद्ध्येति
चेन्न। तदन्यान्यद् धूमालोकस्वरूपमेव तच्च व्याप्यमिति
सत्यम्, न च वस्तुगत्या व्याप्यज्ञानादनुमितिः
अतिप्रसङ्गात् किन्तु व्याप्यतावच्छेदकप्रकारकज्ञा-
नात् । न च तदन्यान्यत्वं वह्निव्याप्यतावच्छेदक-
मित्युक्तम् ।

(दी०)लिङ्गम्। लिङ्गतावच्छेदकम्, तथा च न व्यभिचारः।
न तथा । न तेन व्यभिचारवारणम् । न हीति । धूमान्यान्यत्व-
मिति दृष्टान्तार्थम् । न चैकधर्मस्यावच्छेदकत्वापेक्षया धर्मद्व-
यस्य तत्त्व एव गौरवमिति वाच्यम् । तादृशैकधर्मघटका-
नेकभेदादिघटकतया धर्मद्वयस्यैव प्रथमोपस्थितत्वेन चाव-
च्छेदकत्वौचित्यात् । अन्यथा वह्न्यादीनामपि व्याप्यतया
तावदन्यतमत्वस्यैवावच्छेदकत्वं स्यात् ।

(गा०) मूले अयमिति । पर्वतवृत्तिरित्यर्थः । आलोको धूमो
वेति । स्वरूपतो धूमत्वालोकत्वयोरत्र कोटिता न तु धूमत्वालो-
कत्वत्वावच्छिन्नयोः, तथा सत्युक्तसंशयस्य स्वरूपतो धूमत्वा-
दिप्रकारेण पक्षधर्मतानिश्चयाविरोधितया असङ्गतेः । न च संशय-
स्य भावद्वयमात्रकोटिकस्यानभ्युपगमे धूमत्वाभावालोकत्वाभाव-
योरत्र कोटितायाः स्वीकरणीयत्वात् तत्प्रतियोगितावच्छेदकधूम-
त्वत्वादेरपि भानमावश्यकं इति वाच्यम् । धूमत्वाद्यभावस्येव
धूमादिभेदस्यापि कोटितया धूमत्वादिसंशयनिर्वाहात् धूमादिभे-
दज्ञाने च धूमत्वत्वादिभानानावश्यकत्वात् । न च धूमत्वादौ धूमा-
दिभेदविरोधभाने तद्धर्मितावच्छेदकतया धूमत्वत्वादिभानमाव-
श्यकमिति धूमत्वधूमादिभेदकोटिकसंशयेऽपि धूमत्वत्वादिनैव धू-
मत्वादेः कोटित्वमावश्यकं संशये कोटिविषयतायां विरोधग्रहप्र-

कारावच्छिन्नत्वनियमादिति वाच्यम् । संशयस्थले कोट्योः परस्परविरोधभानानियमात् धूमभेदादौ धूमाद्यवृत्तित्वरूपधूमत्वादिविरोधभानेन स्वरूपतो धूमत्वादिकोटिकसंशयनिर्वाहात्, स्वरूपतो भासमानधूमत्वाद्यवच्छेदेन धूमादिभेदाभावज्ञानस्यापि धूमत्वादौ धूमादिभेदविरोधज्ञानतया तादृशविरोधज्ञानेऽपि धूमत्वत्वादिभानानियमाच्च ।

अथैवमपि पर्वतवृत्तित्वविशिष्टे धूमत्वादिसन्देहः पर्वतवृत्तित्वविशिष्टे धूमत्वादिनिश्चयस्यैव विरोधी न त्वनुमितिजनकतया अभिमतस्य धूमत्वादिविशिष्टे पर्वतवृत्तित्वनिश्चयस्यासमानधर्मितावच्छेदकत्वात् ग्राह्याभावानवगाहित्वाच्चेति न तादृशसंशयदशायामनुमित्यनुपपत्तिः, एवं न्यायमतसिद्धपरामर्शनिर्वाहाय 'उभयथापि वह्निव्याप्यं' इति इदम्पदार्थे व्याप्तिनिश्चयाभिधानमसङ्गतं पक्षवृत्तित्वविशिष्टे व्याप्तिनिश्चयस्यानुमितिहेतुत्वे व्याप्तिविशिष्टवैशिष्ट्यज्ञानस्य व्याप्तिप्रकारकज्ञानरूपकरणव्यापारस्य उपसंहारग्रन्थेऽनुमितिहेतुत्वाभिधानविरोधादिति चेन्न । पक्षवृत्तित्वावच्छिन्ने धूमत्वादिरूपविशेषणसन्देहे पक्षे धूमत्वादिविशिष्टकोटिकसंशयस्यौचित्यावर्जिततया पक्षे व्याप्यतावच्छेदकविशिष्टप्रकारकनिश्चयो न सम्भवति पक्षविशेष्यकनिश्चय एव पक्षविशेष्यिकायामनुमितौ हेतुरित्याशयेन धूमत्वादिसंशयाभिधानस्य पक्षवृत्तित्वावच्छिन्ने व्याप्यत्वाभावावगाहिविशेषणसन्देहे च पक्षे व्याप्तिविशिष्टकोटिकसंशयस्यैवौचित्यावर्जिततया पक्षविशेष्यकव्याप्तिविशिष्टप्रकारकानुमितिहेतुनिश्चयासम्भवेन तादृशविशेषणसंशयविरोधिपक्षवृत्तित्वविशिष्टविशेष्यकव्याप्तिनिश्चयाभिधानस्य च सङ्गतेः ।

वस्तुतः पक्षवृत्तिर्धूमो न वेति संशयस्य पक्षवृत्तिर्धूम इति निश्चय इव धूमत्वविशिष्टधर्मिकपक्षवृत्तितानिश्चयेऽपि विरोधित्वं दुरपह्नवं धूमत्वावच्छेदेन पक्षावृत्तित्वस्य पक्षवृत्तित्वावच्छेदेन धूमभेदनिर्वाह्यतया तदवच्छेदेन धूमभेदसंशयाद् धूमत्वावच्छेदेन पक्षावृत्तित्वसंशयस्यौचित्यावर्जितत्वात् । एवं पक्षवृत्तित्वविशिष्टे व्याप्यत्वनिश्चयो व्याप्तिविशिष्टे पक्षवृत्तित्वनिश्चये व्याप्तिविशिष्टे पक्षवृत्तित्वसंशायकपक्षवृत्तित्वावच्छिन्नधर्मिकव्याप्त्यभावसंशय—

विरोधितयोपयुज्यते इति पक्षवृत्तिधर्मिकधूमत्वादिसंशये व्याप्ति-निश्चयाभिधानसङ्गतिः ।

केचित्तु व्याप्तिसम्बन्धेन वन्हिसाध्यकपुरोवर्त्तिधूमादिपक्षक-स्थले तादात्म्यसम्बन्धेन धूमादेर्हेतुत्वे तादात्म्यसम्बन्धेन धूमत्वा-दिरूपव्याप्यतावच्छेदकावच्छिन्नस्य यत्र पक्षे संशयस्तत्र व्याप्य-त्वेन धूमादेः पक्षे तादात्म्यसम्बन्धेन निश्चयादनुमित्युत्पत्त्या व्याप्य-तावच्छेदकप्रकारकपक्षधर्मतानिश्चयस्य व्यभिचारप्रदर्शनपरतया ए-तन्मूलमुक्तानुपपत्तिशङ्काव्याकुलचेतसो वर्णयन्ति ते पुनः प्रसि-द्धस्थले• पर्वत धूमत्वाद्यवच्छिन्नवत्तासंशयस्थलीयव्याप्तिविशि-ष्टवत्तानिश्चयजन्यानुमितौ व्याप्यतावच्छेदकप्रकारकपक्षधर्मता-निश्चयव्यभिचारापेक्षाबीजं सम्यगपश्यन्तः कथं निर्वृतिभाजो भ-वन्तीति चिन्त्यम् ।

मूले 'उभयथापि वह्निव्याप्य' इति निश्चयकथनं स्वमते हेतु-रक्षणाय । अत्र वह्नेः साध्यस्योपादानाद् धूमालोकान्यतरत्वं लिङ्ग-मित्यत्र लिङ्गपदस्य यथाश्रुतार्थकत्वानुपपत्तेस्तद्व्याचष्टे । लिङ्गमि-ति । व्यभिचारवारणस्याप्रक्रान्तत्वे 'न तथे' त्यत्र तथापदस्य व-क्ष्यमाणतदर्थकत्वानुपपत्तेः पूरयति । तथा च न व्यभिचार इति । न तथेत्यस्य न लिङ्गतावच्छेदकमिति नार्थो युज्यते धूमत्वादे-रज्ञाने आलोकत्वाद्यवच्छिन्नेनानुमितावपि तस्य लिङ्गतावच्छेद-कतायाः इव तदन्यान्यत्वस्य लिङ्गतावच्छेदकत्वसम्भवेन हेत्वस-ङ्गतेः अतो व्याचष्टे । न तेनेति । तेन । तस्य लिङ्गतावच्छेदकत्वेन । प्रकृते धूमत्वस्येव धूमान्यान्यत्वस्यापि सन्दिग्धतया तस्य व्या-प्यतावच्छेदकत्वखण्डनमनुपयुक्तमित्यत आह । धूमान्यान्यत्व-मितीति । एकधर्मस्य । अन्यतरत्वरूपस्य । धर्मद्वयस्य । धूमत्वालो-कत्वरूपस्य । तत्त्वे । व्याप्यतावच्छेदकत्वे । तथा च गौरवस्य व्या-प्यतावच्छेदकताबाधकत्वे वैपरीत्यमेव स्यादिति भावः । एक-स्यातिगुरुशरीरत्वेन लघुशरीरावच्छेदकयोर्द्वित्वमबाधकमित्या-शयेनाह । तादृशैकेति । धर्मद्वयस्यैवावच्छेदकतौचित्यादित्यन्वयः । शरीरलाघवमुक्त्वा उपस्थितिलाघवमप्याह । प्रथमोपस्थितत्वेन चे-ति । तावदन्यतमत्वस्य । वह्निधूमालोकान्यतमत्वस्य । अवच्छेदकत्वं स्यात् । न तु धूमालोकान्यतरत्वस्य, तथा च कुतो वैपरीत्या-

पादनमिति भावः ।

अन्यतरत्वाश्रये व्याप्तिरेव नास्ति अत एव तेन रूपेण हेतुप्रयोगे व्याप्यत्वासिद्ध्यादिना वादिनो निग्रह इत्येवान्यतरत्वस्य व्याप्यतानवच्छेदकत्वबीजं तदाश्रयस्य व्याप्यत्वे तस्यावच्छेदकताया आवश्यकत्वादित्यभिप्रायोऽन्यतरत्वस्य व्याप्यतावच्छेदकतानिराकर्तुरिति भ्रमेण शङ्कते मूले । न त्विति । भ्रमं निराकरोति । तदन्यान्यदिति । न च तदन्यान्यत्वं वह्निव्याप्यतावच्छेदकं इत्युक्तमिति, अन्यतरनिष्ठयोर्विभिन्नव्याप्त्योर्धूमत्वालोकत्वाभ्यामेवावच्छेदात् प्रत्येकानवच्छेद्यान्यतरत्वावच्छेद्यतया साधारणातिरिक्तव्याप्तेश्चानभ्युपगमात् इति भावः ।

(चि०) न चैवं तदन्यान्यत्वाद्वह्निव्याप्यत्वमपि तत्र नानुमेयं व्यर्थविशेषणत्वादिति वाच्यम् । प्रत्यक्षं हि तदन्यान्यत्वविशेषदर्शनाद्व्याप्यत्वज्ञानं जनयति, विशेषणज्ञानविशेषणविशेष्यसम्बन्धविशेषणविशेष्येन्द्रियसन्निकर्षतदसंसर्गाग्रहविशेषदर्शनानां सत्त्वेन वह्निव्याप्यत्वप्रत्यक्षसत्त्वात् । नचैवं न प्रत्यक्षेऽपि तदन्यान्यत्वज्ञानं सहकारीति वाच्यम् । अन्वयव्यतिरेकाभ्यां गुरोरपि तस्य विशेषदर्शनत्वेन प्रत्यक्षसहकारित्वात् तस्मात्तदन्यान्यत्वज्ञानं तत्र व्याप्यताज्ञानोपक्षीणं न तु साक्षादनुमितिहेतुरिति ।

(दी०) अन्वयेति । विशेषदर्शनं हि विपरीतज्ञानविरोधितया प्रत्यक्ष उपयुज्यते तत्त्वञ्चान्यतरत्वदर्शनस्यापि व्यावर्त्तकधर्मदर्शनत्वेनाक्षतम्, अत्र च तदन्यान्यत्वस्यातिरिक्तत्वे धूमत्वत्वादेस्तदघटितत्वात् धूमत्वादिरूपत्वेऽपि च धूमत्वत्वादेरप्रवेशाल्लिङ्गत्वेऽपि न वैयर्थ्यमित्यपि द्रष्टव्यम् । एवञ्चान्यतरत्वस्य व्याप्यत्वनवच्छेदकत्वे स्थिते तदवच्छेदेन तद्ग्रहोपगमे

तथाप्यन्यथाख्यातिस्वीकारप्रसङ्गः ।

(गा०)व्यर्थविशेषणघटितधर्मस्य व्याप्यतानवच्छेदकत्वे धूमालोकाभिन्नभेदवत् तत्त्वमपि न व्याप्यतावच्छेदकं तथा च व्याप्तित्वच्छिन्नत्वानियमात् तादृशभेदे वह्निव्याप्तिनिरूपिता व्याप्तिरेव न सम्भवतीति तेन वह्निव्याप्यत्वमपि नानुमातुं शक्यते वह्निव्याप्तिव्याप्यत्वेन पक्षधर्मतानिश्चयस्याप्ययोगात् इति भवन्मते वह्निव्याप्तिप्रकारकपक्षधर्मतानिश्चयोऽपि तत्र दुर्घट इत्याशङ्कते । न चैवमिति ।

ननु विशेषदर्शनसहकृतं प्रत्यक्षं तत्र व्याप्तिनिश्चायकं इत्ययुक्तं तदन्यान्यत्वस्याप्यव्याप्यतया तज्ज्ञानस्य विशेषदर्शनत्वासम्भवादिति पुनः शङ्कते । न चैवमिति । विशेषदर्शनत्वेन प्रत्यक्षसहकारित्वादिति समाधौ विशेषदर्शनत्वेनेत्यस्य व्याप्यदर्शनत्वेनेत्यर्थकतोक्तक्रमेण न सम्भवतीति व्याप्यदर्शनसाधारणविपरीतज्ञानविरोधित्वेनेत्यर्थकतां तस्याह दीधितौ । विशेषदर्शनमिति । व्यावर्त्तकधर्मदर्शनत्वेनेति । ग्राह्यविरोधिधर्मदर्शनत्वेनेत्यर्थः । स्वसमानाधिकरणव्याप्यतावच्छेदकान्तरघटितमेव न व्याप्यतावच्छेदकमित्याशयेनान्यतरत्वत्वस्य व्याप्तिव्याप्यतावच्छेदकत्वं स्वयं व्यवस्थापयति । अत्र चेति । अन्यतरत्वस्य धूमत्वादिरूपत्वे तत्त्वस्यानवच्छेदकत्वेऽपि धूमत्वत्वादिना व्याप्यतया व्याप्तिप्रकारकपक्षधर्मताधीहेतुतावादिनां व्याप्त्यनुमानं निराबाधमित्यपि बोध्यम् । अन्यतरत्वस्य व्याप्त्यनवच्छेदकत्वेऽपि तदवच्छेदेन तद्भ्रमादनुमितिर्भविष्यतीति शङ्कां निराकुरुते । एवञ्चेति ।

ननु गौरवमात्रं न व्याप्त्यवच्छेदकत्वे बाधकं तथा सति सास्नादिना गवादेर्हेतुताविलयप्रसङ्गः किन्तु व्यर्थविशेषणघटितत्वमेव धूमत्वादेश्च प्रत्येकमुभयासंग्राहकत्वात् उभयसंग्रहप्रयोजकस्य धर्मस्य न वैयर्थ्यम् । वस्तुतस्तु अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिज्ञानमेव कारणं अत एवानुमितिजनकतया तन्मतसिद्धज्ञानद्वयकाले धूमत्वदर्शनस्यावच्छेदकदर्शनतया अयं धूमो वह्निव्याप्यो न वेति शङ्काविरोधित्वमप्युपपद्यते गुरोरपि च तादृशावच्छेदकत्वमक्षतमेवेति ।

(चि०) किञ्च वह्निव्याप्यवानयमिति शाब्दज्ञाने व्याप्यत्वज्ञानं कारणमित्यन्यत्रापि तथा । अथ वह्नि-व्याप्यत्वमपि वह्निव्याप्यतावच्छेदकं तथा हि वह्निनि-रूपिता धूमादिप्रत्येकवृत्तिरेव व्याप्तिर्व्याप्तित्वेन स-कलधूमादिवृत्तिव्याप्त्यवच्छेदिका आश्रयभेदेनावच्छे-दकभेदेन च व्याप्तिभेदादिति चेन्न । सकलधूमादिवृ-त्तिव्याप्तौ मानाभावात् यत्र वह्निव्याप्यस्तत्र वह्नि-रिति व्याप्तिबुद्धौ शाब्दव्याप्यत्वबुद्धौ च प्रत्येक-वृत्तिव्याप्त्याश्रयत्वस्यैव विषयत्वात् प्रत्येकवृत्तिव्या-प्तिज्ञानं विना तद्बोधाभावात् ।

(दी०) अस्तु वा गुरुरपि धर्मोऽवच्छेदकस्तथापि शुद्धव्याप्तिप्रकारकज्ञानस्थले व्यभिचारान्न तस्य हेतुत्वमित्याह । किञ्चेति ।वह्नीत्यादि । व्याप्तेर्व्याप्त्यनवच्छेदकत्वादिति भावः । मा-नाभावादिति ।वस्तुतो विशेषव्याप्त्यवच्छिन्ना महाव्याप्तिरतिरि-च्यतां किं तेन ? न हि वस्तुतो व्याप्त्यवच्छेदकप्रकारकं पक्ष-धर्मताज्ञानं हेतुरतिप्रसङ्गात् परन्तु यदवच्छेदेन व्याप्तिर्गृह्यते तत्प्रकारकम् । न च तदानीं व्याप्त्यवच्छेदेन व्याप्तिर्गृह्यते । न च तदग्रहेऽनुमितिरपलपनीया, मानाभावात् कल्पयत्वाविशेषे लघुरूपावच्छिन्नस्यैव नियतपूर्ववर्तितायाःकल्पयितुं युक्तत्वात् ।

(गा०) अयमालोको धूमो वेत्यादिसन्देहदशायां नानुमित्य-नुपपत्तिरित्याशङ्कायाः प्रथमकल्पे सत्वात तदेव 'किञ्चेत्यादिदू-षणान्तरानुसरणे बीजमिति सूचयितुं प्रथमदोषाभावाभ्युपगमं प्रकाशयन् 'किञ्चेत्यादेर्व्याप्यतावच्छेदकप्रकारकज्ञानहेतुत्वासम्भ-वपरतां स्फुटयति । अस्तु वेत्यादिना । एवञ्च मूले 'व्याप्यत्वज्ञान-मित्यस्यावधारणपरतया व्याप्तिप्रकारकपक्षधर्मताज्ञानमेवेत्यर्थः । कारणम् । फलोधायकम्, तथा च व्याप्यतावच्छेदकप्रकारकज्ञानव्य-

वच्छेदात् तद्धेतुतायां व्यभिचार इत्यर्थो लभ्यते व्याप्तेर्व्याप्यत्वावच्छेदकत्वोपगमेनैतद्दोषस्य प्राक् समाहितत्वात् तस्यास्तथात्वमनिराकृत्य प्रथमत एव तद्दोषदानमयुक्तं इत्यत आशयं पूरयति । व्याप्तेरिति । आत्माश्रयेणेत्यादिः, एतच्च स्वरूपसम्बन्धरूपावच्छेदकत्वाभिप्रायेण, तदभिप्रायेणैव सामान्यविशेषव्याप्त्योर्भेदं व्यवस्थाप्य अथेत्यादिमूले तयोरवच्छेद्यावच्छेदकभावशङ्का । मूले सकलधूमादिवृत्तिव्याप्तौ मानाभावादिति । विशेषव्याप्तीनां धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्वादीनां अनुगमकस्य व्याप्तित्वस्य दुर्निर्वचतया तासां व्याप्त्यन्तरावच्छेदकत्वासम्भवादिति भावः ।

ननु व्यभिचारधीविरोधित्वमेव सकलविशेषव्याप्तीनामनुगमकं व्याप्तित्वं वह्निव्याप्यवानयमित्यादिशब्देनापि तादृशव्याप्तित्वेन व्याप्तयः पक्षधर्मांशे प्रकारतया प्रत्याय्यन्ते, एवं साध्याभाववदवृत्तित्वमपि स्वविशिष्टव्यापकताघटितव्याप्तेरवच्छेदकमिति तेन रूपेण यत्र शब्दाद्व्याप्त्यवगतिस्तत्राप्यनुमितिरुपपद्यत एव । एवं अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य स्वसाधारणतया तदनुसरणे न काचिदप्यनुपपत्तिरित्याशङ्क्य व्याप्तेर्व्याप्यतावच्छेदकत्वमभ्युपेत्यापि शाब्दपरामर्शजानुमितौ व्यभिचारमुपपादयति । वस्तुत इति । अतिरिच्यतामित्यस्य स्वसाधारणमनतिरिक्तवृत्तित्वरूपमवच्छेदकत्वमाश्रीयतामिति शेषः । अतिप्रसङ्गात् । धूमत्वावच्छेदेन व्याप्तिज्ञानराहितस्यापि धूमवानयमिति ज्ञानादनुमितिप्रसङ्गात् । गृह्यते । तत्कालीनग्रहविषयः । न च तदानीमिति । यदा वह्निव्याप्यवानयमिति शब्दः श्रूयते इत्यर्थः, गृह्यत इत्यस्य पक्षधर्मताग्रहकाले व्याप्तौ व्याप्यतावच्छेदकत्वग्राहकशब्दाभावादिति शेषः । अनुमितिरपलपनीयेति । अनुमित्यभावः कल्पनीय इत्यर्थः । मानाभावात् । तत्कल्पकाभावात्, उक्तरूपेण कारणताया अप्रसिद्ध्या कारणाभावासिद्धेरिति ।

ननु तत्रापि स्मरणादिरूपतादृशव्याप्तिज्ञानसम्भवात् न व्यभिचारनिश्चय इत्यत आह । कल्पयित्वेति । 'लघुरूपं' व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वं, अयश्च अपि चेत्यादिमूलस्यैवार्थः, इति तत्कल्प एव निर्भरो दर्शितः ।

(दी०) एतेन व्याप्तिग्रहविषयधर्मिमात्रवृत्तिधर्मप्रकारकं पक्षधर्मताज्ञानं हेतुरित्यपास्तम् । सामान्यलक्षणानङ्गीकारे धूमत्वादेरपि तथात्वायोगात् वह्निव्याप्यं सर्वं प्रमेयं धूमवान् पर्वत इति ज्ञानादप्यनुमितिप्रसङ्गाच्च । व्याप्तिसमानाधिकरणत्वेन तादृशधर्मभानोक्तौ च सा धूमव्यक्तिर्वह्निव्याप्येति ज्ञानसहितादुक्तज्ञानात्तत्प्रसङ्गो वह्निव्याप्यवानिति शाब्दज्ञानासंग्रहः ।

(गा०) एतेन । कारणीभूतसकलपक्षधर्मताज्ञानासंग्राहकत्वेनातिप्रसक्तत्वेन च । व्याप्तिग्रहेति । एतादृशश्च धर्मो व्याप्यतावच्छेदकधूमत्वादिरिव व्याप्तिरपीति न शाब्दपरामर्शासंग्रह इति भावः । धूमो वह्निव्याप्य इति निश्चयसहितात् द्रव्यवानिति ज्ञानादनुमितिवारणाय मात्रेति । प्रमेयसामान्यहेतुकवाच्यत्वाद्यनुमितिस्वीकारे स्वव्यापकतद्ग्रहविषयताकत्वमेव तद्विषयमात्रवृत्तित्वं, केवलान्वय्यनुमानानभ्युपगमे तु तद्विषयान्यावृत्तित्वमेव, यादृशरूपेण व्याप्तिग्रहविषयतानियतत्वं तादृशनिष्ठावच्छेदकत्वान्यावच्छेदकत्वानिरूपकत्वं प्रकारतायां निवेश्यं अतो न धूमो वह्निव्याप्य इति ज्ञानदशायां जातित्वादिना धूमत्वादिप्रकारकज्ञानान्नातिप्रसङ्गः । स्वरूपतो धूमत्वादिप्रकारकज्ञानसंग्रहाय तादृशरूपावच्छिन्नत्वमुपेक्षितम् । तथात्वायोगात् । वह्न्यादिव्याप्तिग्रहविषयमात्रवृत्तित्वासम्भवात्, सामान्यप्रत्यासत्तिं विना सकलधूमादीनां व्याप्तिग्रहे भानासम्भवादिति भावः । आदिपदेन सकलधूमादिवृत्तिव्याप्तेरपि परिग्रहः, एतावता धूमत्वादिप्रकारकस्य व्याप्तिप्रकारकस्य च पक्षधर्मताग्रहस्यासंग्रहो दर्शितः ।

अतिप्रसङ्गं दर्शयति । वह्निव्याप्यमिति । धूमत्वे व्याप्तिग्रहविषयतानियतत्वनिर्वाहकस्य व्याप्तिग्रहे सकलवह्निव्याप्यविषयकत्वस्य लाभाय सर्वमिति । एतच्च ज्ञानमनुमित्यादिरूपं, सामान्यप्रत्यासत्तिमनङ्गीकुर्वतां तेषां प्रत्यक्षे सकलवह्निव्याप्यभानासम्भवात् ।

सामान्यप्रत्यासत्त्यभ्युपगमपक्षे वा दूषणमिदं, अन्यथाख्यातिमनङ्गीकुर्वतां सर्वस्मिन् वह्निव्याप्तिविषयकज्ञानासम्भवात् ।

अन्यथाख्यातिस्वीकारे च तादृशान्यथाख्यातिकाले धूमवान् पर्वत इत्यादिज्ञानादनुमितेरिष्टत्वात् । वह्निव्याप्यत्वस्य स्वसमानियत-सर्वत्वधर्मितावच्छेदकतापन्नस्य उद्देश्यतावच्छेदकत्वं सूचयितुं प्रमेयमिति विधेयवाचकपदान्तरानिर्देशः, धूमत्वावच्छेदेन व्याप्तिज्ञानदशायां तज्ज्ञानादनुमितेरिष्टत्वात् धूमत्वांशे व्याप्तेः सामानाधिकरण्यमात्रावगाहितां सूचयितुं धूम इत्यनभिधाय सा धूमव्यक्तिरिति । शाब्दज्ञानासंग्रह इति । वह्निव्याप्यवानित्यादिशब्दस्य व्याप्तौ व्याप्तेरवच्छेदकताया इव सामानाधिकरण्यस्याप्यबोधकत्वादिति भावः ।

(दी०) अत एव व्याप्तिभानांशे प्रकारतया यस्तादृशो धर्म्मो भासते तत्प्रकारकं पक्षधर्मताज्ञानं हेतुः वह्निव्याप्यवानित्यत्र च वह्निव्याप्यत्वमेव तथा, धूमवानित्यादौ च धूमत्वादिकं धूमसमानाधिकरणेत्यादिव्याप्तिज्ञाने तस्यापि प्रकारत्वादिति परास्तम् । धूमसमानाधिकरणवह्निव्याप्यं सर्वं प्रमेयं धूमवानयं प्रमेयत्वव्याप्यं सर्वमभिधेयं समानाधिकरणत्वांश्चायमित्यादिज्ञानादप्यनुमित्यापत्तिः । न च धूमत्वादेरतिरिक्तवृत्तित्वग्रहे स एव प्रतिबन्धकस्तदग्रहे त्वनुमिताविष्टापत्तिरिति वाच्यम् । एवंविधेष्टापत्त्यैव सर्वत्र प्रतीकारे विशेषणानुसरणवैयर्थ्यात् व्यभिचाराग्रहपक्षधर्मताज्ञानयोरेव हेतुत्वस्य सुवचत्वात् ।

(गा०) अत एव । अतिप्रसङ्गस्य दुर्वारत्वादेव । व्याप्तिभानांशे इत्यादेर्व्याप्तिप्रकारतान्तर्गतप्रकारताश्रयो यो व्याप्तिग्रहविषयतानियतो धर्म इत्यर्थः । वह्निव्याप्यं सर्वं प्रमेयं धूमवान् पर्वत इत्युक्तज्ञानवारणाय निरुक्तप्रकारताश्रयत्वं धर्मविशेषणम्, धूमो वह्निव्याप्यः अभाववानयमित्यादिज्ञानवारणाय च व्याप्तिग्रहविषयतानियतत्वं उपात्तम् । तथा । तादृशो धर्मः, व्याप्तिप्रकारतान्तर्गतत्वस्य भेदाभेदसाधारणत्वादिति भावः । 'धूमत्वादिकं' 'तथेत्यनुषङ्गेणान्वयः । धूमसमानाधिकरणेत्यादीति । साध्याभाववदवृत्तित्वरूपव्याप्तिग्रह-

स्थले च ज्ञानद्वयादनुमितिर्मयापि न स्वीक्रियते इति भावः। वह्नि-व्याप्यं सर्वमित्यत्र तदभाववदवृत्तित्वरूपव्याप्तिज्ञानमेव विवक्षितं धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्वादिरूपव्याप्तिभाने धूमत्वा-दिप्रकारकपक्षधर्मताज्ञानादनुमितेरिष्टत्वात्, तथा च वह्नित्वमात्र-स्य साध्यतावच्छेदकत्वे धूमत्वादेर्न व्याप्तिप्रकारतान्तःपातिप्रका-रताश्रयत्वमतो धूमसमानाधिकरणवह्नित्वावच्छिन्नस्य साध्यत्वा-नुधावनम् ।

साध्यतावच्छेदकप्रकारतानन्तःपातित्वेन व्याप्तिप्रकारताविशे-षणे उक्तस्थले दोषाभावादाह। प्रमेयत्वव्याप्यमिति । अत्र चाभिधेय-त्वाद्यवच्छिन्नव्यापकप्रमेयत्वसमानाधिकरणाभिधेयत्वरूपव्याप्तिर-भिप्रेता न तु साध्याभाववदवृत्तित्वविशिष्टसाध्यसामानाधिकरण्य-रूपा साध्याभावस्याप्रसिद्धेर्मीमांसकैरन्यथाख्यात्यनभ्युपगमात् भ्र-मात्मकतादृशव्याप्तिज्ञानमादाय तन्मतेऽतिप्रसङ्गाभावात् न वा स-मानाधिकरणत्वावच्छिन्नव्यापकसाध्यसामानाधिकरण्यरूपा तादृ-शव्यापकताग्रहदशायां(१) समानाधिकरणत्वप्रकारकज्ञानादनुमि-तेस्तेषामिष्टत्वात्। अतिरिक्तवृत्तित्वग्रहे ।व्याप्तिशून्यवृत्तित्वग्रहे। अनु-मिताविति । वह्निव्याप्यं सर्वं प्रमेयं धूमवान् पर्वत इत्यादिज्ञानादित्या-दिः । एवंविधेष्टापत्त्यैवेति । व्याप्तिग्रहविषयधर्मिवृत्तिधर्मप्रकारक-पक्षधर्मताज्ञानत्वेनैवानुमितिहेतुता वह्निव्याप्यो धूमो द्रव्यवान् पर्वत इत्यादौ द्रव्यत्वादावतिरिक्तवृत्तित्वग्रहे स एव प्रतिबन्धकः तदग्र-हेऽनुमिताविष्टापत्तिरित्यपि वक्तुं शक्यतया व्याप्तिग्रहविषयधर्मि-मात्रवृत्तिधर्मप्रकारकत्वादिविशेषणवैयर्थ्यापातादित्यर्थः ।

अत्रेष्टापत्तौ प्रतिबन्ध्यन्तरमाह । व्यभिचाराग्रहेति । एवकारेण व्याप्तिज्ञानहेतुताव्यवच्छेदः । व्याप्तिज्ञानशून्यतादशायां व्यभिचा-राग्रहे तद्देशानुमिताविष्टापत्तिसम्भवात् । यदि च व्यभिचाराव्य-भिचारयोर्द्वयोरेव यत्राग्रहस्तत्रानुमितेरनुभवविरुद्धत्वान्न तत्रेष्टा-पत्तिः सम्भवतीत्युच्यते तदा प्रमेयत्वव्याप्यं सर्वमित्यादिज्ञाना-दप्यनुमितेरनुभवविरुद्धत्वात् प्रकृते ऽपीष्टापत्तिर्न सम्भवती-ति भावः ।

---

(१) तादृशव्याप्तिग्रहदशायामिति पु० पा० ।

(दी०) किञ्च पुरुषान्तरस्य तस्यैव वा कालान्तरे वर्त्तमानं व्याप्तिग्रहमादायातिप्रसङ्गस्य भङ्गाय स्वसमानकालीनस्वसमानाधिकरणव्याप्तिग्रहविषयधर्मिमात्रवृत्तिधर्मप्रकारकं पक्षधर्मताज्ञानं वाच्यं तथा च स्वत्वस्याननुगतत्वात्कारणतावच्छेदकस्य तत्तद्व्यक्तिमात्रपर्यवसायित्वे मिथो व्यभिचारः तत्तत्पक्षधर्मताज्ञानत्वेनैव हेतुत्वसम्भवेऽधिकवैयर्थ्यञ्च ।

(गा०) ननु व्याप्तिप्रकारतानिरूपिता या संसर्गता तन्निरूपिता या विशेष्यवृत्तिविषयता तन्निरूपिता या विषयता तन्निरूपकीभूतो यो व्याप्तिग्रहविषयमात्रवृत्तिधर्मस्तत्प्रकारकपक्षधर्मताज्ञानत्वेन हेतुता वाच्या तादृशधर्मो व्याप्तिः धूमव्यापकवह्निसमानाधिकरणधूमत्वादिरूपव्याप्तौ हेतुतावच्छेदकीभूतधूमत्वादिश्च न तु तद्घटकसामानाधिकरण्यादिकम्, साध्याभाववदवृत्तित्वादिरूपव्याप्तिघटकाभावमादायातिप्रसङ्गभङ्गाय व्याप्तिग्रहविषयमात्रवृत्तित्वोपादानमिति नोक्तापत्तीनामवकाश इत्यतो दूषणान्तरमाह । किञ्चेति । कालान्तर इति । कारणतावच्छेदककोटिप्रविष्टलिङ्गादीनां अतीतत्वदशायामपि अनुमितेरुत्पत्त्या प्रकृते कारणतावच्छेदकविशिष्टप्राक्सत्तायाः कार्यजनने नियामकत्वासम्भवादतिप्रसङ्गो बोध्यः । स्वसमानकालीनेति । स्वक्षणवृत्तीत्यर्थः । स्वपदं फलोपधायकत्वेनाभिमततत्तत्पक्षधर्मताज्ञानव्यक्तिपरम् । वाच्यमिति । हेतुतया स्वीकार्यमित्यर्थः । तादृशपक्षधर्मताज्ञानत्वेनेत्यादिः व्याप्तिज्ञानोत्पत्तिद्वितीयक्षणोत्पन्नपक्षधर्मताज्ञानात् व्याप्तिज्ञाननाशेऽपि अनुमितिरेतन्मते स्वीक्रियते इति बोध्यम् । तत्तत्पक्षधर्मताज्ञानत्वेन हेतुत्वसम्भव इति । फलोपधायकीभूतपक्षधर्मताज्ञाननिष्ठानां तत्तद्व्यक्तित्वानां किञ्चिदविशेषितानामेव हेतुतावच्छेदकत्वसम्भव इत्यर्थः । यथाश्रुते तत्तद्व्यक्तित्वनिवेशस्याऽऽवश्यकत्वे पक्षधर्मताज्ञानत्वनिवेशो प्रयोजनविरहादसङ्गतेः । अधिकवैयर्थ्यञ्चेति । तादृशधर्मप्रकारकत्वादिविशेषणवैयर्थ्यञ्चेत्यर्थः । इदमुपलक्षणम्, तादृशरूपेण हेतुत्वेऽनन्तकार्यकारणभावप्रसङ्गेन महागौरवमपि बोध्यम् ।

(दी०) एतेन गृह्यमाणव्याप्यत्वावच्छेदकताकेत्याद्युपदर्शितप्रकारद्वयमपि प्रत्युक्तं वेदितव्यम् । एवं यद्धर्मावच्छेदेन व्याप्तिज्ञानं तद्धर्मप्रकारकं पक्षधर्मताज्ञानं हेतुरित्यपि परास्तम् । तत्तद्धर्मविश्रान्तमूर्त्तिकत्वेनाप्यननुगतत्वाच्च ।

(गा०) एतेन । उक्तरीत्या कारणतावच्छेदकस्य तत्तद्व्यक्तिमात्रपर्यवसायितापातेन । एवमिति । स्वसमानकालीनत्वस्वसमानाधिकरणत्वयोरन्यतरप्रवेशस्यावश्यकतया अननुगमेनेत्यर्थः । यद्धर्मावच्छेदेनेति । तद्धर्मावच्छिन्नव्याप्तिज्ञानसहिततद्धर्मप्रकारकपक्षधर्मताज्ञानत्वावच्छिन्नमित्यर्थः । परास्तमिति । साहित्यस्य समानकालीनत्वात्मकत्वे स्वसमानाधिकरणत्वस्य सामानाधिकरण्यरूपत्वे स्वसमानकालीनत्वस्य व्याप्तिज्ञानेऽवश्यं निवेशनीयत्वादिति भावः । एकक्षणावच्छिन्नैकात्मवृत्तित्वसम्बन्धेन तद्वत्त्वं यदि तत्साहित्यं तदा नैतादृशाननुगम इत्यतः प्रकारान्तरेणाननुगममाह । तत्तद्धर्मेति । विशिष्य तत्तद्धर्मघटितत्वेनेत्यर्थः । अननुगतत्वादिति । तथा च धूमत्वादिप्रकारकपक्षधर्मताज्ञानस्यालोकत्वाद्यवच्छिन्नलिङ्गकानुमितौ व्यभिचारः तत्तद्धर्मावच्छिन्नलिङ्गकानुमितित्वस्य कार्यतावच्छेदकत्वोपगमेऽपि हेतुतावच्छेदकभेदेन कारणताबाहुल्यमिति भावः ।

यद्यपि हेतुतावच्छेदकघटितव्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानस्यैव हेतुतायाः केवलान्वयिसाधारण्यानुरोधेन वक्तव्यतया तस्य च हेतुतावच्छेदकमनन्तर्भाव्य कारणताया दुष्कल्पत्वतया नैयायिकमतेऽपि हेतुतावच्छेदकभेदेन परामर्शकारणताभेद आवश्यकः व्याप्यतावच्छेदकानवगाहिशाब्दपरामर्शादनुमित्यनुत्पादश्च समानः, तथाऽपि निरुक्तधर्मापेक्षया व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वस्य लघुतया तेन रूपेण कारणताकल्पनमेवोचितमित्यत्र तात्पर्यम् ।

(चि०) अपि च यत्र धूमत्वव्याप्त्योर्वैशिष्ट्यं प्रथममेव प्रत्यक्षेण युगपत्पक्षधर्मे भासते तत्र लाघ-

वात् व्याप्यत्वज्ञानत्वमेव कारणतावच्छेदकम् । न चैवमतिरिक्तविशिष्टज्ञानकारणत्वे गौरवं दोषाय, सप्रमाणकत्वात्, कारणताग्रहदशायां फलमुखगौरवस्य सिद्ध्यसिद्धिभ्यामदोषत्वात् ।

(दी०) यत्रेच्छा तत्साधनताज्ञानस्येच्छाहेतुत्वेऽपि समानमिति चेत्? सत्यम्, प्रतिवक्ष्यते हि तत्र लघुगुरुरूपाभ्यां युगपदुपस्थितौ लघुरूपावच्छेदेनैव कारणत्वं कल्प्यते लाघवात् नियमादेरेकतररूपावच्छेदेनाप्यक्लृप्तत्वात् इत्याशयवानाह । अपि चेति । ननु स्वसमानाधिकरणाभावेत्यादिव्याप्तौ स्वपदार्थस्यैकस्याभावेन धूमादिकमेव विशिष्य उपादेयं तत्र च धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नवह्निसमानाधिकरणेन्धनवानयमिति ज्ञानादप्यनुमितिप्रसङ्गेन तादृशवह्निसमानाधिकरणधूमत्वं व्याप्तिस्तत्प्रकारकमेव च पक्षधर्मताज्ञानमननुगतमपि हेतुरिति वक्तव्यं तथा च यद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके गृह्यते तत्प्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वम् अयं वह्निव्याप्यवान् धूमो वह्निव्याप्योऽयं धूमवान्, वह्निर्धूमव्यापकोऽयं धूमवानित्यादिसकलवित्तिव्यापकत्वात् न तूपदर्शितव्याप्तिप्रकारकज्ञानत्वेनाव्यापकत्वात् ।

(गा०) ननु यत्त्वतत्त्वाननुगमस्य दोषत्वे इष्टत्वेन फलसाधनताज्ञानस्य उपायेच्छाद्यहेतुत्वेन यत्रेच्छा तत्साधनताज्ञानं हेतुरितीष्टसाधनताज्ञानहेतुतापरिष्कारो मणिकृतां विरुध्येत इत्याशङ्कते । यत्रेच्छेति । प्रतिवक्ष्यत इति । तत्र गत्यन्तरविरहेण सुखदुःखाभावत्वादिप्रकारकफलगोचरेच्छायास्तदवच्छिन्नसाधनताज्ञानस्य चाननुगतेनापि तादृशेच्छात्वेन तादृशज्ञानत्वेन च हेतुता स्वीक्रियते कार्यतावच्छेदककोटौ चाव्यवहितोत्तरत्वसम्बन्धेन तत्तत्कारण-

तावच्छेदकावच्छिन्नवैशिष्ट्यं निवेश्य व्यभिचारो वारणीयः, इच्छागता जातिविशेषा एव वा तत्तत्फलेच्छाजन्यतावच्छेदकतया स्वीक्रियन्ते नानाफलगोचरेच्छास्थले च नानैवेच्छाव्यक्तयः स्वीक्रियन्ते प्रयत्नवदिच्छायौगपद्यस्वीकारेऽपि क्षतिविरहात् इति भावः।

ननु पर्वतवृत्तिधूमत्ववह्निव्याप्त्योर्वैशिष्ट्यं यत्र युगपदेव पक्षधर्मे भासते तत्र विशिष्टपरामर्शत्वावच्छिन्नस्यैव व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वावच्छिन्नस्याप्युपस्थितिरस्ति तथा च तेन रूपेणैव किन्न हेतुत्वमुपेयते, एतन्मतेऽवच्छेदकलाघववत् तन्मतेऽपि नियमांशाकल्पनेन लाघवसत्त्वात् इत्याशङ्कां परिजिहीर्षुः अपिचेत्यादिमूलाशयमाह। लघ्विति। नियमादेरिति। आदिना अनन्यथासिद्धत्वपरिग्रहः। एकतररूपेति। उक्तशाब्दपरामर्शस्थले यद्धर्मावच्छेदेन व्याप्तिज्ञानं तद्धर्मप्रकारकपक्षधर्मताज्ञानस्य नैयायिकमतासिद्धत्वादिति भावः। हेतुतावच्छेदकभेदेन कारणताभेदं नैयायिकमतेऽभ्याशङ्क्य मीमांसकमते लाघवमाशङ्कते। नन्वित्यादिना। विशिष्य। धूमत्वादिना।

ननु धूमत्वादीनां विशिष्य व्याप्तिघटकत्वेऽपि किञ्चिद्धर्मावच्छिन्नविषयतात्वेनैव सामान्यतस्तद्विषयता कारणतावच्छेदककोटौ निवेशनीयेति न कारणतावच्छेदकाननुगम इत्यत आह। तत्रेति। धूमादिविषयतानां विशिष्य कारणतावच्छेदकेऽनिवेशो चेति शेषः। धूमादिविषयतानां विशिष्य निवेशेऽपि व्याप्तिशरीरे सामानाधिकरण्यानुयोगितावच्छेदकतया धूमत्वादीनामनिवेशो उक्तज्ञानादनुमितिप्रसङ्गो दुर्वार एवेति तत्र धूमत्वादिकं तथा निवेश्य विशिष्य तत्प्रकारकत्वेन हेतुतां दर्शयति। तादृशेति। यद्धर्मविशिष्टेत्यादि। तद्धर्मावच्छिन्नलिङ्गकानुमितौ तद्धर्मविशिष्टव्यापकतावच्छेदकताविशिष्टसाध्यतावच्छेदकविषयताशालिग्रहविशिष्टतद्धर्मप्रकारकपक्षधर्मताज्ञानत्वेनैवेत्यर्थः। सकलवित्तिव्यापकत्वादिति। तथा च तद्धर्मावच्छिन्नस्य नियतपूर्ववर्त्तित्वमुभयमतासिद्धमेवेति एतन्मते कल्पनालाघवमक्षुण्णमेव, व्याप्यतावच्छेदकानवगाहिशाब्दज्ञानादनुमितिश्च नैयायिकानामप्यसिद्धैवानुमितिप्रयोजिकाया उक्तव्याप्तेर्व्याप्यतावच्छेदकघटितत्वादित्यभिप्रायः।

(दी०) किञ्चान्यथाख्यातिवादिभिर्धूमादिसमानाधिकरणात्यन्ताभावाप्रतियोगिगगनसमानाधिकरणधूमादिमानयमिति ज्ञानादनुमित्यङ्गीकारादखण्डव्याप्तेश्चाप्रसिद्धतया प्रकारत्वासम्भवात् साध्ये साधनव्यापकत्वग्राहकमधिकरणादौ च साध्यीयत्वाद्यवगाहि पक्षे च तादृशसाधनवत्त्वावगाहि यज्ज्ञानं तत्त्वेन कारणत्वं वाच्यम् तथा च लाघवात्तादृशव्यापकत्वपक्षधर्मत्वावगाहितयोरेव कारणतावच्छेदकत्वमवृत्तिहेत्वनुरोधेन व्यापकत्वस्यापि खण्डशो निरुक्तिस्तेषां परमातिरिच्यते, यथा च सामानाधिकरण्यज्ञानस्य हेतुत्वेऽपि न क्षतिस्तथा वक्ष्यते इति चेन्न । गृह्यमाणव्याप्यतावच्छेदकताकेत्यादिप्रकारद्वयोक्तदूषणग्रस्तत्वात् वह्न्यत्यन्ताभाववदवृत्तिधर्मवानयमित्यादिज्ञानादप्यनुमित्युदयाच्च व्यभिचारज्ञानाविरोधिज्ञानविषयत्वेनैव व्याप्तीनामनुगमात् ।

(गा०)अत्र च कारणतावच्छेदकावच्छिन्नाव्यवहितोत्तरत्वघटितधर्मस्यैव जन्यतावच्छेदकत्वोपगमात् , तदवच्छिन्ननियतपूर्ववर्त्तिताविशिष्टपरामर्शत्वावच्छेदेनाप्युभयवादिसिद्धैव ज्ञानद्वयस्थलेऽतिरिक्तविशिष्टपरामर्शकल्पनागौरवस्य फलमुखत्वेनादोषत्वं मूलकृतैव वाच्यमित्याशङ्क्य मीमांसकमते कारणतावच्छेदकलाघवप्रणालीमाह। किञ्चेति । अखण्डव्याप्तेरिति । उक्तविशिष्टपदार्थरूपाया व्याप्तेरित्यर्थः।प्रकारत्वासम्भवादिति।तथा च विशिष्टव्याप्तिप्रकारकत्वेन कारणतापि न सम्भवतीति भावः । साध्ये । साध्यतावच्छेदके । व्यापकत्वग्राहकम् । व्यापकतावच्छेदकत्वावगाहि । तादृशव्यापकत्वपक्षधर्मत्वावगाहितयोरेवेति । हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वविशिष्टसाध्यतावच्छेदकरूपव्यापकत्वावगाहित्वहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टपक्षावगाहित्वयोरेवेत्यर्थः । एवकारेणाधिकरणाद्यंशे साध्याद्यवगाहित्वव्यवच्छेदः, कारणतावच्छेदकत्वम् । उचितमिति शेषः ।

यद्यपि वह्न्यादिसाध्यकधूमादिहेतुकस्थलेऽखण्डव्याप्तेः प्रसिद्ध्या व्याप्तिविशिष्टहेतुमत्ताज्ञानत्वेन कारणत्वं सुवचमेव साध्यसाधनभेदेन कारणभेदस्यावश्यकत्वात् । न चैवमपि साध्यसामानाधिकरण्यांशस्य व्याप्तिघटकतया कारणतावच्छेदककोटौ निवेशाधिक्येन गौरवं दुष्परिहरमेवेति वाच्यम् । भवन्मतेऽपि एकक्षणावच्छिन्नसामानाधिकरण्यसम्बन्धेन एकज्ञानवैशिष्ट्यस्यापरज्ञानांशे निवेशाधिक्यात् अन्यथा अखण्डव्याप्तिप्रकारकत्वेन हेतुत्वेऽपि गौरवात् तत्प्रतिक्षेपस्य अनुचितत्वात् । तथापि अन्यथाख्यातिवादिनां वह्न्याद्यधिकरणत्वादिना तदनधिकरणादिमात्रविषयकज्ञानादप्यनुमित्युत्पत्त्या अखण्डव्याप्तिविषयकत्वेन वह्न्यादिसाध्यकानुमितावपि न हेतुता सम्भवतीत्यभिप्रायः । व्यापकत्वस्यापीति । व्यापकतावच्छेदकत्वावगाहित्वस्यापीत्यर्थः । खण्डशो निरुक्तिरिति । अधिकरणांशे साधनावगाहि आधेयत्वांशेऽधिकरणीयत्वावगाहीत्यादिक्रमेण कारणतावच्छेदकगर्भे निवेशनमित्यर्थः । अखण्डव्यापकत्वाप्रसिद्ध्या तदवगाहित्वस्य यथाश्रुतस्य निवेशासम्भवादिति भावः । तेषाम् । अन्यथाख्यातिवादिनां नैयायिकानामित्यर्थः । मीमांसकानां तत्र व्यापकताज्ञानासम्भवेनानुमितेरसिद्धेरिति भावः ।

न च केवलाभावत्वादिना साधनसमानाधिकरणाभावप्रतियोगितानवच्छेकत्वादिज्ञानादनुमितिवारणायाधिकरणांशे धूमादिप्रकारकमाधेयत्वांशेऽधिकरणप्रकारकमित्यादिक्रमेण व्यापकताज्ञाननिवेशनं मीमांसकानामप्यावश्यकमिति वाच्यम् । हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकविशिष्टपदार्थस्य विषयतासम्बन्धेन कारणतावच्छेदकत्वोपगमात् विशेष्यविशेषणभावापन्नतावत्पदार्थानवगाहिज्ञाने विशिष्टनिरूपितविषयताविरहेण विषयतासम्बन्धेन तादृशविशिष्टवत्त्वाभावादुक्तातिप्रसङ्गासङ्गतेः, यादृशविशिष्टपदार्थस्य कारणतावच्छेदकत्वं तादृशविशिष्टाधिकरणस्यैव कार्योत्पादकत्वात् ।

नन्वत्र तन्मते साध्यसामानाधिकरण्यज्ञानस्यानुमित्यहेतुतया विरोधस्य हेत्वाभासतानुपपत्तिः अनुमितिजनकज्ञानाविरोधित्वादित्यत आह । यथा चेति । लक्ष्यत इति । व्यापकतापरामर्शविचार इति शेषः । गृह्यमाणेति । व्यापकताज्ञानविशिष्टपक्षधर्मताज्ञानत्वेन

पक्षधर्मताज्ञानविशिष्टव्यापकताज्ञानत्वेन वा हेतुत्वम् इत्यत्र विनिगमनाविरहरूपदूषणग्रस्तत्वादित्यर्थः ।

नन्वनुमितिं प्रति तद्धर्मावच्छिन्ननिरूपितव्यापकताज्ञानत्वेन तद्धर्मावच्छिन्नहेतुमत्पक्षज्ञानत्वेन च कारणता स्वीक्रियत दण्डचक्रादिवत् परस्परसहकारेण फलजननान्नातिप्रसङ्गः । न च विशिष्टपरामर्शत्वेनैककारणत्वकल्पनापेक्षया कारणत्वद्वयकल्पने गौरवमिति वाच्यम् । विशिष्टपरामर्शत्वेन हेतुतामते कारणतावच्छेदककोटिप्रविष्टस्याधिकरणाद्यंशे साध्याद्यवगाहित्वतदंशीयाप्रामाण्यज्ञानविशेषानास्कन्दितत्वरूपाधिकविशेषणस्य तथाविधविशेषणान्तरैः समं मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण कारणताबाहुल्यस्य दुर्वारत्वादित्यतो दूषणान्तरमाह । वह्न्यत्यन्ताभाववदवृत्तीति । अनुमित्युदयादिति । तथा च तदसंग्राहकतया नोक्तरूपेण हेतुतासम्भव इति भावः ।

ननु तादृशज्ञानान्न जायत एवानुमितिर्नैयायिकमतेऽपि केवलान्वयिसाधारण्यानुरोधेन व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानस्यैव हेतुताया वक्तव्यत्वात् तत्रानुमित्यनुत्पादस्य तुल्यत्वादित्याशङ्कां परिहरति । व्यभिचारेति । अन्वयव्यभिचारज्ञानप्रतिबन्धकतावच्छेदकत्वेन नानाविधव्याप्तिप्रकारता अनुगमय्य कारणतावच्छेदकगर्भे प्रवेशनीया इत्यर्थः । तथा चास्माकं तत्रानुमितिर्भवत्येव इति भावः । इदन्त्वापाततः, तन्मतेऽपि तद्धर्मावच्छिन्नविशेष्यकव्यभिचारज्ञानप्रतिबन्धकत्वेन व्यापकताज्ञानस्य हेतुताया वक्तुं शक्यतया साध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानस्य संग्रहसम्भवात् तादृशव्याप्त्यंशे निर्धर्मितावच्छेदकज्ञानन्तु नैयायिकानामपि दुःसंग्रहं तादृशज्ञानीयव्याप्तिप्रकारतायां व्यभिचारज्ञानप्रतिबन्धकतावच्छेदकताविरहात् तादृशप्रतिबन्धतावच्छेदकप्रकारितानिरूपकधर्मप्रकारतात्वेन व्याप्तिप्रकारितायाः कारणतावच्छेदकत्वे प्रमेयत्वादिना व्याप्तिप्रकारताकज्ञानादप्यनुमितिप्रसङ्गः । एवं व्यापकताज्ञानस्य साध्याभाववद्वृत्तित्वरूपव्यभिचारज्ञानं प्रति साध्याभाववदवृत्तित्वज्ञानस्य साधनव्यापकताज्ञानं प्रति विरोधित्वे मानाभावादनुगम एवासम्भवः । साध्यसामानाधिकरण्यविषयताया व्यापकताग्रहनिष्ठप्रतिबन्धकतावच्छेदककोटावनिवेशेन व्यापकसामानाधिकरण्यरूपव्याप्तिप्रकारि-

ताया व्यभिचारज्ञानप्रतिबन्धकतावच्छेदकत्वञ्च दुर्घटम्। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वानिवेशोऽपि च धूमव्यापकवह्निसमानाधिकरणेन्धनकालीनधूमवान् पर्वत इत्यादिज्ञानादनुमित्यापत्तेः।

यत्तु व्यापकत्वज्ञानं व्यापकत्वनिरूपकतावच्छेदकधर्मावच्छिन्नविशेष्यकव्यभिचारज्ञानं प्रत्येव प्रतिबन्धकं तत्प्रतिबन्धकतया च धूमादिव्यापकसाध्यसमानाधिकरणवृत्तिधूमत्वादिरूपव्याप्तिज्ञानधर्मितावच्छेदकधर्मान्तरावच्छिन्नविशेष्यताकव्यभिचारज्ञानस्य तादृशव्याप्तिज्ञानदशायां दुर्वारतया समानधर्मितावच्छेदकत्वप्रत्यासत्त्या व्यभिचारधियं प्रति तादृशव्याप्तिप्रकारकज्ञानत्वेन पृथक् प्रतिबन्धकत्वं कल्प्यते इति तादृशव्याप्तिप्रकारतायाः साध्याभाववदवृत्तित्वरूपव्याप्तिप्रकारतायाश्च ,व्यभिचारधीप्रतिबन्धकतावच्छेदकप्रकारतात्वेनानुगमय्यानुमितिकारणतावच्छेदकत्वं सम्भवति एवञ्च व्याप्त्यंशे निर्धर्मितावच्छेदकताकज्ञानीयप्रकारताया अपि तादृशरूपेण सङ्ग्रहः सम्भवति, धर्मितावच्छेदकतायाः प्रत्यासत्तित्वे धर्मितावच्छेदकतानिरूपकत्वस्य व्याप्तिप्रकारतायामनिवेशादिति। तदपि न सम्यक्। धूमादिव्यापकसाध्यसमानाधिकरणवृत्तिधूमत्वादिज्ञानदशायां तद्विशेष्यतावच्छेदकावच्छिन्ने साध्याभाववदवृत्तित्वज्ञानोपगमे क्षतिविरहादिति।

वस्तुतस्तु यदि ज्ञानद्वयहेतुतावादिना व्यापकताधीर्हेतुरुपेयते तदा व्यापकत्वमपेक्ष्यापि लघुशरीरा साध्याभाववदवृत्तित्वरूपा व्याप्तिरेवानुमितिप्रयोजिका न्यायमते स्वीकार्या तत्प्रकारकपक्षधर्मताज्ञानत्वेन हेतुतावच्छेदकधर्मानानिवेश्यैव हेतुतोपगन्तव्या तथा च हेतुतावच्छेदकभेदेन तेषां न कारणताभेदः, ज्ञानद्वयहेतुतावादिना तादृशव्याप्तेरनुमितिप्रयोजकत्वोपगमेऽपि साध्यव्याप्यो धूमः आलोकवान् पर्वत इत्यादिज्ञानद्वयादनुमितिप्रसङ्गवारणाय हेतुतावच्छेदकानां विशिष्य निवेशनीयतया तद्भेदेन कारणताबाहुल्यमिति विशिष्टपरामर्शत्वेन हेतुत्वमेव सम्यक्।

यदि च केवलान्वय्यनुमानं नैयायिकानामनुपेक्षणीयमिति व्यापकसामानाधिकरण्यज्ञानमप्यनुमितिकारणं वाच्यमित्युच्यते तदा केवलान्वय्यनुमानपदार्पणभीरुभिर्मीमांसकैः कथं तादृशव्या-

त्तिमुपेक्ष्य व्यापकताया लाघवेन तज्ज्ञानपक्षधर्मताज्ञानयोः पृथक्कारणत्वं व्यवस्थापयिष्यते इत्यादिरीत्या परमतं निराकार्यम्। अधिकमन्यत्रानुसन्धेयम् ।

(दी०)नन्वत्र कारणे कार्यमेव प्रमाणं तच्च कार्यकारणभावग्रहे सति स्यात् स एव तु न सम्भवति गौरवज्ञानेन प्रतिबन्धादित्यत आह । कारणताग्रहेति । कारणतानिर्णयं विना तत्फलस्य धर्मान्तरानिर्णयस्याभावेन तद्घटितगौरवस्यानिर्णयादित्यर्थः । सम्भाव्यते तावदिदं धर्मान्तरकल्पनं विना कारणत्वस्यैवाशक्यनिर्वाहत्वादिति चेत् ? सम्भाव्यतां न तु तत् प्रतिबन्धकम्, सामान्यतः कार्यकारणभावग्रहस्य प्रायशो विलयप्रसङ्गात् । तत्र तत्र क्लृप्तानियतपूर्ववर्त्तितावच्छेदकरूपान्तरविरहेणागत्या गौरवमप्यास्थीयते इति चेदिहापि तद्विरहस्यासकृदावेदितत्वादिति कृतं पल्लवितेनेति ।

(गा०) विशिष्टपरामर्शरूपधर्मिणः सप्रमाणकत्वात् न तत्कल्पनं गौरवायेति यदुक्तं सप्रमाणकत्वादिति मूले तत्राशङ्क्य युक्त्यन्तरमवतारयति । नन्विति । तच्च । कार्यस्य प्रमाणत्वञ्च । कार्यकारणभावग्रहे सतीति । अन्यथानुकूलतर्कानवतारेण व्यभिचारशङ्कया स क्षणो विशिष्टपरामर्शवान् अव्यवहितपूर्वत्वसम्बन्धेनानुमितिमत्त्वादिति रीत्या अनुमित्या ज्ञानद्वयस्थले विशिष्टपरामर्शानुमानासम्भवादिति भावः । तत्फलस्य । कारणतानिर्णयाधीनस्य । तद्घटितेति । धर्मान्तरघटितेत्यर्थः । विशिष्टपरामर्शत्वावच्छेदेन कारणताग्रहे विशिष्टपरामर्शत्वधर्मिकगौरवज्ञानं विरोधि तच्च गौरवं प्रमाणान्तराप्रसिद्धतत्तदनुमित्यव्यवहितपूर्वकालीनस्वाश्रयकत्वादन्यत् दुर्वचमेवेति गौरवस्य तादृशधर्मिघटितत्वमित्यभिप्रायः(१) । गौरवनिर्णयासम्भवेऽपि गौरवसन्देहेन प्रतिबन्धात् न कारणताग्रहः सम्भवतीति आशङ्कते। सम्भाव्यत इति । सन्दिह्यत इत्यर्थः। इदम्।

(१) तादृशधर्म्मान्तरघटितत्वमित्यभिप्राय इति पु० पा० ।

गौरवम् । संशयप्रयोजकमाह । धर्म्यन्तरेति । अशक्यनिर्वाहत्वादिति । तथा च कारणतासंशयात्तदुपपादकधर्मिणोऽपि संशयो भविष्यति, तत्संशयाहितगौरवसंशयेन प्रतिबन्धाच्च न कारणतानिर्णयः सम्भवतीति भावः । तत् । सम्भावनम् । सामान्यतः । घटत्वदण्डत्वादिसामान्यरूपेण । कार्यकारणभावग्रहस्येति । तन्निर्णयस्येत्यर्थः । प्रायशो विलयप्रसङ्गादिति । यत्र दण्डादिरूपकारणं कार्योन्नेयं तत्स्थलीयधर्मिघटितगौरवसंशयेन प्रतिबन्धसम्भवादिति भावः । यत्र च कार्याव्यवहितपूर्वकाले कारणतावच्छेदकावच्छिन्नसत्त्वं प्रमाणान्तरसिद्धं तत्र तादृशगौरवाभावात् प्रायश इत्युक्तम् । तत्र तत्रेति । घटत्वदण्डत्वादिना कार्यकारणभावस्थल इत्यर्थः । गौरवमप्यास्थीयते । गौरवसन्देहोऽविरोधितया स्वीक्रियते ।

(चि०) न चासन्निकृष्टे धूमे तदभावः, भवन्मतानुमितिहेतुव्याप्तिस्मरणधूमत्वज्ञानसहितेन मनसा तदुत्पादात्, यथा परमाणुर्निरवयवद्रव्यं नित्यपरिमाणवत्त्वात् आकाशवदित्यादौ प्रत्येकानुमानोपनीतातीन्द्रियसाध्यसाधनयोराकाशवृत्तितया स्मरणे व्यभिचाराज्ञाने मनसा व्याप्त्यनुभवः, अनुमानयोः प्रत्येकतदुभयसहचाराविषयत्वेन व्याप्त्यग्राहकत्वात् । न चातीन्द्रियव्याप्यत्वमतीन्द्रियेऽनुमेयम् । तत्रापि व्याप्तिग्राहकाभावात् । न च तदुपनयसहितस्य मनसो बहिरर्थप्रमाहेतुत्वे उपनयस्य प्रमाणान्तरत्वम्, इन्द्रियादेः सन्निकर्षवदुपनयस्य नियतव्यापाराभावेन प्रमायामकरणत्वात् सहकारिता च तदभावेऽपि भवति बहिरिन्द्रियलिङ्गसादृश्यादिव्यापारं विनापि चिन्तोपनीतपदार्थानां बाधकानवतारे मनसा संसर्गानुभवस्य सकलजनसिद्धत्वात् कथमन्यथा कविकाव्यादिकामिति ।

(दी०) व्यभिचारनिर्णयेन कारणत्वग्रहासम्भवं निरस्यति । न चेति । अनुमानयोरिति । अनुमितैकसाध्यविशिष्टे साध्यान्तरानुमित्या सहचारग्रहोपगमेऽपि नियमांशग्रहासम्भवादिति भावः । नियतव्यापारेति । एकसम्बन्धिज्ञानाधीनसम्बन्ध्यन्तरस्मरणादितः क्वचिद्विशिष्टज्ञानोत्पत्तावपि नियतत्वेन न तस्य व्यापारत्वं, यं जनयित्वैव यस्य यज्जनकत्वं तस्यैव तत्र तद्व्यापारत्वादित्यर्थः । वस्तुतस्तु तदुपनयव्यक्त्यादेस्तत्प्रमाव्यक्तिं प्रति कारणत्वेऽपि न क्षतिः प्रमावैजात्यस्यैवात्र प्रमाणान्तरनिमित्तत्वात् ।

(गा०) विशिष्टपरामर्शत्वेन हेतुत्वसिद्धये न चेत्यादिना असन्निकृष्टधूमादौ विशिष्टपरामर्शासम्भवशङ्कानिराकरणस्य(१) तत्सिद्ध्युपयोगितामाविष्करोति । (२)व्यभिचारनिर्णयेनेति । सति लाघवे व्यभिचारसंशयस्याकिञ्चित्करत्वान्निर्णयोपादानम् ।

ननु निरवयवद्रव्यत्वानित्यपरिमाणयोरेकतरं दृष्टान्ते प्रसाध्य तद्विशिष्टेऽपरानुमित्या तदुभयसामानाधिकरण्यावगाहनं सुघटमेव, अनुमितेः पक्षतावच्छेदकसामानाधिकरण्यावगाहित्वस्य नियमादित्यनुमानयोरित्यादिमूलासङ्गतिरित्यत आह । अनुमितैकेति । उपगमेऽपीत्यनेन व्याप्तिप्रकारकधियोऽनुमितिहेतुतया संसर्गमर्यादया तादृशसामानाधिकरण्यावगाहिग्रहस्यानुमित्यनुपयोगित्वं सूचितम् ।

एतेन पक्षतावच्छेदकसाध्ययोरवच्छेद्यावच्छेदकभावस्यानुमितौ संसर्गतया भानोपगमेऽपि न निर्वाहः, व्यापाराभावेन उपना-

---

(१)विशिष्टपरामर्शाभावशङ्काया निराकरणस्येति पु० पा० ।

(२) विशिष्टपरामर्शत्वेन हेतुतामते लाघवेन व्यवस्थापिताया मूलोपदर्शिताया असन्निकृष्टधूमादौ विशिष्टपरामर्शाभावशङ्काया अकिञ्चित्करत्वं परिजिहीर्षुराहेति पु० पा० ।

थकज्ञाने प्रमाणत्वतद्व्यवहारयोर्विरहेऽपि उक्तापादकसत्त्वाद्यविरोधाद्यभिचारेण व्याप्त्यसिद्धिरित्याशयेन पूर्वग्रन्थोपदर्शितापत्तिमुद्धरति मूले नचैवमित्यादिना । नियतव्यापाराभावेनेति मूलमसङ्गतं नियतव्यापारत्वपर्यन्तस्य करणलक्षणेऽप्रवेशादतो व्यापाराभाव एवात्र विवक्षितः । व्यापारत्वन्तु नियतत्वनिर्वाह्यमित्यान्तरालिकस्य कुत्रचित्सम्भवेऽपि न तस्योपनीतप्रमात्वावच्छिन्ने उपनयेन जननीये व्यापारतेत्येतत्सूचनाय मूले नियतपदमिति सूचयितुं व्याचष्टे । एकसम्बन्धीति । हस्त्यादिज्ञानतज्जन्यहस्तिपकस्मरणाभ्यां हस्तिपकादिविशिष्टहस्त्यादिविषयकोपनीतज्ञानजननेऽपीत्यर्थः। तस्य मध्यवर्त्तिनः स्मरणस्य अनियतत्वेऽपि कथं न व्यापारतेत्यत आह । यमिति । यं यद्रूपावच्छिन्नम् । यस्य । यद्रूपावच्छिन्नस्य । यज्जनकत्वम् । यद्रूपावच्छिन्नजनकत्वम् । तस्यैव । तद्रूपावच्छिन्नस्यैव । तद्व्यापारत्वात् । तद्रूपावच्छिन्नजनने तद्रूपावच्छिन्नव्यापारत्वात् । एतावतापि तत्तदुपनयव्यक्तेस्तत्तदुपनीतभानव्यक्तित्वावच्छिन्नजनने तन्नियततत्तत्स्मरणादिव्यक्तिव्यापारकत्वं दुर्वारमेवेत्यालोच्योपनयस्य प्रमाकरणत्वमभ्युपेत्य प्रमाणान्तरत्वं निराकरोति । वस्तुतस्त्विति । न क्षतिरिति । प्रत्यक्षप्रमाण एव तदन्तर्भावेण प्रमाणचातुर्विध्याव्याघातादिति भावः ।

नन्विन्द्रियात्मकप्रत्यक्षप्रमाणे तदनन्तर्भावात् प्रमाणान्तरत्वं तस्य दुर्वारमेवेत्यत आह । प्रमावैजात्यस्यैवेति । एवकारेण प्रमाकरणतावच्छेदकभेदव्यवच्छेदः । प्रमाणान्तरत्वनिमित्तत्वात् । विभिन्नप्रमाणव्यवहारप्रयोजकत्वात् ।

(दी०)न चात्र(१) प्रमावैजात्यम् , अनुपलम्भबाधितत्वात् मानाभावाच्च, उपनयस्य च विशिष्टज्ञाने विशेषणज्ञानत्वेन प्रत्यक्षे च सन्निकर्षविधयोपयोगितया जात्यव्यवस्थापकत्वात् । अत एव बाह्याभ्यन्तरप्रत्यभिज्ञासादृश्याभावादिप्रत्यक्षाणां तत्तात्प्रतियोग्यादिविषयत्वमन्यथा जातिसङ्करप्रसङ्गात्, ज्ञानद्वयकल्पने

[१] न चात्रापीति पाठान्तरं तत्तु न भट्टाचार्यसम्मतमिति अत्र प्रमावैजात्यमितीति पाठधारणेनानुमितम् ।

च स्थैर्यमात्रमुच्छिद्येत, व्यवस्थापितश्च विशिष्टज्ञानस्य व्यवहारहेतुत्वम् । न च प्रमाणान्तरासहकृतोपनयजन्यतावच्छेदकतया वैजात्यसिद्धिः, इतरासहकृतत्वेनाजनकत्वात् असिद्धेश्च, उपनयात्मकसन्निकर्षवशेन मनसा प्रत्यक्षजननस्यैवोपगमात् ।

(गा०) ननु उपनयहेतुतावादिनां तज्जन्यज्ञाने तज्जन्यतावच्छेदकधर्मस्वीकार आवश्यकः स च लाघवाज्जातिविशेषरूप एवेति प्रमावैजात्यं दुर्वारमित्यत आह । न चेति । अत्र प्रमावैजात्यमिति । उपनीतज्ञाने प्रत्यक्षव्यावृत्ता जातिरित्यर्थः । सम्भवतीति शेषः । युक्तिसत्त्वे योग्यायामपि व्यक्तौ व्यञ्जकविरहेण उपपद्यमानो जात्यनुपलम्भो न जातिबाधकः, अन्यथा संयोगादौ क्रियादिजन्यतावच्छेदकजातेरपि विलयप्रसङ्गादित्याशङ्क्य उपनयस्य जात्यन्तराव्यवस्थापकत्वं व्यवस्थापयन् युक्त्यभावमेव बाधकं दर्शयति । मानाभावादित्यादिना । विशेषणज्ञानत्वेति । उपयोगितयेत्यग्रिमेणान्वयः । तथा च विशिष्टज्ञानत्वं तज्जन्यतावच्छेदकं न तु जात्यन्तरमिति भावः । उपनेयविशेष्यकमानसानुरोधेन कल्प्यकारणत्वान्तरनिरूपितकार्यतावच्छेदकतया जात्यन्तरसिद्धेरावश्यकतेत्याशङ्क्याह । सन्निकर्षविधयेति । तथा च प्रत्यक्षत्वमेतज्जन्यतावच्छेदकमिति भावः ।

ननु संयोगज्ञानादिसाधारणं सन्निकर्षत्वमनुगतानातिप्रसक्तं दुर्वचमिति विशिष्यैव हेतुता वाच्या तथा च ज्ञानजन्यतावच्छेदकं यदि प्रत्यक्षत्वमात्रमुच्यते तदा लौकिकप्रत्यक्षे व्यभिचार इति संयोगाद्यजन्यप्रत्यक्षत्वमेव तथा वाच्यम् एवञ्च संयोगाद्यजन्यत्वानिवेशप्रयुक्तलाघवेन वैजात्यसिद्धिर्दुर्वारैवेत्यत आह । अत एवेति । उपनयस्य जातिविशेषावच्छिन्नाजनकत्वादेवेत्यर्थः । बाह्यप्रत्यभिज्ञा । स एवायं चैत्र इत्यादिका । आभ्यन्तरप्रत्यभिज्ञा । स एवाहमित्यादिरूपा । आदिपदाभ्यां ज्ञानादिविषयादिपरिग्रहः, यथायोगमन्वयः । अन्यथा । उपनयस्य जातिविशेषावच्छिन्नजनकत्वे । जातिसङ्करेति । किञ्चिद्विषये चक्षुःसंयोगादिजन्यतया तत्र चाक्षुषत्वादेरेवावश्यकत्वात्तेन च समं उपनयजन्यतावच्छेदकजातेर्व्या-

व्यव्यापकभावासम्भवादिति भावः। जातेरनांशिकतया विशेष्यीभूततत्तद्विषयकज्ञानस्य प्रत्यभिज्ञादौ व्यभिचारप्रसङ्गाच्चेत्यपि बोध्यम्। तत्तेदन्त्वादिविशिष्टविषयकं तत्र ज्ञानद्वयमेव भेदाग्रहसहकृतं विशिष्टव्यवहारादिनिमित्तं न त्वेकं ज्ञानं अतो न जातिसङ्करादिप्रसङ्ग इत्यत आह। ज्ञानद्वयेति। स्थैर्यमात्रमिति। तस्य पूर्वगृहीतानुभूयमानयोरभेदप्रत्यभिज्ञैकप्रमाणकत्वादिति भावः। अनुमानादपि कुतश्चित् स्थैर्यसिद्धिसम्भवादाह। व्यवस्थापितश्चेति। अन्यथाख्याताविति शेषः। प्रत्यक्षसामग्र्यसमवहितज्ञानजन्यतावच्छेदकं वैजात्यन्तु न प्रत्यभिज्ञानादाविति न सङ्कर इत्यत आशङ्कते। न चेति। अजनकत्वादिति। प्रत्यभिज्ञादौ तत्तादिभानार्थं चक्षुःसंयोगादिजन्यप्रत्यक्षे ज्ञानस्य स्वतन्त्रहेतुताया आवश्यकत्वात् तत एव सर्वांशोपनीतभानस्योपपत्तेरुक्तरूपेण हेतुत्वे मानाभावादिति भावः।

ननु तदानीमिन्द्रियसंयोगादिघटितप्रत्यक्षसामग्र्या अभावात् सर्वांशोपनीतभाने प्रत्यक्षत्वं न सम्भवतीति यज्जातीयप्रमासामग्रीविरहे इत्यादिव्याप्तिबलात् प्रमावैजात्यापत्तिर्दुर्वारैव। न च तादृशव्याप्तौ मानाभावः,तादृशोपनीतभाने प्रत्यक्षत्वासम्भवात्तत्रोपनायकज्ञानस्य स्वतन्त्रहेतुताया आवश्यकत्वाज्जन्यतावच्छेदकधर्मं विना तदनुपपत्तेरेव मानत्वात् ज्ञानस्य जनकतायामेव प्रत्यक्षादिसामग्र्यसमवहितत्वमवच्छेदकं भवतु तत्सहकारि वेत्यन्यदेतदित्यत आह। असिद्धेश्चेति। उपनीतभानस्थले प्रत्यक्षादिसामग्र्यभावस्यैवेत्यादिः। असिद्धिमेव विवृणोति। उपनयेति। लौकिकसन्निकर्षस्य विषयिताविशेषावच्छिन्नं प्रत्येव जनकतया उपनीतभाने तादृशविषयिताविशेषानभ्युपगमेन न व्यभिचार इति भावः। न चांशिकोपनीतभाने उपनीतस्य प्रकारतयैव भानोपगमाद्विशेषणज्ञानविधयैव तत्रोपनयज्ञानस्य हेतुत्वात् सर्वांशोपनीतभाने जातिविशेषस्यैव तज्जन्यतावच्छेदकतया कल्पनमुचितम् अलौकिकप्रत्यक्षत्वस्य गुरुत्वात् तथा च प्रत्यक्षत्वं तत्र निर्युक्तिकमिति वाच्यम्। सुरभि चन्दनमित्यादौ मानससर्वांशोपनीतभाने विशेष्यचन्दनादेस्तादात्म्यसम्बन्धेन स्वांशे प्रकारताया अभ्युपगमेन विशिष्टबुद्धौ विशेषणज्ञानहेतुतयैव निर्वाहादुपनीतभाने उपनायकज्ञानस्य स्वातन्त्र्येण हेतुताया अक-

रूपनात् । सिध्यतु वा सर्वांशोपनीतभाने जातिविशेषः सोऽपि प्रत्यक्षत्वव्याप्य एव न तु तद्विरुद्ध इति नोपनयस्य प्रमाणान्तरता । न च तादृशज्ञाने प्रत्यक्षत्वमप्रामाणिकम् । प्रत्यक्षत्वादन्यस्या अनुभवत्वजातेरप्रामाणिकतया तत्प्रकारकज्ञानत्वस्य स्मृतिसाधारण्येन व्यभिचारात् प्रत्यक्षत्वस्यैव विशेषणज्ञानजन्यतावच्छेदकतया तत्र प्रत्यक्षत्वानुपगमे तस्य विशेषणज्ञानजन्यत्वानुपपत्तेः । न चोपनयविधयैव तत्र विशेषणज्ञानस्यापेक्षणीयतया विशिष्टप्रत्यक्षत्वावच्छिन्नाया विशेषणधीजन्यतायास्तदासत्त्वेऽपि न क्षतिरिति वाच्यम् । स्वरूपतो घटत्वादिप्रकारकोपनीतभाने घटत्वादिविषयकज्ञानस्य उपनायकविधयाऽपेक्षायामपि स्वरूपतस्तत्प्रकारकज्ञानपर्यन्तानपेक्षायां जातित्वादिना घटत्वादिज्ञानात् घट इत्येतादृशोपनीतभानापत्तेः स्वरूपतस्तद्विषयकज्ञानजन्यतावच्छेदकस्य स्वरूपतस्तत्प्रकारकप्रत्यक्षत्वस्य (१)स्वरूपतस्तत्प्रकारकोपनीतभानसाधारणताया आवश्यकत्वात् ।

अथ स्वरूपतो घटत्वादिविषयकं यत्र निर्विकल्पकं जातित्वादिना घटत्वज्ञानञ्च तत्र स्वरूपतो घटत्वादिप्रकारकोपनीतभानवारणाय तादृशोपनीतभाने स्वरूपतस्तत्प्रकारकज्ञानहेतुत्वमावश्यकं तथा च तस्य प्रत्यक्षसाधारणविशेषणज्ञानजन्यतावच्छेदकानाक्रान्तत्वेऽपि न क्षतिः । न च तादृशस्थले तथाविधोपनीतभानमिष्टमेवेति वाच्यम् । येन रूपेण यस्य ज्ञानं तेन रूपेणैव तस्योपनयः न तु तदविशेषितस्येति नियमादिति चेत्तर्हि, स्वरूपतस्तत्प्रकारकोपनयस्यापि स्वरूपतस्तत्प्रकारकालौकिकप्रत्यक्षत्वमेव जन्यतावच्छेदकं वाच्यं न तु सर्वांशोपनीतभानवृत्तिवैजात्यं तथासत्युक्तस्थले घट इत्याद्याकारकचाक्षुषाद्युपनीतभानापत्तेः तथा च सर्वांशोपनीतभानस्यापि तादृशोपनयजन्यतावच्छेदकाक्रान्तत्वनिर्वाहायैव तत्र प्रत्यक्षत्वस्वीकार आवश्यकः । वस्तुतो येन रूपेणेत्यादिनियमो निर्विकल्पकस्य अनुपनायकतामते, निर्विकल्पकस्य उपनायकतामङ्गीकुर्वतान्तु न तादृशनियम इत्युक्तस्थले दर्शितोपनीतभानमिष्टमेवेति

(१) स्वरूपतो घटत्वादिप्रकारक-घट-इत्येतादृशोपनीतभानापत्तेरिति पु० पा० ।

कृतं पल्लवितेन ।

(चि०)स्यादेतत् पक्षधर्मस्य व्याप्यताज्ञानं नेन्द्रियेण वह्नेरसन्निकर्षे तन्नियतसामानाधिकरण्यस्य व्याप्यत्वस्यायोग्यत्वात् । न च धूमत्वेन सकलधूमव्याप्यतावगमात् धूमविशेषे संस्कारात् स्मरणाद्वोपनीतव्याप्याभेदग्रहः प्रत्यभिज्ञाने तस्याविशिष्टस्येवेति वाच्यम् । एवं हि धूमवत्त्वेन वह्निमत्त्वज्ञानात् धूमवद्विशेषे पर्वते संस्कारवशात् प्रत्यक्षेण व्याप्तिज्ञानापेक्षेण वह्निमदभेदग्रहो वह्निमत्त्वसंसर्गग्रहो वाऽस्तु किमनुमानेन । पृथक् वह्निमत्त्वस्मरणं तत्र नास्ति किन्तु व्याप्त्यवच्छेदकतयेति चेन्न वह्निमान्न वेति संशयानुरोधेन स्वतन्त्रवह्निमत्त्वस्मरणात् । न च विशिष्टज्ञाने स्वतन्त्रविशेषणज्ञानत्वेन हेतुत्वम्, गौरवात् ।

(दी०) पृथगिति । न चैवं धारावाहिकोच्छेदः, इतरमात्रविशेषणत्वेनोपस्थितेरेव तन्त्रत्वात्, कोटिस्मरणस्य संशयेन तस्य च व्याप्तिस्मरणादिना नाशात् विशेषदर्शनकाले च संशयायोगादाह । न चेति । गौरवादिति । न चैवमभावविशेषणत्वेनोपस्थितस्यापि भावस्य ग्रहापत्तिः, अभावग्राहकसामग्र्या बलवत्या प्रतिबन्धात्, अभावाविशेषणत्वेनोपस्थितिस्तन्त्रमित्यपि कश्चित् । वस्तुतस्तु स्वतन्त्रविशेषणज्ञानस्य विशिष्टधीहेतुत्वेऽनुमित्यर्थमेव त्वयाऽपि तत्स्वीकरणीयं, न हि विशिष्टप्रत्यक्षं प्रत्येव तथात्वम्, मानाभावात् ।

(गा०) किञ्चिदंशे तदप्रकारकं विशेषणज्ञानमेव पृथग्विशेषणज्ञानमित्याशयेन शङ्कते । न चैवमिति । धारावाहिकोच्छेद इति । विशिष्टबुद्धिधारान्तःपातितृतीयादिविशिष्टबुद्ध्यनुपपत्तिरित्यर्थः । तत्पू-

र्षे निर्विकल्पकात्मकस्य विशेषणज्ञानस्य विनाशाद्विशिष्टबुद्धिरूपस्य तस्य विशेषणप्रकारकतया स्वातन्त्र्यविरहादिति भावः। समाधत्ते। इतरमात्रेति। तत्तदितरोभयांशे तत्प्रकारकज्ञानात्तदंशे तद्विशिष्टज्ञानोपपत्तये मात्रपदम्, तेन यद्धर्मिणि विशिष्टज्ञानं फलं तद्धर्म्यंशे तद्प्रकारकं यत् तत्प्रकारकं तदन्यतद्विषयकोपस्थितेरित्यर्थः।

यत्तु तादितरविशेष्यतानिरूपिततत्प्रकारतान्यतद्विषयताकोपस्थितेरित्येवार्थः, विशेष्यताभेदेन प्रकारताभेदावुभयविशेष्यकविशिष्टबुद्धिसंग्रहात्। तन्न। घटौ पटावित्यादिसमूहालम्बनविलक्षणे घटपटौ द्वावित्यादिज्ञाने उभयाद्यंशे एकत्रैव द्वित्वादिविशेषणमवगाहमाने विशेष्यभेदेऽपि द्वित्वादिप्रकारताया अभिन्नतया घटादीतरपटादिविशेष्यतानिरूपितत्वसत्त्वेन तज्ज्ञानस्य घटपटौ द्वावित्यादिज्ञानान्तराजनकत्वप्रसङ्गात् (१)।

स्वतन्त्रविशेषणज्ञानस्य विशिष्टधीहेतुत्वमभ्युपेत्य संशयार्थे स्वीकार्येण स्वतन्त्रवह्निस्मरणेन परामर्शोत्तरं पक्षे तदुपनीतभाननिर्वाहे अपरितोषबीजं दर्शयन् विशेषणज्ञानहेतुतायां स्वातन्त्र्यप्रवेशे युक्तिविरहप्रदर्शकं न चेत्यादिमूलमवतारयति। कोटीति। संशयेन नाशादित्यग्रिमेणान्वयः। स्मरणनाशेऽपि संशयात्मकतादृशविशेषणज्ञानादेव निश्चयो भविष्यतीत्याशङ्क्याह। तस्य चेति। व्याप्तिस्मरणादिना इत्यस्य परामर्शार्थमुपगन्तव्येनेत्यादिः व्याप्तिस्मरणानन्तरं पक्षधर्मताज्ञानकाले विशिष्टज्ञानकाले वा पुनः संशयो भविष्यति ततो निश्चय इत्याशङ्क्याह। विशेषदर्शनेति। विशेषदर्शनम् व्याप्यतया गृहीतस्य पक्षे निश्चयः। संशयायोगादिति। तदभावस्य कार्यसहभावेन हेतुत्वादिति भावः।

यद्यपि परामर्शानन्तरं वह्निरित्याकारकस्मरणं कल्पयित्वा पक्षे उपनीतवह्निनिश्चयः शक्योपपादनस्तथापि तादृशकारणतायाः प्रामाणिकत्व एव तत्कल्पनमुचितं तदेव नेति वस्तुगतिम-

---

(१) 'तदन्यतद्विषयकोपस्थितेरित्यर्थः इति पाठादनन्तरं तदितरविशेष्यतानिरूपितप्रकारतान्यतद्विषयताकोपस्थितेरिति वा, विशेष्यताभेदेन प्रकारताभेदावुभयविशेष्यकविशिष्टबुद्धिसंग्रहात् इति पाठः कस्मिंश्चिदादर्शपुस्तके वर्त्तत इति।

नुरुध्य तादृशकारणत्वं मूलकृता निराकृतमिति भावः । मूले न चेति । न वेत्यर्थः । युक्तिसत्त्वे उक्तकारणतायाः स्वातन्त्र्यस्याधिकस्यावच्छेदकत्वं गौरवेण दुरपवादमिति युक्तिं दीधितौ शङ्कते । न चैवमिति । एवम् । विशेषणज्ञानहेतुतावच्छेदकतायां स्वातन्त्र्यानिवेशे । भावस्य । घटादेः । ग्रहापत्तिः । भूतलं घटाभाववदित्यादिनिश्चयकाले भूतलादौ ग्रहापत्तिः । तादृशापत्तिं परिहरति । अभावग्राहकेति । बलवत्येति । तुल्यबलसामग्रीदशायां संशयोत्पत्त्या इष्टापत्तिरेवेति भावः । न च तादृशसामग्र्याः प्रतिबन्धकत्वमप्रामाणिकमिति शङ्क्यम् । स्वतन्त्रविशेषणज्ञानसत्त्वे कदाचित् (१) तथाविधनिश्चयकाले घटादिग्रहापत्तेः ।

कस्यचित् समाधानमुपन्यस्यति । अभावेति । उक्तक्रमेणैव (२) उपपत्तावभावविशेषणत्वप्रवेशे गौरवमन्याय्यं तथा सति (३) वह्न्यभाववदवृत्तित्वरूपव्याप्तिघटकतया वह्निविषयकज्ञानाद्वह्न्युपनीतभानानिर्वाहश्चात्रास्वरसबीजम् । विशिष्टबुद्धिसामान्यहेतुतायां स्वातन्त्र्यनिवेशनं स्वतन्त्रविशेषणज्ञानं विनाऽनुमितिमङ्गीकुर्वाणस्य शङ्कास्पदमपि नेति प्रत्यक्षे तन्निवेशेन कारणत्वान्तरस्वीकृतिनिर्युक्तिकमित्याह । वस्तुतस्त्विति । मानाभावादिति ।

अथ ज्ञानत्वस्य स्मरणेश्वरज्ञानवृत्तितया अनुभवत्वस्य चेश्वरज्ञानवृत्तितया जन्यतावच्छेदकत्वासम्भवात् तद्व्यावृत्तं विशिष्टविषयकविजातीयप्रत्यक्षत्वमेव विशेषणज्ञानजन्यतावच्छेदकं वाच्यमिति कथं मानाभाव इति चेत् ? अनुभवत्वजातेरीश्वरज्ञानवृत्तित्वे मानाभावादनुमितिसाधारणविशिष्टानुभवत्वेनैव विशेषणधीजन्यत्वोपगमात् अन्यथा अनुमितौ कारणत्वान्तरकल्पनापत्तेः प्रत्यक्षत्वस्यापि ईश्वरज्ञानवृत्तित्वे मानाभावाच्च न सङ्करप्रसङ्गः । न चेश्वरज्ञाने प्रत्यक्षत्वानङ्गीकारे तस्य जन्यमात्रं प्रति उपादानगोचरलौकिकप्रत्यक्षत्वेन हेतुत्वानुपपत्तिरिति वाच्यम् । उपादानप्रत्यक्षहेतुतायां लौकिकविषयतायाः प्रत्यासत्तित्वावश्यकत्वेन

(१) विशेषादर्शनकाल इत्यर्थः ।
(२) सामग्रीप्रतिबन्धकतयैवेत्यर्थः ।
(३) गौरवस्य न्याय्यत्वे ।

ज्ञानत्वस्यावच्छेदकत्वसम्भवात् भगवज्ज्ञाने प्रत्यक्षत्वानङ्गीकारेऽपि क्षतिविरहात् लौकिकविषयतायाः प्रत्यक्षत्वव्यवन्मात्रनिरूपितत्वे मानाभावादीश्वरज्ञाने प्रत्यक्षत्वव्यवहारस्य लौकिकविषयतावत्त्वनिबन्धनत्वेनौपचारिकत्वादिति ।

(चि०) अथ यो यत्र विशिष्य पूर्वमवगतः स तत्र संस्कारवशाद्यथार्थप्रत्यक्षे भासते यथा तत्ता प्रत्यभिज्ञाने । न च पर्वते विशिष्य पुरा वह्निरवगतः । यत्र चन्दने सौरभमुपलब्धं तत्र संस्कारवशाच्चक्षुषा सुरभि चन्दनमिति ज्ञानमन्यथानुमितिरिति चेत्तर्हि, पक्षधर्मधूमेऽपि न पुरा विशिष्य व्याप्तिरवगतेति कथं संस्कारवशात्तद्गतव्याप्तिबोधः प्रत्यक्षेण ।

(दी०)तर्हीत्यादि । वस्तुतो यत्र क्वचिदपि गृहीतस्य धर्मिणि साधारणधर्मदर्शनात् स्मृतस्य संशयादिसाधारणी विशिष्टधीः । इयांस्तु विशेषो यत्कोटिद्वयसहचरितधर्मदर्शनात् कोटिद्वयस्मरणे संशयोऽन्यथा त्वेककोटिनिश्चय इति । एतेन धूमत्वादिना पक्षधर्मे व्याप्तिमनुमाय वह्न्याद्यनुमितिरिति परास्तम् । धूमत्वाद्यनुपस्थित्या धूमत्वादेर्वह्निव्याप्तिव्याप्यत्वाग्रहे वह्न्यनुमितिप्रसङ्गाच्च । एतेन यद्धर्मावच्छेदेन यद्वत्त्वं गृहीतमुपनयवशात् तद्धर्मविशिष्ट एव तद्भासते धूमवत्त्वावच्छेदेन च वह्निमत्त्वग्रहाद्धूमवानेव वह्निमानिति बुद्धिः स्यात् न तु पर्वतो वह्निमानित्यपि परास्तम् । मानाभावात्, चन्दनत्वाद्यवच्छेदेन गृहीतस्य सौरभादेः पुरोवर्त्तिनि चन्दनत्वादिदर्शनादिदं सुरभि इत्यादिबुद्धौ व्यभिचाराच्च । यदि चावच्छेदकधर्मवैशिष्ट्यमपि तत्र भासत इति नियमोऽपि तत्र प्रामाणिकस्तदा धूमवानयं पर्वतो वह्निमानित्येव धीरस्तु, न हि लिङ्गोपधानभाने बाधक-

मन्यत्, साधकविरहात् ।

(गा०) ननु तर्हीत्यादिमूलमयुक्तं तथा हि यो यत्र विशिष्ये-त्यादिनियमे विशिष्यत्वस्य तन्मात्रवृत्तिधर्मप्रकारेणेति नार्थः, प-रन्तु फलीभूतग्रहधर्मितावच्छेदकप्रकारेणेत्येव, एवञ्च पर्वतीयधूम-त्वादिना व्याप्त्यग्रहेऽपि धूमत्वेन पर्वतीयधूमे सामान्यलक्षणया व्या-प्तिग्रहात् वह्निव्याप्यधूमवान् पर्वत इति परामर्शो नानुपपन्न इत्याश-ङ्क्य उक्तनियमे बाधकान्तरमाह । वस्तुत इति । यत्र क्वचिदपीति । फलीभूतज्ञानाविषये धर्ममात्रे इत्यर्थः । धर्म्मिणि । फलीभूतग्रहवि-षयधर्म्मिणीत्यर्थः । संशयादीत्यादिना निश्चयपरिग्रहः ।

नन्वपूर्वे धर्म्मिणि संशय एव स्वीक्रियते न तूपनीतधर्म्मनिश्च-यः, यश्च संशय इव तत्रैव सति व्याप्यदर्शने निश्चयोऽनुभूयते स तु आनुमानिक एव व्याप्यदर्शनस्यास्माकमनुमितिहेतुत्वादिति निश्च-यात्मकोपनीतभाने कथितनियमो निराबाध एवेति कदाचित् ब्रूया-दिति शङ्कया यादृशसामग्र्या कोट्यन्तरभासकसामग्रीकाले संश-यात्मकतत्कोटिविशिष्टधीर्जन्यते तादृशसामग्रीतः असत्यां विपरीत-कोटिभानसामग्र्यां तत्कोटिनिश्चयोऽनुभवसिद्धतया दुरपह्नवः विप-रीतकोटिभानसामग्रीविगमश्च विशेषदर्शनादिव तत्कोट्यस्मरणादपी-ति एककोटिमात्रस्मरणे व्याप्यदर्शनं विनाप्येककोटिनिश्चयोत्पत्त्या नोक्तनियमो निश्चयदशायां (१)सम्भवतीत्याह । इयांस्त्विति । तुर वधारणे । तथा चैतावानव संशयनिश्चययोरुत्पत्तौ विशेष इत्यर्थः । एतेन । अपूर्वधर्म्मिविषयकसंशयादौ व्यभिचारस्य दुर्वारत्वेन । व्या-प्तिमनुमायेति । तथा च पर्वतीयधूमे विशिष्य प्रागगृहीताया व्याप्तेस्त-त्रोपनीतभानानभ्युपगमादुक्तनियमो दुर्वार एवेति भावः । सर्वत्र व्याप्त्यनुमितिरपि न सम्भवतीति मूलोक्तदूषणं दर्शितरीत्या दुरु-द्धरमित्याह । धूमत्वत्वेति । व्याप्तिव्याप्यत्वाग्रह इति । व्याप्तिव्याप्य-त्वेनानिश्चयस्थले इत्यर्थः व्याप्यतावच्छेदकनिर्णयं विना व्याप्तेर्दुर्नि-श्चयत्वादिति भावः । वह्न्यनुमितीति । व्याप्त्यनुमानासम्भवादिति भावः । एतेन । दर्शितसंशयानुपपत्त्योक्तनियमस्यैव (२)तत्समर्शि-

(१) निश्चयमादायापीति पु० पा० ।
(२) दर्शितसंशयाद्यनुरोधेन उक्तनियमस्यैवेति पु० पा० ।

लस्य नियमान्तरस्याप्यनभ्युपगमेन । यद्यद्धर्म्मावच्छेदेनेति पर्वतीय-धूमे विशिष्य व्याप्त्यग्रहेऽपि धूमत्वावच्छेदेन व्याप्तेर्ग्रहान्न विशिष्टप-रामर्शानुपपत्तिरिति भावः । अवच्छेदकधर्मदर्शनाधीनोपनीतभान-मादाय नियमोपगमाद्दर्शितसंशयादावपि व्यभिचारोऽपि शक्यते वारयितुमित्याशङ्क्य अप्रयोजकतामप्याह । मानाभावादिति । अवच्छे-दकधर्म्मदर्शनाधीने अपूर्वधर्मितावच्छेदकविशिष्टविषयकनिश्चये व्यभिचाररूपं बाधकमप्याह । चन्दनत्वेति । सौरभादेः । बुद्धावित्य-ग्रिमेणान्वयः । व्याप्तिप्रकारेण चन्दनत्वादेरग्रहान्न तत्र सौरभानु-मितिसम्भव इति भावः ।

ननु तद्धर्मविशिष्ट एव तद्भासते इत्यस्य तदन्यधर्मविशिष्टे न भासते इति नार्थः, किन्तु तद्धर्म्माविशिष्टे न भासत इत्ये-वार्थः, एवञ्चोक्तस्थले इदं चन्दनं सुरभीत्येवोपनीतभानमुपेयते इत्यतो न व्यभिचार इत्यत आह । यदि चेति । इत्येव धीरस्त्वि-ति । उपनीतप्रत्यक्षरूपा एतादृशी धीरेवानुमितिकार्यकारिणी भ-वत्वित्यर्थः ।

ननु लिङ्गोपधानमतस्य बाधकग्रासान्न तादृशोपनीतभान-स्वीकारसम्भव इत्यत आह । न हीति । साधकविरहादिति । उप-नीतभानोपगन्तृणां दर्शितनियम एव लिङ्गोपधाने साधक इति भावः ।

(चि०) न च सहचारदर्शनजन्यसंस्कारसहिते-नेन्द्रियेण व्यभिचारज्ञानाभावे सति महानसीयधूम-वत् पर्वतीयधूमे व्याप्त्यवगमो वह्नेस्तु न प्रत्यक्षसाम-ग्री सन्निकर्षाभावादिति वाच्यम् । हेतुसाध्यसाक्षा-त्कारं विना प्रत्यक्षेण व्याप्त्यग्रहात् । न च पर्वते व-ह्निसाक्षात्कारः । न च पक्षधर्मस्य साध्यसामानाधिक-रण्यविशेषो व्याप्तिः पक्षे साध्यग्रहं विनेत्युक्तम् ।

उच्यते । विशेषणज्ञानं तस्य विशेष्ये सम्बन्धस्त-योरसंसर्गाग्रहो विशेषदर्शने विशेषणविशेष्येन्द्रिय-

सन्निकर्षो गौरयमित्यादियथार्थविशिष्टप्रत्यक्षकारणम्, अस्ति चात्रापि व्याप्तिस्मरणं स्मृतव्याप्तेः पक्षवृत्तिधूमे सत्त्वात् ।

(दी०) हेतुसाध्येति। सम्बन्धिद्वयानिरूप्यपदार्थप्रत्यक्षं प्रति सम्बन्धिद्वयप्रत्यक्षस्य हेतुतायाः संयोगादिस्थले त्वयैव क्लृप्तत्वात् तदनादरेऽपि साध्यघटितमूर्त्तिकव्याप्तिप्रत्यक्षस्य साध्यप्रत्यक्षसामग्रीं विना असम्भवादिति भावः । विशेषणेत्यादि । विशेषणविशेष्यसम्बन्धस्तदंशे प्रमात्वे लौकिकत्वे वा विशेषदर्शनञ्च विपरीतज्ञानप्रतिबन्धकतया क्वचित् क्वचित्सहचरितधर्मदर्शनत्वेन विशेषणस्मारकतया विशेषणस्य च ज्ञानसत्त्वेऽप्यतिरिक्तसन्निकर्षस्तदंशे लौकिकतायामुपयुज्यते ।

(गा०) व्यभिचारादर्शनसहकृतसहचारदर्शनरूपव्याप्तिग्राहकसद्भावान्महानसीयधूम इव पक्षीयधूमेऽपि सन्निकृष्टे व्याप्तेर्लौकिकप्रत्यक्षमेव स्वीक्रियते न तूपनीतभानमिति कथं यो यत्रेत्यादिनियमे सत्येव विशिष्टपरामर्शानुपपत्तिरित्याशङ्कां निरस्यति मूले न चेत्यादिना । हेतुसाध्योभयसाक्षात्कारस्य व्याप्तिप्रत्यक्षापेक्षणीयतां मूलोक्तामुपपादयति दीधितौ सम्बन्धीति। मीमांसकमते ससम्बन्धिकवस्तुव्यवहार एव सम्बन्धिप्रत्यक्षस्य हेतुता न तु तत्प्रत्यक्षेऽतः त्वयैवेति । नैयायिकेनैवेत्यर्थः। क्लृप्तत्वादित्यस्य यत्किञ्चिदेकसम्बन्धिग्रहविरोधीन्द्रियसन्निकर्षदोषसमवधानादिदशायां प्रत्यक्षवारणायेत्यादिः।

ननु सम्बन्धिद्वयप्रत्यक्षस्य हेतुत्वेऽपि यत्र सम्बन्धिप्रत्यक्षोत्पत्तिक्षणे तत्सामग्रीविरहस्तत्र तद्द्वितीयक्षणतृतीयक्षणयोः संयोगादिप्रत्यक्षापत्तिः सम्बन्ध्यंशे लौकिकप्रत्यक्षानात्मकस्य संयोगादिलौकिकप्रत्यक्षस्यानुभवविरुद्धतया इष्टापत्तेरयोगादिति सम्बन्धिग्राहकसामग्र्या हेतुताया आवश्यकत्वे सम्बन्धिसाक्षात्कारहेतुतायां मानाभाव इत्यपरितोषात्सम्बन्धिप्रत्यक्षसामग्र्यभावस्यैव प्रकृते व्याप्तिप्रत्यक्षविरोधितामाह। तदनादरेऽपीति। साध्यघटितमूर्त्तिके

स्यमेन व्याप्तिप्रत्यक्षे साध्यमानानुरोधेनापि साध्यसन्निकर्षाद्यपेक्षेति सूचितम् । भ्रमात्मकविशिष्टज्ञाने विशेष्ये विशेषणसम्बन्धस्यानपेक्षणात् प्रमात्वोपयोगितया तत्परिगणनं सङ्गमयति । विशेषणेति । तदंशे । विशेषणविशेष्यसम्बन्धांशे, न तु विशेषणांशे, संयोगेन द्रव्यविशेषणकस्थले विशेष्ये विशेषणसंयोगस्य संयोगसम्बन्धेन विशेषणप्रमात्वनिर्वाहकत्वेऽपि इन्द्रियासंयुक्तविशेषणसंयोगस्य लौकिकसन्निकर्षानात्मकतया विशेषणांशे लौकिकत्वानुपयोगित्वेन लौकिकत्वे वा इत्यत्रैतदन्वयानुपपत्तेः । सम्बन्धांशे प्रमात्वञ्च सम्बन्धघटितं प्रमात्वम्, अत्र च विशेष्यविशेषणसम्बन्धस्य तदानीमविद्यमानत्वेऽपि दण्डघ्यमासीदित्यादिप्रमोत्पत्तेः प्रमात्वे यदा कदाचित् सम्बन्धस्य उपयोगितापरमिदम् । विद्यमानसम्बन्धस्य उपयोगितापरत्वाभिप्रायेण कल्पान्तरमाह । [१]लौकिकत्वे वेति । उपयुज्यते इत्यग्रिमेणान्वयः । लौकिकत्वमपि सम्बन्धांशे बोध्यम् । विशेष्ये विशेषणसम्बन्धस्य सम्बन्धे विशेष्यघटितलौकिकसन्निकर्षसम्पादकतया लौकिकत्वोपयोगिता । अथ वा तदंश इत्यस्य विशेषणांश इत्येवार्थः । विशेष्ये विशेषणसम्बन्धस्य विशेषणांशे लौकिकत्वोपयोगिता तु समवायेन गुणादिविशिष्टबुद्ध्यभिप्रायेण । द्वितीयकल्पे विशेष्यपदञ्च सन्निकृष्टधर्मिमात्रपरं, अतो अनुभूयमानारोपे विशेष्यविशेषणसम्बन्धासत्त्वेऽपि विशेषणांशे लौकिकत्वादसङ्गतेर्नावकाशः । लौकिकपदस्य प्रमात्वघटकलौकिकविषयतापरतया यथाश्रुतमेव वा समर्थनीयम् । विशेषदर्शनस्य स्वमते निश्चयविशेषस्याहेतुतया उपयोगिताप्रकारमाह । विशेषदर्शनञ्चेति । क्वचिदिति । विपरीतकोटिभासकतदुपस्थित्यादिकालीननिश्चय इत्यर्थः । अत्राप्युपयुज्यत इति सम्बध्यते । क्वचिदिति । प्रकारान्तरेण यत्र न विशेषणज्ञानं तत्रत्यविशिष्टज्ञाने इत्यर्थः । दर्शनत्वेनेत्यन्तं स्मारकतायां हेतुः, स्मारकतया उपयुज्यते इति सम्बन्धः । एवञ्च विशिष्टप्रत्यक्षनिर्वाहकाणामेव कीर्त्तनमिदं न तु तत्कारणमात्रस्यैवेति भावः विशेषणज्ञानस्यै-

(१) दण्डघ्यमासीदित्यादिप्रमोत्पत्तिरित्यपरितोषात् कल्पान्तरमाहेति पु० पा० ।

व विशेषणभासकसन्निकर्षत्वात् सन्निकर्षान्तरकथनं किमर्थमित्यत आह। विशेषणस्य चेति। तदंशे। विशेषणांशे। लौकिकतायामिति। इत्थञ्च मूले सन्निकर्षपदं लौकिकसन्निकर्षपरमित्यपि बोध्यम्। व्याप्तिप्रविष्टचरमांशस्य व्याप्त्यैक्यमते धूमत्वरूपस्य सन्निकर्षादेव भानात्प्रकृते व्याप्तिविशिष्टप्रत्यक्षसामग्रीघटकत्वमपि विशेषणलौकिकसन्निकर्षस्येत्यविरोधः।

(चि०) एकैव हि सा व्याप्तिः तयोरसंसर्गाग्रहो धूमत्वविशेषदर्शनं व्याप्तिविशिष्टधूमेन्द्रियसन्निकर्षश्च व्याप्तिविशिष्टज्ञानकारणम्। न च वह्निविशिष्टज्ञानसामग्री, वह्नेरसन्निकर्षात्। कश्चित्तु धूमत्वे परम्परासम्बन्धेन वह्निव्याप्यत्वं पूर्वं गृहीतं तथा च संस्कारोपनीतं वह्निव्याप्यत्वं परम्परासम्बन्धेन पक्षवृत्तिधूमत्वे प्रत्यभिज्ञायते तद्वृत्तित्वेन पूर्वमनुभवात् एवञ्च धूमत्वव्याप्यपरामर्शादेवानुमितिरिति प्राह।

(दी०) एकैव हीति। वस्तुतो व्याप्तिभेदेऽपि न क्षतिः। सामान्यतो व्याप्तित्वेन गृहीतानां सकलव्याप्तीनां तथैव स्मरणसम्भवात्। वह्नेरसन्निकर्षादिति। ननूपनयात्मकसन्निकर्षेणैव नयनेन निरूप्यतां हुताशनः, न हि बहिरिन्द्रियेण द्रव्यस्याधेयतया तद्वत्त्वस्य वा ग्रहे तत्संयोगो हेतुः दण्डी पुरुषो नास्तीत्यादौ व्यभिचारात्, कथमन्यथा पक्षधर्मे वह्निमत्त्वगर्भिता व्याप्तिरेव गृह्यते। न चाधेयतया मुख्यविशेष्यं साक्षात् द्रव्यग्रहे तत्संयोगो हेतुः अभेदारोपे च नाधेयतया रजतादिकं प्रकारो दण्डाद्यात्मकतत्तावगाहिप्रत्यभिज्ञायाञ्च तत्तावदभेदो भासत इति दण्डादेः साक्षात्प्रकारतेति वाच्यम्। मानाभावात्, धूमवान् वह्निमानिति सामान्यलक्षणया ग्रहे व्यभिचारात् तत्तासंसर्गस्या-

पि प्रत्यभिज्ञायां भानसम्भवात् प्रकृतेऽपि वह्निमदभेदग्रहेणैव कृतार्थत्वाच्च । एतेन तत्ताकारानुपनीततादृशद्रव्यग्रहे स हेतुरिति निरस्तम् । चैत्रपदवाच्योऽयमित्यादिवत् दण्ड्ययमासीदयं दण्डीत्यादिग्रहस्यानुभविकत्वात् तत्तात्वस्यातिरिक्तस्याभावात् तच्छब्दप्रयोगजननाभावस्य च निमित्तान्तरविरहप्रयुक्तस्य जन्यतानवच्छेदकत्वात् तज्जननयोग्यतायाः प्रकृतेऽपीष्टत्वात् । अत एव तदिन्द्रियग्राह्यविद्यमानद्रव्यस्य तेन ग्रहे तत्संयोगो हेतुरिति परास्तम् । नयनादिना रजतादेरभावग्रहाभेदारोपादौ व्यभिचाराच्च ।

(गा०) एकैव हीत्यादिमूलं परमतसिद्धसामान्यप्रत्यासत्त्यभावमभ्युपेत्य, सामान्यलक्षणासत्त्वे व्याप्त्यैक्यस्यानुपयोगितां दीधितिकृदाह । वस्तुत इति । परमार्थत इत्यर्थः । एतेन यदि सामान्यप्रत्यासत्त्यभावोऽभ्युपगम्यते तदा क्षतिरेवेति सूचितम् । न च यो यत्रेत्यादिनियमोपगमेनैव पर्वतीयधूमे वह्निव्याप्तिविशिष्टप्रत्यक्षसामग्री सम्भवति न तु पर्वते वह्निविशिष्टप्रत्यक्षसामग्रीति विशेषव्युत्पादनं मूलकृत उपपद्यते नियमानभ्युपगमे ज्ञानसन्निकर्षघटितसामग्र्या उभयत्राविशेषेण विशेषोक्तेरत्यन्तासम्भवात् तथा च व्याप्तेर्धूमत्वादिरूपत्व एव पक्षीयधूमे तदंशस्य लौकिकसन्निकर्षादेव भानात् धूमत्वांशे वह्निसमानाधिकरणधूमवृत्तित्वस्यैव ज्ञानसन्निकर्षग्राह्यतया तत्र च तथाविधमहानसीयधूमवृत्तित्वस्य तन्मात्रवृत्तिधूमत्वत्वप्रकारेण पूर्वं गृहीतत्वादुक्तनियमो निर्वहति, न तु व्याप्तेः सामानाधिकरण्यरूपत्वे तथा च व्याप्तेरैक्ये मूलकृतो निर्भर एवेति दीधितिकृतां व्याप्तिभेदपक्षे क्षत्यभावाभिधानविरोध इति वाच्यम् । मूलकृता स्मृतव्याप्तेः पक्षधर्मधूमसत्त्वहेतुतया व्याप्तेरैक्याभिधानात् न क्षतिरिति ग्रन्थे क्षतिपदस्य पक्षीयधूमे स्मृतव्याप्यत्वरूपक्षतिपरतया व्याप्तेर्नानात्वे उक्तनियमभङ्गरूपक्षतिसत्त्वेऽपि तद्ग्रन्थाविरोधात् ।

केचित्तु ननु व्याप्तिभेदेऽपि सामान्यप्रत्यासत्त्या सकलव्या-

ष्यनुभवात् स्मृतव्याप्तेः पक्षवृत्तिधूमे सत्त्वमुपपद्यत इति किमर्थम एकैव हीत्युक्तमित्यनुशयस्य स्वयमेव वक्ष्यमाणत्वादाह । वस्तुत इति । वस्तुगत्येत्यर्थः । भेदेऽपीत्यनेनान्वयः । सामान्यतः । सामान्यप्रत्यासत्तिबलात् । तथैव । व्याप्तित्वेनैव । तथा च धूमनिष्ठस्वव्यापकवह्निसामानाधिकरण्यरूपैव व्याप्तिरिहाभिप्रेता, प्रतियोगितावच्छेदकादीनामैक्याच्च उपचारादेकपदप्रयोग इति व्याप्तिवादोक्तमेवानुसरणीयम् । न च प्रतियोगितावच्छेदकानामैक्यस्याकिञ्चित्करतया तत्प्रतिपादनमात्रफलस्योपचारस्य वैयर्थ्यमिति वाच्यम् । सखण्डे परम्परासम्बन्धेन अखण्डस्यैव प्रत्यासत्तितया तादृशवह्निमत्त्वादिरूपसामान्यप्रत्यासत्त्या निखिलवह्निमदादिभानेन व्याप्तित्वेन, व्याप्तिप्रत्यक्षस्य सकलव्याप्तिविषयकत्वलाभार्थं उपचारानुसरणात् अन्यथा जातिलिङ्गतावादिमतोक्तसामान्यलक्षणानुपयोगरूपदोषस्य स्वमतेऽपि सत्त्वादसङ्गत्यापत्तेः । एवञ्च सिद्धान्तलक्षणे एतन्मूलग्रन्थसङ्गतार्थतया वस्तुत इत्यादिफक्किकावर्णनं भ्रमविजृम्भितमेवेत्याहुः (१)।

उक्तनियमसत्त्वे पक्षवृत्तिधूमासन्निकर्षदशायां धूमत्वरूपव्याप्तेरपि तत्रोपनयेनैव ग्रहस्य स्वीकरणीयतया तत्स्थलीयमानसविशिष्टपरामर्शानुरोधेन उक्तनियमो ऽनुमानप्रामाण्यवादिनापि न स्वीकरणीय एवेत्याशयेन सामान्यप्रत्यासत्तिपक्षमालम्बय पूर्वपक्षयति । नन्विति । निरूप्यताम् । निश्चीयताम् ।

मिश्रमतं निराकरोति । न हीति । बहिरिन्द्रियेण द्रव्यस्याधेयतया ग्रहे । आधेयत्वविषयितावच्छिन्नद्रव्यविषयिताशालिबहिरिन्द्रियजन्यज्ञानसामान्ये । प्रतियोगितया उपनीतघटादिविषयके घटो नास्तीति चाक्षुषादौ व्यभिचारवारणाय आधेयतयेति । मानसे बाह्यहस्त्यश्वादिविषयकस्वप्नज्ञाने व्यभिचारवारणाय बहिरिन्द्रियेणेति । गुणादिगोचरचाक्षुषादौ तद्वारणाय द्रव्यस्येति । आधारत्वाधेयत्वयोस्तुल्यवित्तिवेद्यत्वाभावे पर्वतो वह्निमानित्यादिज्ञानसंग्रहाय तद्भत्वस्य वेति । द्रव्याधारत्वस्येत्यर्थः । अत्रापि बहिरिन्द्रियेण इत्यनुषज्यते । तथा चैतन्मते आधारत्वविषयिता-

(१) केचिदित्यादिराहुरित्यन्तः पाठः केषुचिदादर्शपुस्तकेषु नास्ति ।

निरूपितद्रव्यविषयिताशालिबहिरिन्द्रियजन्यज्ञानत्वं कार्यतावच्छेदकम् । वस्तुतस्तु त्वगिन्द्रियादिसंयोगाच्चाक्षुषाद्यनुत्पत्त्या चक्षुःसंयोगत्वादिनैव हेतुता वाच्या, तथा च चाक्षुषत्वादिकमेव कार्यतावच्छेदके निवेशनीयं न तु बहिरिन्द्रियजन्यज्ञानत्वम् । इत्यादाविति । इत्याद्युपनीतदण्डादिमत्त्वावगाहिनि तद्विशिष्टविशेषणकाभावचाक्षुषादावित्यर्थः । फलापलापमाशङ्क्य निराकरोति । कथमिति । अन्यथा । असन्निकृष्टद्रव्यवत्त्वस्य विशेषणांशेऽप्यभाने । मुख्यविशेष्ये वृत्तिनियामकसम्बन्धेन साक्षात् द्रव्यप्रकारकत्वं कार्यतावच्छेदकं वक्तव्यमतो विशेषणांशे द्रव्यवत्त्वावगाहिन्युक्तस्थले न व्यभिचार इत्याशङ्कां निराकरोति । न चेति । पक्षधर्मे व्याप्तेः प्रकारत्वे परम्परया व्याप्तिघटकवह्नेरपि प्रकारत्वात् तत्र व्यभिचारवारणाय साक्षादिति । आधेयतयेत्यस्य व्यावृत्तिमाह । अभेदारोप इति । स्मर्यमाणरजतस्याभेदेनारोप इत्यर्थः । आधेयतया । वृत्तिनियामकसम्बन्धेन । भूतले घटाभाव इत्याद्यभावचाक्षुषेऽपि व्यावृत्तिर्बोध्या ।

नन्वेवमपि इदन्त्वविशिष्टमुख्यविशेष्यकदण्डाद्यात्मकतत्ताप्रत्यभिज्ञाने व्यभिचार इत्यत आह । दण्डेति । तत्तावदभेदो भासते न तु तत्तादिसंसर्ग इति शेषः । तावतापि सोऽयमित्याकारकतानिर्वाहादिति भावः । मानाभावादिति । तादृशकारणतायामित्यादिः । सामान्यप्रत्यासत्त्यजन्यत्वस्य कार्यतावच्छेदके निवेशेन सामान्यप्रत्यासत्तिजन्यप्रत्यक्षे न व्यभिचार इत्यत आह। तत्तेति । भानसम्भवात् । भाने युक्तिसम्भवात् । तदनुपगमे तत्तासंसर्गाभावसंशयनिवृत्त्यनुपपत्तेरिति भावः । यदि तत्तावदभेदग्रहोऽपि तादृशसंशयादिविरोध्युपेयते तदाह । प्रकृते ऽपीति । अनुमितिस्थलेऽपीत्यर्थः । अभेदग्रहेण । अभेदोपनीतभानेन । कृतार्थत्वात् । वह्न्यभावसंशयनिवृत्त्याद्युपपत्तेः । प्रकारान्तरेण प्रत्यभिज्ञायां व्यभिचारोद्धारं निरस्यति । एतेनेति । व्यभिचारस्य दुर्वारत्वेन । तत्ताकारानुपनीतत्वं तत्तात्वेनाभासमानत्वं, तच्छब्देनाव्यवह्रियमाणत्वं वा, आद्ये तत्तात्वाद्यनवच्छिन्नवृत्तिनियामकसम्बन्धावच्छिन्नद्रव्यविषयिताविशिष्टं चाक्षुषत्वादिकं कार्यतावच्छेदकं द्वितीये तच्छब्दप्रयोगाजनकत्वसहितताद्दशसंसर्गावच्छिन्नद्रव्यवि-

षयिताविशिष्टमिति बोध्यम् । अयोग्यस्येवासन्निकृष्टस्याप्युपनी-तस्य चाक्षुषादौ भानमविशेषेण दुरपह्नवमिति सूचयितुं चैत्रपदे-त्यादिदृष्टान्ताभिधानम् । दण्डद्वयमासीदिति ज्ञाने व्यभिचार-स्यातीतत्वानवगाहित्वविशेषणेन शक्यवारणतया तदनवगाहिनि व-स्तुतोऽतीतदण्डादिज्ञाने व्यभिचारमाह । अयं दण्डीति । निरुक्त-कार्यतावच्छेदकयोराद्यं दूषयति । तत्तात्वस्येति । अतिरिक्तस्येति । दण्डत्ववह्नित्वाद्यतिरिक्तस्येत्यर्थः । तथा च तदनवच्छिन्नद्रव्यप्र-कारतैवासिद्धेति भावः । न च तत्पदप्रतिपाद्यतावच्छेदकत्वम-न्यद्वा किञ्चिदीदृशं वह्न्यादिनिष्ठतत्तात्वं न तु वह्नित्वादिकमिति वाच्यम् । तद्ग्रहेऽपि वह्नित्वादिना वह्न्यादिमत्त्वग्रहे सोऽयमिति व्यवहारात् ।

द्वितीयपक्षे ऽजनकत्वं फलानुपधायकत्वं स्वरूपायोग्यत्वं वा ? तत्राद्यं दूषयति । तच्छब्देति । निमित्तान्तरविरहेति । प्रयोगेच्छा-विरहेत्यर्थः । तथा च तादृशधर्मस्य कार्यतावच्छेदकत्वे यत्र जातेऽपि प्रत्यभिज्ञाने निमित्तान्तरविरहान्न तच्छब्दप्रयोगः तत्र व्यभिचार इति भावः । द्वितीयं दूषयति । तज्जननेति । प्रकृतेऽपि । व-ह्निमानित्यादिज्ञानेऽपि । इष्टत्वादिति । तच्छब्दस्य वह्नित्वाद्यवच्छिन्नव-दर्थकतया व्यवहर्त्तव्यज्ञानविधया तत्प्रयोगे वह्नित्वादिप्रकारकज्ञान-मात्रस्यैव स्वरूपयोग्यत्वादिति भावः । तथा च तद्योग्यप्रकारकज्ञानमे-वाप्रसिद्धमिति भावः । अत एव । विद्यमानदण्डाद्यात्मकतत्ताव-गाहिप्रत्यभिज्ञायां व्यभिचारादेव । चाक्षुषाद्युपनीतप्रमादिगोचरा-दिस्पार्शनादौ मानसे बाह्यविषयकस्वप्नाद्यनुभवे च व्यभिचारवा-रणाय तादिन्द्रियग्राह्येति । तदिन्द्रियासाधारणकारणकलौकिकप्र-त्यक्षयोग्यार्थकम्, घटस्पार्शनादौ चक्षुरादिसंयोगस्य व्यभिचार-वारणाय तेनेति । त्वगादिसंयोगाद् घटादेश्चाक्षुषादेर्वारणाय त-त्संयोग इति । एतन्मते आधेयतयेति कार्यद्वयनिवेशादन्यत्रा-पि व्यभिचारं दर्शयति । नयनादिनेति ।

(दी०) अथैवं व्यवहितदण्डे पुंसि न कथं नायनो द-ण्डीति निश्चय इति चेत् ? क्वचित्तत्सहचरितधर्मादर्शनात् तद-स्मरणात् क्वचिच्च साधारणधर्मदर्शनादिना संशयस्यैव जननात्

सति च विशेषदर्शनादाविष्टत्वात् । युक्तश्चैतत् कथमन्यथा दण्डी न वेत्यादिकः संशयः । न हि नासौ तद्विशिष्टबुद्धिः, न तन्निश्चय इति चेत्, किं तेन? उक्तं हि संशयत्वं निश्चयत्वञ्च न जन्यतावच्छेदकमिति । अस्तु वा तथा, तथापि विशेषस्यादर्शनात् संशयस्यैव दर्शनात् निश्चयस्यापि सम्भवात् । मा भूद्वा नायनादिरयं हुताशनादिनिर्णयो मानसस्तु स्यात् तत्र तादृशानियमस्यात्यन्तं बाधितत्वादिति ।

(गा०) उक्तकार्यकारणभावानभ्युपगमेऽनिष्टमाशङ्कते । अथेति । मानसनिश्चयस्य इष्टत्वात् अन्यथा उक्तकार्यकारणभावेनापि तद्वारणासम्भवात् नायन इति । संशयस्यानुभवसिद्धतया निश्चय इति । निश्चयानुत्पत्तिप्रयोजकाभिधानेनोत्तरयति । क्वचिदित्यादि । तत्सहचरितेति । दण्डसहचरितेत्यर्थः, अदर्शनादित्यन्तं तदस्मरणे हेतुः । तदस्मरणादिति । तथा च विशेषणज्ञानाभावादेव तत्प्रकारकनिश्चयाभाव इत्यर्थः । साधारणधर्मदर्शनादिना । कोटिद्वयसहचरितधर्म्मदर्शनादिना । कोटिद्वयस्मरण इति शेषः । संशयस्यैव जननादिति । तथा च निश्चयत्वप्रयोजकविपरीतकोटिभानसामग्रीविरहस्यासत्त्वान्न निश्चयापत्तिरिति भावः ।

ननु कोटिद्वयोपस्थितावपि यत्र विशेषदर्शनवशात् विपरीतकोटिभानसामग्रीविरहः, यत्र च तत्कोटिमात्रसहचारितधर्मदर्शनात् तत्कोटेरेवोपस्थितिः तत्र तन्निश्चयो दुर्वार इत्यत आह । सति च विशेषदर्शनादाविति । आदिना कोट्यन्तरोपस्थित्यभावस्य विकल्पेन परिग्रहः, संशयनिश्चयसाधारणद्रव्यविशिष्टबुद्धिविशेषे इन्द्रियसंयोगहेतुतायाः संशयानुपपत्त्या उक्तिसम्भवोऽपि नेत्याह । युक्तश्चैतदिति । एतत् । व्यवहितस्याऽपि दण्डादेः सति विशेषदर्शनादावुपनयात् निश्चयजननम्, कथमन्यथेत्यनन्तरं विशेषादर्शन इति पूरणीयम् । असौ । संशयः । तद्विशिष्टबुद्धिः । बहिरिन्द्रियजन्यद्रव्यविशिष्टबुद्धिः । निश्चयत्वं जन्यतावच्छेदके निवेश्यमित्याशयेन शङ्कते । न तन्निश्चय इति । निश्चयत्वस्यार्थसमाजग्रासेन जन्यतावच्छेदके प्रवेशासम्भव इति कथयिष्यन् निश्चयत्वाभावस्य व्यभिचाराभावेऽकिञ्चित्करतामाह । किन्तेनेति ।

ननु व्यभिचारवारणान्यथानुपपत्त्या अर्थसमाजग्रस्तस्यापि कार्यतावच्छेदकत्वमुपेतव्यमित्यत आह। अस्तु वेति। तथा च निश्चयत्वस्यापि जन्यतावच्छेदकत्वस्वीकारः। दर्शनादित्यत्रासमस्ततया विशेषस्येत्यनुषज्यते। सम्भवात्।उत्पत्तेः। उक्तकार्यकारणभावस्य निर्युक्तिकत्वादिति भावः। यद्यपि प्रागेव निश्चयत्वस्येष्टत्वमुक्तं तथापि तदा युक्त्यनभिधानादनुभवकलहानिवृत्तेरिदानीं यादृशसामग्रीतो विशेषादर्शनदशायां संशयः तत एव विशेषदर्शनकाले निश्चय इत्यनुभवसिद्धं नियममवलम्ब्य निश्चयोत्पत्तिर्दृढीकृता। अभ्युपेत्याह। मा भूद्वेति। तत्र। मानसे। तादृशनियमस्य। वह्न्यादीन्द्रियसंयोगापेक्षानियमस्य।

(दी०] उच्यते। अस्ति तावदनुमिनोमीत्यनुव्यवसायसाक्षिको ज्ञानविशेषो यत्र कारणमन्वयव्यतिरेकाभ्यां व्याप्यपरामर्शः, मानसप्रत्यक्षविशेषोऽसाविति चेत्? कुतोऽस्य प्रत्यक्षत्वम्?अनुभवत्वादिति चेत्? किमिदमनुभवत्वमन्यत्, प्रत्यक्षत्वात्? स्मृत्यन्यज्ञानत्वमिति चेन्न। अप्रयोजकत्वात् अनुमितौ साक्षात्कारित्वग्रहप्रसङ्गाच्च। तद्व्यञ्जकलौकिकसन्निकर्षादिजन्यत्वविरहान्न तथेति चेत्? आत्मानुमितौ तस्यापि सम्भवात् वह्निमनुमिनोमि न तु साक्षात्करोमीत्यबाधितसाक्षात्कारत्वाभावग्रहाच्च, अगत्या तु सौरभं न पश्यामीत्यादावन्यथात्वकल्पनम्, सामान्यलक्षणानङ्गीकर्तृनये चाप्रसिद्धवह्न्यादिव्यक्तिकानुमितौ न प्रत्यक्षत्वसम्भावनाऽपि, सन्निकर्षासम्भवात्। एतेन शाब्दादिकं व्याख्यातम्, व्यवस्थापयिष्यते तावदप्रसिद्धाभावसाध्यकानुमितिः। न च साक्षात्कारिणी, तत्रोपनयस्यासम्भवात्। एवञ्च प्रसिद्धसाध्यकानुमितेरपि न साक्षात्त्वम्, जातिसङ्करप्रसङ्गादित्यपि केचित्। तत्र भेदत्वादिनोपस्थिते जलादिप्रतियोगिकत्वग्रह इत्यपरे। मानाभावादिति। तन्निष्ठावच्छेदकान्तरग्रहमन्तरेणासम्भवाच्चेत्यपि द्रष्टव्यम्।

(गा०)ज्ञानविशेषः । प्रत्यक्षविजातीयज्ञानम् । तथा च तत्करणतया अनुमानस्य प्रमाणतेति भावः । न च व्याप्यदर्शनानन्तरजातालौकिकप्रत्यक्षत्वं तादृशानुव्यवसायविषय इति वाच्यम् । साध्यनिश्चयादूयुत्तरकालं तादृशानुव्यवसायानुदयात् । न च साध्यनिश्चयाद्यनुत्तरत्वमपि निवेशनीयमिति वाच्यम् । तदनुपस्थितावपि तथाविधानुव्यवसायोदयात् । अस्त्वनुव्यवसायबलादनुमितित्वं जातिः सा प्रत्यक्षत्वव्याप्यैवेतिः न तत्करणस्य प्रमाणान्तरतेति शङ्कते । मानसेति । अनुमितौ प्रत्यक्षत्वस्याप्रामाणिकतया अनुमितिः प्रत्यक्षविजातीयैवेति तत्करणं मानान्तरमिति समाधित्सुः प्रत्यक्षत्वे मानं पृच्छति । कुत इति । पूर्वपक्षी शाब्दोपमित्योरपि प्रत्यक्षत्वमङ्गीकुर्वाणो अनुभवत्वमेव प्रत्यक्षत्वे साधकं इत्युत्तरयति । अनुभवत्वादिति । अनुभवत्वप्रत्यक्षत्वयोः समनियतत्वे समनियतजातिद्वयानङ्गीकारेण अनुभवत्वं यदि जातिस्तदा प्रत्यक्षत्वमेव तदिति साध्याविशेष इति दूषयति । किमेवमिति । स्मृत्यन्यज्ञानत्वरूपोपाधिरेवानुभवत्वं प्रत्यक्षत्वसाधकमतो न साध्याविशेषः इत्याशङ्कते । स्मृत्यन्येति ।

ननु विशेषणज्ञानजन्यतावच्छेदिका अनुभवचतुष्टयसाधारणी जातिरेव साक्षात्करोमीत्यनुव्यवसायसांक्षिकं प्रत्यक्षत्वं न त्वनुमित्यादित्रयव्यावृता अन्यापि जातिश्च प्रामाणिकी तथा च प्रत्यक्षानुमानयोर्न पृथक् प्रमाणता । न च विशेषणज्ञानजन्यतावच्छेदकजातेरनुमित्यादिसाधारण्ये मानाभावः विशेषणज्ञानासत्त्वे परामर्शादिविरहेणैवानुमित्याद्यापत्त्ययोगादिति वाच्यम् । पृथिव्यामितरभेद इत्याकारकाप्रसिद्धसाध्यकानुमित्युत्पादकाले साध्यविशेषणकानुमितिवारणाय विशेषणधीजन्यतावच्छेदकस्य तत्साधारणताया आवश्यकत्वात् ।

यदि च पृथिवीतराभिन्नेत्यनुमितिः विशिष्टे वैशिष्ट्यावियिणीति विशेषणतावच्छेदकप्रकारकधीविरहान्न तस्याः साध्यविशेष्यकानुमित्युत्पत्तिदशायामापत्तिरित्युच्यते तदापि अनुमितेर्विशेषणतावच्छेदकप्रकारकधीजन्यतावच्छेदकाक्रान्ततयैव प्रत्यक्षानुमित्योः स्मृतिव्यावृत्तैकजातीयत्वमावश्यकं स्मृतिव्यावृत्तजातेरेव तज्जन्यतायामप्यवच्छेदकत्वात् यदि चान्वयिपरामर्शरूपकारणवि-

रहादेव नाप्रसिद्धसाध्यकस्थले साध्यतावच्छेदकविशिष्टवैशिष्ट्य-विषयकानुमितिः स्वतन्त्रसाध्यतावच्छेदकप्रकारकज्ञानदशायाम-प्यप्रसिद्धसाध्यकव्यतिरेकिपरामर्शात् साध्यविशेष्यिकैवानुमिति-रुपेयते साध्यप्रसिद्धेस्तत्र प्रतिबन्धकत्वानुपगमात् ।

यदि वा अप्रसिद्धसाध्यकस्थलेऽपि साध्यविशेष्यकानुमित्य-नुपगमे क्षतिविरहात् तादृशव्यतिरेकिपरामर्शात् सर्वत्र विशेष्ये विशेषणमित्यादिरीत्या साध्यविशेषणिकैवानुमितिरुपेयते,इत्युच्यते तदापि समानविषयकशाब्दबोधचाक्षुषादिसामग्रीकाले अनुमिति-धारणायानुमितित्वावच्छिन्नं प्रति तादृशसामग्र्याः पृथक् प्रतिबन्ध-कत्वं सिद्धान्तिना वाच्यम् अनुमितौ प्रत्यक्षविशेषत्वमते(१) मानसत्वावच्छिन्नं प्रति तादृशसामग्र्याः क्लृप्तप्रतिबन्धकतयैवो-पपत्तौ न तत्कल्पनमिति लाघवादनुमितौ प्रत्यक्षत्वसिद्धिर्निष्प्र-त्यूहैव । न च कथितशाब्दादिसामग्रीकाले(२) भिन्नविषयकानु-मित्युत्पत्त्या अनुमितेर्मानसत्वनये समानविषयकमानसत्वमेव ता-दृशसामग्रीप्रतिबध्यतावच्छेदकं वाच्यं तथा च भिन्नविषयका-नुमित्यन्यमानसासंग्रह इति वाच्यम् । भिन्नविषयकमानसेच्छामुत्ते-जकीकृत्य भिन्नविषयकमानसस्थले पृथक् प्रतिबन्धकताया भव-तोऽप्यावश्यकतया समानविषयकमानससाधारणप्रतिबध्यतया त-दसंग्रहे क्षतिविरहात् ।

न चानुमित्यन्यमानसस्थलीयप्रतिबन्धकतायामनुमितित्वप्रका-रकेच्छाया अतिप्रसङ्गभयेनानुत्तेजकतया अनुमितित्वप्रकारकेच्छा-मुत्तेजकीकृत्यानुमितिस्थले पृथक् प्रतिबन्धकत्वमुभयोरावश्यक-मिति नोक्तलाघवावकाश इति वाच्यम् । यद्विषयकशाब्दादिसाम-ग्रीकाले अनुमितित्वप्रकारेच्छया न कदाप्यनुमितिर्जाता तत्रैव दर्शितलाघवसम्भवात् ।

न च तत्र लाघवेऽपि यत्रानुमितित्वप्रकारकेच्छाबलादनुमि-तिर्जाता तत्स्थलीयानुमित्यन्यमानसनिष्ठप्रतिबध्यतायामनुमित्य-

(१) पृथक्प्रतिबन्धकत्वकल्पने गौरवमनुमितौ मानसत्वस्वीका-रे इति पु० पा० ।

(२)तत्र शाब्दादिसामग्रीकाल इति पु० पा० ।

ध्यमानसत्वमेवावच्छेदकं वाच्यम् अन्यथा असत्यां मानसत्वप्रकारकेच्छायां सत्याञ्च कथितशाब्दादिसामग्र्यां अनुमितित्वप्रकारकेच्छासत्त्वेऽप्यनुमित्यनुपपत्तेरिति गौरवमिति वाच्यम् । अनुमित्यन्यमानसे सर्वत्र लौकिकसन्निकर्षबलादात्मत्वभानोपगमेन लौकिकविषयितासम्बन्धेनात्मत्वस्यैवानुमित्यन्यमानसस्थलीयस्य (१)तादृशप्रतिबध्यतावच्छेदकत्वोपगमेनानुमितेरुपपादनादिति नोक्ताप्रयोजकत्वशङ्कत्यतोऽनुमितौ प्रत्यक्षत्वस्य बाधकमाह ।अनुमिताविति । साक्षात्कारित्वप्रसङ्गवारणप्रकारमाशङ्कते। तद्व्यञ्जकेति। सुरभि चन्दनमित्यादिचाक्षुषादेः सौरभादिसाक्षात्कारित्वेनानुव्यवसायवारणाय विशेष्यतासम्बन्धेन तत्तद्विषयधर्मितावच्छेदकतापन्नसाक्षात्कारित्वप्रकारकप्रत्यक्षं प्रति स्वरूपसम्बन्धेन तत्तद्विषयनिष्ठलौकिकसन्निकर्षादिजन्यत्वस्य हेतुत्वात्तद्विरहादनुमित्यनन्तरं न वह्निं साक्षात्करोमीत्यनुव्यवसायापत्तिरित्यर्थः । लौकिकसन्निकर्षादीत्यादिना दोषविशेषपरिग्रहः ।

आत्मानुमिताविति । तस्य । आत्मनिष्ठमनःसंयोगरूपलौकिकसन्निकर्षजन्यत्वस्य । न चैवमात्मोपनीतभाने भवतामपि न कथं साक्षात्कारित्वग्रहः अनुमितेरिव तस्यापि आत्ममनोयोगासमवायिकारणकत्वादिति वाच्यम् । मानसत्वावच्छिन्नाया एव मनोयोगजन्यतायास्तद्व्यञ्जकत्वोपगमात् मानसज्ञाने आत्मनो लौकिकसन्निकर्षादेव भानात् चाक्षुषादावेव तस्योपनीतस्य भानात् तत्र च मानसत्वावच्छिन्नजन्यताया अभावात् अनुमितौ मानसत्ववादिनाञ्च आत्मानुमितौ तादृश्या अपि जन्यताया अनपायादिति भावः ।

ननूक्तलाघवेनानुमितेर्मानसत्वसिद्धौ उक्तातिप्रसङ्गवारणाय साक्षात्कारित्वग्रहं प्रत्यनुमितिभेदस्य कारणत्वमेकं कल्पनीयमित्यतः प्रत्यक्षप्रमाणेनानुमितौ प्रत्यक्षत्वाभावं व्यवस्थापयति । वह्निमिति ।

यद्यपि वह्निं न साक्षात्करोमीति प्रतीतेरात्मनिष्ठो वर्त्तमानकालावच्छिन्नो वह्निसाक्षात्काराभाव एव विषयः न त्वात्मनिष्ठवर्त्तमानवह्निज्ञाने साक्षात्कारत्वाभावः स्वरूपतो भासमानसाक्षात्त्वजातेः पदार्थतावच्छेदिकाया अभावस्य तादृशशब्देनाप्रत्यायनात्,

(१) अनुमित्यन्यमानसत्वप्रकारकेच्छास्थलीयस्येति पु० पा० ।

तथाप्येकविशेषणविशिष्टाधिकरणे विशेषणद्वयविशिष्टाभावप्रतीतेः तद्विशेषणवति विशेषणान्तराभावपर्यवसन्नत्वमिति वह्निविषयकत्ववति ज्ञाने साक्षात्कारित्वरूपविशेषणाभावः प्रकृते पर्यवस्यतीत्याशयेनोक्तं साक्षात्कारित्वाभावेति ।

ननु सुरभि चन्दनमित्यादिचाक्षुषदशायां जातस्य सौरभं न पश्यामीति प्रत्ययस्येवोक्तप्रत्ययस्यापि भ्रमत्वमस्त्वित्यत आह । अगत्येति । चन्दनं पश्यामीत्यादिप्रतीत्या सुरभि चन्दनमित्यादिज्ञाने चाक्षुषत्वादेरावश्यकतया तत्र गत्यन्तरविरहेणैव सौरभं न पश्यामीत्यादौ चाक्षुषत्वाद्यभावांशे भ्रमत्वकल्पनमित्यर्थः । अनुमितौ च साक्षात्त्वानभ्युपगमेन न साक्षात्करोमीति प्रतीतेः प्रमात्वसम्भवात् न तत्परित्यागः धियां प्रमात्वस्यौत्सर्गिकत्वादिति भावः ।

अत्र नव्याः–सौरभं न पश्यामि न साक्षात्करोमीत्यादिप्रतीतेः प्रमात्वानुरोधेन लौकिकत्वाख्यो विषयताविशेषः कल्पयते, तद्विशिष्टचाक्षुषत्वाद्यभावो न पश्यामीत्यस्य, तदभाव एव न साक्षात्करोमीत्यस्य विषयः । न च तथापि सौरभनिरूपिततादृशविषयिताविशिष्टचाक्षुषाप्रसिद्ध्या सौरभं न पश्यामीत्यत्रागतिरेवेति वाच्यम् । चाक्षुषनिष्ठविषयितायां सौरभनिरूपितत्वाभावस्यैव तादृशप्रत्ययविषयत्वोपगमात् , अन्ध आकाशं न पश्यतीत्यादावपि कथञ्चित्प्रमात्वमुपपादनीयम् । न चातिरिक्तविषयिताऽपसिद्धान्ततया न स्वीकरणीयेति वाच्यम् । प्रतीत्यनुरोधेन तत्कल्पनेऽपसिद्धान्तभयस्याविरोधित्वात् । अत एवाभावत्वप्रतियोगित्वादीनामतिरिक्तपदार्थत्वं ग्रन्थकृतामनुमतम् । न चैवं प्रत्यक्षत्वजातिरेव प्रामाणिकी स्यात् तत्कार्यस्य लौकिकत्वेनैवोपपादनसम्भवादिति वाच्यम् । विशेषणज्ञानादिजन्यतावच्छेदकतयैव तत्सिद्धेः, विषयिताविशेषापेक्षया जातेस्तथात्वे लाघवात् सर्वांशोपनीतज्ञानस्य प्रामाणिकत्वे तदसंग्राहकतयापि लौकिकत्वस्य विशेषणतावच्छेदकप्रकारकज्ञानादिजन्यतावच्छेदकत्वासम्भवाच्च । एवञ्चानुमितेः प्रत्यक्षतामतेऽपि न तत्र साक्षात्त्वाभावग्रहानुपपत्तिरिति तस्याः प्रत्यक्षत्वाभावे युक्त्यन्तरमेवानुसन्धेयम् ।

सन्निकर्षविरहादित्यनुमानप्रामाण्यव्यवस्थापिकां मूलयुक्तिं सामान्यलक्षणानभ्युपगमपक्षे सङ्गमयति। सामान्येति । अप्रसिद्धवह्न्यादी-

ति । पूर्वाज्ञातपर्वतीयवह्न्यादीत्यर्थः । व्याख्यातम् । प्रत्यक्षविजातीयतया व्यवस्थापितम् । अन्येषां युक्तिमुपन्यस्यति । व्यवस्थापयिष्यत इति । केचिदित्यस्वरसोद्भावनम्, तद्बीजन्तु असन्निकृष्टस्याभावस्य साध्यतया अनुमितौ भानेऽपि तस्याः प्रत्यक्षत्वं निराबाधमेव यत्किञ्चिद्विषयसन्निकर्षजन्यतयैव प्रत्यक्षत्वनिर्वाहात्, साध्यांशे प्रकारतया भासमानस्याभावत्वादेः सामान्यस्यापि सन्निकर्षतया अज्ञातत्वमात्रेणाप्यसन्निकृष्टत्वानिर्वाहाच्च । न चाज्ञातस्य साध्यस्यानुमितौ ज्ञाने तादृशाभावविषयकोपनायकस्य तत्र व्यभिचारप्रसक्तिरेव तस्याः प्रत्यक्षत्वबाधिकेति वाच्यम् । प्रकारताया एव उपनायकज्ञानजन्यतावच्छेदकत्वोपगमेन व्यभिचारानवकाशात् । तन्मुख्यविशेष्यकमानसोपनीतभानेऽपि तस्य स्वांशे अभेदसम्बन्धेन प्रकारतोपगमेन तत्संग्रहात् । अन्यथा सामान्यप्रत्यासत्तिजन्याज्ञातविशेष्यकबोधे व्यभिचारस्य दुर्वारत्वात् ।

वस्तुतः साध्यतावच्छेदकप्रकारेणाज्ञानेऽपि अभावत्वादिना साध्यस्य सामान्यप्रत्यासत्त्यैव ज्ञानं प्राक् सम्भवतीति नोपनयस्य व्यभिचार इत्यनुसरणीयम् (१)अप्रसिद्धसाध्यकानुमितिमनभ्युपगम्य तादृशयुक्तिं दूषयतां परेषां मतमाह । तत्रेति । भेदत्वादिना । पृथिवीनिष्ठभेदत्वादिना । आदिना ह्रदे धूमात्यन्ताभाव इत्याद्यनुमितिप्रकारस्यात्यन्ताभावत्वस्य परिग्रहः । जलादिप्रतियोगिकत्वग्रहः । जलादिप्रतियोगिकत्वानुमितिः । जलादिप्रतियोगिकत्वं साध्यतया अनुमितेर्विषय इति यावत् । वृत्त्यनियामकसंसर्गस्य व्यापकताघटकत्वे तु जलादिरूपसाध्यस्य संसर्गतयाऽपि तत्प्रतियोगिकत्वं विषयः सम्भवतीति द्रष्टव्यम् । एतावतैव जलादिभेदस्य तादृरूप्येणाज्ञानदशायां पृथिव्यादिनिष्ठजलादिभेदसिद्ध्या कृतमप्रसिद्धसाध्यकानुमितिस्वीकारेण इति भावः । जलादिप्रतियोगिकत्वानुमापकान्वयिनोऽनुपस्थितिदशायामपि व्यतिरेकिणा तद्व्यक्तित्वादिनाऽपि तदनुमानसम्भवो बोध्यः ।

अत्राप्यपर इत्यस्वरससूचनाय, तद्बीजन्तु पृथिवीनिष्ठभेदत्वादिना भेदमात्रानुपस्थितावपि जलादिव्यापकाभावप्रतियोगित्वादिना भावेन पृथिव्यादौ जलादिभेदसिद्धेरप्रसिद्धसाध्यकानुमिति-

(१) इत्यनुसन्धेयमिति पु० पा० ।

मनभ्युगम्य दुरुपपादता, तदपलापे पक्षैकदेशे जलादिभेदस्य प्र- सिद्ध्यैव कदाचित् तत्तत्साध्यकानुमितेरव्युपपादनसम्भवात् ता- दृशानुमित्यैवाप्रसिद्धसाध्यकानुमानखण्डनौचित्यादिति ।

अनुमितिकारणविशिष्टपरामर्शानुपपत्तिरूपपूर्वपक्षमध्यकथित- बाधकमुद्धृत्य यो यत्र विशिष्य पूर्वमित्यादिनियमं स्थापयित्वा अनुमितिस्थले पक्षे साध्योपनीतज्ञानं सामान्यप्रत्यासत्तिमतेऽपि निराकुर्वाणस्य कस्यचिन्मतं निरसितुमुपन्यस्यति मूले कश्चिदिति। परम्परासम्बधेन व्याप्यत्वम् । परम्परासम्बन्धघटितव्याप्यत्वम्।

(चि०) भवतु तावदेवं तथापि जातिरेव लिङ्गं स्यात् न तु व्यक्तिः तथा च सर्वोपसंहारेण व्यक्तौ व्याप्तिग्रहार्थं सामान्यलक्षणप्रत्यासत्तिव्युत्पादनमफ- लं (१)स्यात्, दृश्यते च परम्परासम्बन्धज्ञानं विना जातिव्याप्तिमविदुषोऽपि धूमाद्वह्न्यनुमानम्, न हि व्याप्यतावच्छेदकतया भासमानस्यावश्यं व्याप्यता- ग्रहः,मानाभावात्,तस्मात् पक्षधर्मे व्याप्तिविशिष्टज्ञानं तदनन्तरविशिष्टवैशिष्ट्यज्ञानं पक्षे वा तृतीयलिङ्गप- रामर्शः।अन्ये तु स्वसमानाधिकरणात्यन्ताभावाप्रति- योगित्वं व्यापकत्वं तत्सामानाधिकरण्यञ्च व्याप्यत्वं तथा च लाघवात् व्यापकताज्ञानमनुमितिहेतुः, साध्य- स्य पक्षधर्मव्यापकताज्ञानञ्च परामर्शः, न तु साध्य- व्याप्तस्य पक्षधर्मताज्ञानं साध्यव्याप्यवत्पक्षधर्मताज्ञानं वा गौरवात् ।

(दी०)उपसंहरति । तस्मादिति । वाशब्दोऽनास्थायाम् उभ- यथापि प्रकृताक्षतेः। वस्तुतो व्याप्यपक्षयोर्वैशिष्ट्यावगाहिज्ञानत्वे- न हेतुत्वम्,विनिगमनाविरहेणान्यतराविशेषणाविशेष्यभावस्यातन्त्र-

(१) सामान्यलक्षणप्रत्यासत्त्युपादानमफलमिति पु० पा० ।

त्वात् । लाघवादिति । अथाऽव्याप्यवृत्तेर्व्यापकत्वसम्पत्तयेऽभाव-
स्य प्रतियोग्यसामानाधिकरण्यं वाच्यं तच्च स्वप्रतियोग्यनाधिकर-
णवृत्तित्वम् एवञ्चावृत्तिगगनादेर्धर्ममात्रव्यापकत्वं स्यात् तादृशघ-
टत्वाद्यभावाप्रतियोगित्वात् तदधिकरणाप्रसिद्ध्या च तदभाव-
स्य स्वप्रतियोग्यनधिकरणवृत्तित्वासम्भवात् तथा च तद्व्यावृत्तये
व्यापके हेतुसामानाधिकरण्यं वाच्यम् । न चैवं हेतोर्व्यापकसामा-
नाधिकरण्यापेक्षया लाघवमिति चेत्? अस्तु तावदेवमापाततस्तथापि
वृत्तिमत्त्वमात्रमुपादेयम् । न चैवं हेतोः साध्यसामानाधिकरण्य-
स्य संशये व्यतिरेकनिश्चये वा अनुमित्यापत्तिरिति वाच्यम् ।
संशये इष्टत्वात्, व्यतिरेकनिश्चये च पक्षधर्मत्वाग्रहे परामर्शविर-
हात्, तद्ग्रहे च साध्यासमानाधिकरणधर्मान्तरग्रहस्यैव तस्यापि
विरोधित्वात् अन्यथा त्विष्टत्वात्, पर्वतो वह्निव्याप्यधूमवान् पा-
षाणमयः पाषाणमयावृत्तिश्च वह्निरिति ज्ञानेन च तुल्ययोगक्षेमं
पर्वतवृत्तिधूमव्यापको वह्निर्धूमवदवृत्तिश्चेति ज्ञानम् । न च सा-
ध्याप्रतियोगिकस्वसमानाधिकरणयावदत्यन्ताभावकत्वं साध्या-
प्रतियोगिकत्वावच्छेदकस्वसमानाधिकरणात्यन्ताभावत्वकत्वं वा
व्याप्तिः साध्यप्रतियोगिकत्वञ्च केवलान्वयिनि साध्यस्यान्योन्या-
भावे सम्बन्धविशेषावच्छिन्नात्यन्ताभावे वा प्रसिद्धमिति वाच्य-
म् । गौरवात्, व्यापकत्वाद्यनन्तर्भावेन यावत्त्वस्य दुर्वचत्वात्,
प्रमाणाभावेन स्वरूपसम्बन्धविशेषरूपत्वासम्भवेनावच्छेदकत्व-
स्यानतिरिक्तवृत्तित्वपर्यवसायित्वाच्च । व्यापकतायाञ्च प्रतियो-
गित्वादेः सामान्याभावस्योक्तत्वात् सम्बन्धादिनिष्ठसाध्यप्रति-
योगित्वव्यक्तेरभावस्य व्यभिचारिसाधनसमानाधिकरणयावद-
त्यन्ताभाववृत्तितया त्वयापि तस्यावश्यं वाच्यत्वात् साधनसमा-
नाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपव्याप-

कत्वज्ञानमपेक्ष्य साध्यदन्यावृत्तित्ववत्त्वज्ञानस्य लघुत्वात् ।

(गा०) सामान्यप्रत्यासत्तिव्युत्पादनम् । सामान्यप्रत्यासत्तित्व-स्वीकारः । जातिमात्रस्य लिङ्गत्वोपगमेऽनुभवविरोधमप्याह । दृ-श्यते चेति ।

ननु धूमत्वेन धूमे व्याप्तिग्रहदशायां धूमत्वोपस्थितेरावश्यकतया तत्रापि परम्परासम्बन्धघटिता व्याप्तिः शक्यग्रहा, अधिकरणे धूम-त्वावच्छिन्नवत्त्वघटितधूमव्यापकताग्रहे धूमघटितसम्बन्धेन धूमत्व-स्याप्यधिकरणत्वांशे भानसम्भवेन धूमत्वव्यापकताया अपि वह्नौ भानसम्भवात् । धूमत्ववति संयोगेन वह्निमद्वृत्तित्वे भासमाने धू-मत्वेऽपि वह्निमतः स्वसंयोगिसमवायरूपपरम्परासम्बन्धभानसम्भ-वाच्चेति व्यक्तिव्याप्तिज्ञानदशायां जातिव्याप्त्यग्रह एवाप्रसिद्ध इत्यत आह । न हीति । मानाभावादिति । धर्मिणः साक्षात् सम्बन्धभाने धर्मस्य परम्परासम्बन्धभानानियमासिद्धेरिति भावः ।

अनुमित्यन्यथानुपपत्तेर्मानसत्त्वसम्भवेनात्रापरितोषात् तादृशानियमे बाधकं पूरयति दीधितौ । तन्निष्ठेति । अवच्छेदकधूमत्वादिनिष्ठम् । अ-वच्छेदकान्तरम् । धूमत्ववत्त्वादि । असम्भवात् । अवच्छेदकधूमत्वादौ अनुमित्यौपयिकव्याप्तिग्रहासम्भवात् । अभावे हेतुतावच्छेदकाविशिष्ट-हेतुसामानाधिकरण्यस्य व्यापकताघटकतया हेतुतावच्छेदकस्यापि तथात्वात् प्रकृते अविशेषितधूमत्वादिविशेषिताधिकरणस्य व्यापक-ताघटकत्वोपगमेऽपि धूमत्ववत्त्वादिप्रकारेण व्यापकसामानाधिकरण्य-प्रकारकज्ञानमेवानुमितिहेतुर्वाच्यः, सामानाधिकरण्यांशे निर्धर्मि-तावच्छेदकज्ञानस्यानुमित्यहेतुत्वात् तथा सति परम्परासम्बन्धेन धूमत्वादिशून्यतया निश्चीयमाने ह्रदादावपि वह्न्याद्यनुमानापत्तेः; व-ह्निसामानाधिकरण्यसामान्याभावस्य तत्राग्रहे केवलेन 'वह्निसमाना-धिकरणत्वेन धूमत्वादेस्तदा तत्र ग्रहसम्भवात् धूमत्ववत्त्वाद्यवच्छिन्न-सामानाधिकरण्यग्रहः कथं धूमत्ववत्त्वाद्युपस्थितिं विना सम्भवति, साध्याभाववदवृत्तित्वरूपा व्याप्तिरपि पक्षवृत्तौ व्याप्यतावच्छेदकनि-श्चयं विना प्रायशो दुर्निश्चयतया उपनीतविपरीतकोटेरपि भानसम्भ-वेन संशयसम्भवात्, निर्द्धर्मितावच्छेदककसंशयासम्भवेन(१) सा-

(१) संशयानुपगमेनेति पु० पा० ।

ध्यामाववद्वृत्तिमानिति निश्चयसम्भवेऽपि पक्षवृत्तित्वावच्छेदेन व्यभिचारसंशये च पक्षः साध्याभाववद्वृत्तिमानिति निश्चयोऽपि दुर्घट इति भावः । मानाभावादित्यस्य मानस्यावच्छेदके व्याप्तिप्रमितिजनकस्य तन्निष्ठावच्छेदकान्तरग्रहस्याभावात् नियमेनासत्त्वादित्यर्थसम्भवेन पूरणं विनापि निर्वाह इति द्रष्टव्यम् । तस्मादित्यादेरव्यवधानव्यवस्थापितानुमानप्रामाण्योपनयप्रत्यासत्तित्वयोरुपसंहारत्वासम्भवात् प्रागव्यवस्थापितविशिष्टपरामर्शहेतुत्वोपसंहारत्वमाविष्कर्त्तुमाह । उपसंहरतीति । मूले पक्षधर्मे व्याप्तिविशिष्टज्ञानमिति । विशेष्यतायां विशेषणतायां वा अवच्छेदिकया व्याप्त्या प्रकारेण विशेष्यस्य विशेषणस्य वा पक्षीयहेतोर्ज्ञानं प्रथमत इत्यर्थः, एतज्ज्ञानं सामान्यलक्षणाप्रत्यासत्तित्वमते स्मरणमेव अन्यथा तु महानसीयधूमादिविशेष्यकव्याप्तिस्मरणाधीनं प्रत्यक्षं तत्र च व्याप्तिपक्षधर्मतयोरेकत्र द्वयमित्यादिरीत्या भानेऽपि न तस्य व्याप्तिविशिष्टधूमे पक्षधर्मतायाः पक्षे वा तादृशधूमस्य वैशिष्ट्यावगाहित्वं सम्भवति तादृशबुद्धौ व्याप्तिविशिष्टधूमज्ञानस्य विशेष्यतावच्छेदकविशिष्टविशेष्यादिज्ञानविधया हेतुत्वात् । अत एव न तस्यानुमितिहेतुताऽपि, तत्साधारणेन एकत्र व्याप्तिपक्षधर्मतोभयावगाहिज्ञानत्वेनानुमितिहेतुव्याप्त्यंशे संशयादनुमितिवारणाय तदन्यत्वस्यानुमितिजनकतावच्छेदके निवेशापातात् विशिष्टवैशिष्ट्यावगाहित्वेनैवानुमितिजनकत्वोपगमादिति । तदनन्तरमिति । तदनन्तरजातमित्यर्थः । विशिष्टवैशिष्ट्यज्ञानम् । व्याप्तिविशिष्टे पक्षवैशिष्ट्यावगाहिज्ञानत्वावच्छिन्नम् । पक्षे वा तृतीयलिङ्गपरामर्शः । पक्षे व्याप्तिविशिष्टप्रतियोगिकवैशिष्ट्यज्ञानत्वावच्छिन्नं वा । अनुमितिहेतुरिति शेषः । उभयोः पक्षयोस्तुल्यतया पूर्वत्रापरितोषाभावाद्वाकारः एकत्रानिर्भरसूचकतया व्याचष्टे दीधितौ । वेति ।

ननु पूर्वमेकविधस्यैव परामर्शस्यानुमितिहेतुतायाः प्रतिज्ञातत्वादत्र विकल्पेनोभयविधस्य तद्धेतुत्वोपसंहारविरोध इत्यत आह । उभयथेति । प्रकृताक्षतेरिति । अनुमितिलक्षणनिर्वाहादित्यर्थः, यादृशस्य हेतुता तादृशपरामर्शजन्यताया एवानुमितिलक्षणे निवेश्यत्वादिति भावः । एवञ्च पक्षधर्मस्य व्याप्तिविशिष्टज्ञानम् अनुमितिहेतुरित्यस्यापि पक्षतावच्छेदकावच्छिन्नविशेष्यकं व्याप्य-

प्रकारकं व्याप्यवच्छिन्नविशेष्यकं पक्षप्रकारकं वा ज्ञानमनुमिति-हेतुरित्येवार्थ इति नोपक्रमविरोध इत्याशयः। उक्तपरामर्शयोरेक-स्मादेवानुमितिर्नान्यस्मादित्यत्र युक्तिविरहेण प्रत्येकरूपावच्छि-न्नस्य न जनकत्वम् उभयासंग्राहकत्वादिति मूलोपर्यस्वरसं प्रका-शयन् उभयानुगमकं कारणतावच्छेदकमाह। वस्तुत इति। अथ वा मूलस्थवाकारः समुच्चये, तथा च प्रत्येकरूपेण हेतुत्वं न विव-क्षितम् अपि तूभयोरनुगतरूपेणैवेत्याह। वस्तुत इति। विनिगमना-विरहेण। विनिगमनाभावात्, हेतुभूतयोरुभयोरसङ्ग्राहकत्वेन। अ-तन्त्रत्वात्। विशिष्य जनकतानवच्छेदकत्वात्।

इदमत्र बोध्यम्, व्याप्यपक्षयोर्वैशिष्ट्यावगाहित्वं न वास्तवं प-क्षानुयोगिकं व्याप्यप्रतियोगिकं यद्वैशिष्ट्यं हेतुतावच्छेदकसम्बन्धः तदवगाहित्वं भ्रमस्थलासङ्ग्रहात्, व्याप्त्याद्यनवगाहिज्ञानसाधार-ण्याच्च। नापि व्याप्यप्रतियोगिकत्वपक्षानुयोगिकत्वोभयोपरागेण तादृशसंसर्गावगाहित्वं सम्बन्धसंसर्गकज्ञानासङ्ग्रहात् संसर्गानुयो-गित्वप्रतियोगित्वयोर्विशिष्टबुद्ध्यविषयत्वात्, समूहालम्बनवैलक्ष-ण्यस्य विषयतावैलक्षण्येनैवोपपत्तेः। नापि व्याप्यपक्षोभयोपरागे-ण तादृशसंसर्गावगाहित्वं तत्, तच्च तदुभयनिरूपितहेतुतावच्छे-दकसम्बधीयसंसर्गताकत्वं, भ्रमस्थले उभयांशे संसर्गाप्रसिद्धा-वपि संसर्गताया विशेष्यविशेषणोभयनिरूपितत्वान्नानुपपत्तिरि-ति, एवं सति पर्वतवान् व्याप्य इत्यादिज्ञानादप्यनुमित्यापत्तेः। न च तत्र संयोगरूपहेतुतावच्छेदकसम्बन्धावच्छिन्नाधारत्वं सम्बन्धः न तु संयोगस्तस्य उभयनिष्ठत्वात् तादृशबुद्धेरपि प्रमात्वप्रसङ्गात्, यत्र संयोगो व्याप्यताघटकसम्बन्धस्तत्र पक्षे संयोगावच्छिन्नाधार-तया व्याप्यप्रकारकाद्व्याप्ये च संयोगावच्छिन्नाधेयतया पक्ष-प्रकारकाज् ज्ञानान्नेष्यते एवानुमितिरपि तु संयोगमात्रेण तदेकत-रांशेऽपरप्रकारकज्ञानादेवेति वाच्यम्। एवमपि यत्राधारत्वादिरेव व्याप्यताघटकम्बन्धस्तत्रोक्तज्ञानादनुमित्यापत्तेर्दुर्वारत्वात्।

अथ संयोगो यत्र हेतुतावच्छेदकसम्बन्धस्तत्रैव व्याप्यपक्षोभ-यवैशिष्ट्यावगाहित्वेन हेतुता स्वीक्रियते न तु संयोगावच्छिन्नाधार-तादिर्यत्र हेतुतावच्छेदकसम्बन्धस्तत्रापि तत्र तेन सम्बन्धेन हे-तुप्रकारकपक्षविशेष्यकपरामर्शस्यैवानुमितिहेतुतया तादृशपरा-

मर्शत्वस्यैव जनकतावच्छेदकत्वोपगमात् । न हि तत्र संयोगावच्छिन्नाधेयतासम्बन्धेन व्याप्यांशे पक्षप्रकारकभानमपि हेतुः, तस्य हेतुतावच्छेदकसम्बन्धानवगाहित्वात् तद्धेतुत्वे उक्तरूपेण तत्संग्रहासम्भवाच्च इति चेत्तर्हि संयोगो यत्र हेतुतावच्छेदकसम्बन्धस्तत्रापि तेन सम्बन्धेन हेतुप्रकारक एव परामर्शो हेतुर्न तु तेन सम्बन्धेन पक्षप्रकारकोऽपि, तथा सति हेतुनिष्ठे साध्यशून्येऽपि द्रव्ये हेतुविशेष्यकतद्द्रव्यप्रकारकयथार्थपरामर्शादनुमित्यापत्तेः सल्लिङ्गकपरामर्शाद् बाधितार्थविषयकलाघवज्ञानादिरूपदोषासमवहितात् भ्रमानुमित्युत्पत्तेः सर्वानुभवविरुद्धतया इष्टापत्त्ययोगात्, तथा च तत्रापि उक्तानुगतरूपेण हेतुता न युज्यत इति क्व तथा हेतुत्वम् । न च साध्यशून्ये हेतुसंयोगसत्त्वे तेन सम्बन्धेन व्याप्तिरेव बाधितेति कथमुक्तस्थले प्रसञ्जितभ्रमानुमितिजनकस्य परामर्शस्य यथार्थता इति वाच्यम् । हेतुसंयोगिन्यपि हेतुवृत्तिद्रव्ये हेतुसंयोगानुयोगित्वविरहेण तत्र साध्याभावस्य व्याप्त्यविघटकत्वात्, अन्यथा संयोगेन तद्घटादेस्तद्घटान्यत्वाद्यव्याप्यताप्रसङ्गात् साध्याभाववति तद्घटादौ तद्घटादिसंयोगसत्त्वात् ।

अत्र वदन्ति धूमवान् पर्वतः धूमः पर्वते इत्युभयत्रैव संयोगः सम्बन्धतया भासते न तु संयोगावच्छिन्नाधारत्वाधेयत्वे, तथा सति संयोगस्य सम्बन्धताविलोपप्रसङ्गात् । एवञ्च तादृशज्ञानयोर्विषयतावैलक्षण्येन मिथो वैलक्षण्येऽपि धूमवान् पर्वतः धूमे पर्वत इत्यनयोः पर्वतवान् धूमः पर्वते धूम इत्यनयोश्चाविशेषप्रसङ्गात् तस्माद् धूमवान् पर्वत इत्यत्र धूमः पर्वते इत्यत्र च सम्बन्धस्य सम्बन्धविधया धूमे प्रतियोगित्वं पर्वते चानुयोगित्वं भासत इत्युपेयम्, धूमे पर्वतः पर्वतवान् धूमः इत्यनयोश्च धूमेऽनुयोगित्वं पर्वते प्रतियोगित्वं भासत इति ताभ्यां विशेषः । न च विशेषणस्यानुयोगित्वभाने विशेष्यस्य च प्रतियोगित्वभाने विशेषणविशेष्यभाववैपरीत्यप्रसङ्ग इति वाच्यम् । यतो विशेषणत्वविशेष्यत्वे न भासमानवैशिष्ट्यप्रतियोगित्वानुयोगित्वे, अपि तु विषयताविशेषावेव इत्याशयेन ग्रन्थकृता उक्तानुगमकरूपस्य कारणतावच्छेदकत्वमङ्गीकृतम्, तथा च व्याप्यांशे सम्बन्धस्य प्रतियोगित्वं पक्षे चानुयोगित्वमवगाहमानतैव व्याप्यपक्षोभयवैशिष्ट्यावगाहितेति ।

वस्तुतः सम्बन्धानुयोगिनि सम्बन्धप्रतियोगिनस्तेन सम्बन्धेन विशिष्टबुद्धिः प्रमा धूमपर्वतसंयोगस्य धूमपर्वतयोः प्रतियोग्यनुयोगिभावो न विपरीतयोरिति पर्वतवान् धूम इति ज्ञानस्याधारतानवगाहित्वेऽपि न प्रमात्वप्रसङ्ग इति संयोगमात्रस्यैव सम्बन्धत्वं न स्वाधारत्वस्याधिकस्य, तस्यापि सम्बन्धत्वानुपपत्त्या द्विष्ठतायाः स्वीकरणीयतया विशेषणविशेष्ययोः तदीयप्रतियोगित्वानुयोगित्वयोः प्रमात्वनियामकतां विना भवतोऽप्यतिप्रसङ्गस्य दुर्वारत्वात्। सम्बन्धविशेषानुयोगित्वमेवाधारत्वमिति चेद्भवतु तथापि स्वरूपसत एव तस्य प्रमात्वनियामकतया न तस्य सम्बन्धिसम्बन्धतेति।

अत्र वदन्ति, संयोगमात्रस्य सम्बन्धत्वे पर्वतवान् धूमः पर्वते धूम इत्यनयोः को विशेषः? आद्ये धूमांशे पक्षस्य संयोगः सम्बन्धः परत्र च पक्षसंयोगस्य प्रतियोगित्वं तथेति चेत्? आद्ये संयोगानुयोगित्वं सम्बन्धः परत्र च संयोग एव पक्षस्य तथेत्येव किं न स्यात्? अनुयोगित्वान्यसम्बन्धस्थले विशेष्ये प्रतियोगित्वस्यापि प्रमात्वानियामकतया वक्तुं शक्यत्वात् शब्दानुगमस्यानपेक्षणीयत्वात् तस्माद् यत्र संयोग एव सम्बन्धस्तत्र प्रतियोग्यनुयोगिभावो धर्मधर्मिणोस्तत्सम्बन्धतया भासत इत्युपगम्यैव उक्तप्रत्यययोर्वैलक्षण्यमुपेयम् आधाराधेयभावस्य तुल्यवित्तिवेद्यताप्रवादोऽप्येवं सङ्गच्छते (१)। तथा च व्याप्यांशे सम्बन्धस्य प्रतियोगित्वं पक्षांशे चानुयोगित्वमवगाहमानैव व्याप्यपक्षवैशिष्ट्यावगाहितेति न कश्चिदतिप्रसङ्गः।

इदन्तु तत्त्वम्, तद्वानयमित्यत्र विशेष्ये विशेषणस्य संयोग एव सम्बन्धः, तत्रेदम् इत्यत्र च संयोगावच्छिन्नाधेयत्वमित्येव विशेषः, प्रथमे संयोगावच्छिन्नाधारत्वं परत्र च संयोगमात्रं सम्बन्ध इति वैपरीत्यस्य न प्रसक्तिः। विशेष्ये सम्बन्धानुयोगितायाः प्रमात्वनियामकतया धूमे पर्वत इत्यादिबुद्धेः प्रमात्वापातात्, एवञ्च सम्बन्धविधया भासमानसंयोगादेः प्रतियोगित्वानुयो-

(१) अथेत्यादिः सङ्गच्छते इत्यन्तः पाठः केषुचिदादर्शपुस्तकेषु नास्ति।

गित्वभानमप्रामाणिकम् । एवञ्च पक्षविशेष्यकपरामर्श एवानुमिति· हेतुर्न पर इत्यत्र विनिगमकमपि सुलभं व्याप्यविशेष्यकपरामर्शस्य संयोगावच्छिन्नाधेयतासंसर्गकत्वेनैव हेतुतया वाच्यतया तदपे· क्षया पक्षविशेष्यकधियः संयोगसंसर्गकत्वेन (१)हेतुत्वे लाघवादि- ति । हेतुसाध्यसामानाधिकरण्याघटितत्वेन मूलोक्तव्याप्त्यपेक्षया व्यापकत्वस्य लाघवं निराकर्त्तुं व्यापकत्वे तन्निवेशयितुमाशङ्कते । अथेति । तच्च स्वप्रतियोग्यनधिकरणवृत्तित्वमिति । स्वम् । वृत्तित्वा· न्तविशेष्यतया विवक्षितोऽभावः।स्वप्रतियोग्यधिकरणवृत्तिर्यो यस्त· दन्यत्वनिवेशे संयोगि सत्त्वादित्यादावतिव्याप्तिरिति भावः । धर्म· मात्रस्य व्यापकत्वं येन येन सम्बन्धेन यद्यत् क्वचिदपि सम्बद्धं तेन तेन सम्बन्धेन तत्तत् प्रति येन येन सम्बन्धेन स्वमवृत्ति तेन तेन सम्बन्धेन व्यापकत्वम् । तादृशेति । प्रतियोग्यनधिकरणवृत्तीत्यर्थः । गगनादेर्हेतुमन्निष्ठस्वाभावप्रतियोगित्वमकिञ्चित्करमित्याह । तदधि· करणेति । तदधिकरणम् । गगनाद्यधिकरणम् । तदभावस्य । गगनाभाव· स्य । तद्व्यावृत्तये । उक्तापत्तिवारणाय । हेतुसामानाधिकरण्यं व्याप- कताघटकं वाच्यम् । न चैवम् । एवञ्च न । समाधत्ते । अस्तु तावदिति । एवम् । गगनाद्यभावस्य प्रतियोग्यसामानाधिकरण्यविशेषणेन व्या· वृत्तिः,वस्तुगत्या उभयाभावघटितस्य प्रतियोग्यसामानाधिकरण्यस्य गगनाद्यभावसाधारणतया व्याप्तिवादे दर्शितत्वान्न तद्व्यावृत्तिरित्य· भिप्रेत्य उक्तम् । आपातत इति । वृत्तिमत्त्वम् । व्यापकताघटकसम्बन्धे· न सम्बन्धित्वं,न तु तेन सम्बन्धेन हेतुसामानाधिकरण्यपर्यन्तमि- ति शेषः । हेतुसाध्ययोरसामानाधिकरण्यज्ञानं जनकज्ञानाघटकत्वे· नैवानुमितिविरोधि तच्च तदैवोपपद्यते यदि तयोः सामानाधिकर· ण्यज्ञानम् अनुमितिजनकं भवतीति शङ्कते । न चैवमिति । एवम् । हेतुसाध्यसामानाधिकरण्यज्ञानस्याहेतुत्वे । पक्षधर्मत्वाग्रहे । तदग्र· हदशायाम् । परामर्शविरहात् । पक्षधर्मतया हेत्ववगाहितद्व्याप- कताज्ञानरूपानुमितिकारणविरहेण तदापत्त्ययोगात् । तद्ग्रहे । तद्· ग्रहदशायाम् । साध्यसमानाधिकरणधर्मान्तरग्रहस्यैवेति । साध्या· समानाधिकरणतया निश्चितजलत्वादौ पक्षधर्मताग्रहस्यैवेत्यर्थः त-

---

(१) संयोगविषयकत्वेनैवेति पु० पा० ।

स्यापि। प्रकृतहेतौ पक्षधर्मताग्रहस्यापि। विरोधित्वात्। तद्वदवृत्तित्वस्य तदभावव्याप्तिपर्यवसिततया साक्षादेवानुमितिविरोधित्वात्,

साध्यवदवृत्तितया धर्मान्तरस्य ग्रहो न साध्याभावव्याप्तित्वेन तद्व्याप्तिविषयक इति तद्विषयधर्मान्तरस्य पक्षे ग्रहेऽप्यनुमितिरिष्यत एवेति यदि तदा प्रकृतेऽपि तुल्यमित्याह। अन्यथेति। एतन्मते च विरोधः साध्याभावव्याप्यत्वं, असाधारण्यञ्चावृत्तित्वं, गगनादेरेव अनुकूलतर्कविरहेणासाधारण्यसन्देहादेव शब्दत्वादिकं शब्दादौ नित्यत्वाद्यसाधकमित्यवधेयम्।

अस्तु हेतौ साध्यवदवृत्तित्वग्रहसहितः पक्षधर्मताग्रहो विरोधिधर्मवत्ताज्ञानविधया साक्षादनुमितिविरोधी तथापि साध्ये हेत्वसामानाधिकरण्याग्रहकाले अनुमित्यापत्तेर्दुर्वारतया साध्ये हेतुसामानाधिकरण्यधीरनुमितिहेतुरवश्यमेव वाच्येत्यत आह। पर्वत इति। ज्ञानेन तुल्ययोगक्षेममिति। ज्ञानमिति। प्रथमज्ञानकाले अनुमित्यनुत्पादे ग्राह्यविरोधितया गृह्यमाणधर्मग्रहस्येव ग्राह्यं यद्विरोधितया गृहीतं तद्धर्मग्रहस्याप्यनुमितौ साक्षाद्विरोधितया द्वयोरेव तथात्वं, तदा अनुमित्युपगमे च प्रकृतेऽप्यनुमितिरिष्यत एवेत्यर्थः साध्यहेत्वोरसामानाधिकरण्यग्रहात् कदाचिदनुमित्यनुत्पादानुभवश्चासामानाधिकरण्यस्याव्यापकत्वव्याप्यतया तद्ग्रहदशायामसामानाधिकरण्यग्रहस्य व्यापकताधीविरोधित्वादिति भावः।

व्याप्तिव्यापकतयोः साम्याय व्याप्तावपि न साध्यहेत्वोः सामानाधिकरण्यान्तर्भाव इति शङ्कते। न चेत्यादिना। साध्येति। साध्यतावच्छेदकावच्छिन्नप्रतियोगिकस्वावच्छिन्नसमानाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकयावदभावकधर्मवत्त्वमित्यर्थः। साध्यतावच्छेदकानवच्छिन्नस्वावच्छिन्नसमानाधिकरणाभावीयसाध्यतावच्छेकसम्बन्धावच्छिन्नयावत्प्रतियोगिताकधर्मवत्त्वमिति तु परमार्थः (१) अतो वह्निमान् धूमादित्यादौ हेतुमन्निष्ठस्य संयोगेन गुणाद्यभावस्य स्वरूपसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नाभावसमनियततया तदभावाभिन्नत्वेऽपि न क्षतिः, अभावैक्येऽपि प्रतियोगिताभेदात्। यावदर्थस्य लघोर्दुर्वचत्वमाशङ्क्याह। साध्यप्रतियोगिकत्वेति। अत्रापि साध्यतावच्छेदकानवच्छिन्नत्वावच्छेदकस्व-

(१) इति तु फलितार्थ इति पु० पा०।

विशिष्टसमानाधिकरणाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितात्वकत्वमिति पर्यवसितोऽर्थः (१) अवच्छेदकत्वञ्चेदं स्वरूपसम्बन्धात्मकमनतिप्रसक्तत्वनियतम् इत्यभिमानः। बहुव्रीह्यर्थः सम्बन्धः उभयत्रैव यः कश्चन सम्बन्धत्वेन सम्बन्धविधया प्रविष्टः, प्रमेयसामान्यसाध्यकस्थले अन्योन्याभावेऽपि न साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वप्रसिद्धिरतः सम्बन्धविशेषावच्छिन्नात्यन्ताभावे वेति । संयोगादिसम्बन्धावच्छिन्नाभावे वेत्यर्थः । प्रथमे गौरवं प्रकाशयति । व्यापकत्वाद्यनन्तर्भावेनेति । तथा च तदन्तर्भाव आवश्यक इति भावः । द्वितीये गौरवं प्रकाशयति । प्रमाणाभावेनेति । प्रतियोगित्वादिभिरेव समं अनतिप्रसक्तधर्मस्य स्वरूपसम्बन्धात्मकावच्छेद्यावच्छेदकभावस्यानुभविकत्वादिति भावः । अनतिरिक्तवृत्तित्वपर्यवसायित्वात् । अनतिरिक्तवृत्तित्वरूपत्वात् । ननु व्यापकतायामपि स्वसमानाधिकरणाभावीययत्किञ्चित्प्रतियोगिकत्वाद्यभावमादाय अतिप्रसङ्गवारणाय यावत्तदभावकूटो निवेश्य इति यावत्त्वनिवेशस्तुल्य इत्यत आह । व्यापकतायाश्चेति । प्रतियोगित्वादेरित्यादिना निष्कृष्टलक्षणघटकतदवच्छेदकत्वपरिग्रहः । सामान्याभावस्य । तादृशप्रतियोगितात्वाद्यवच्छिन्नाभावस्य । इदञ्चावच्छिन्नत्वं प्रतियोगित्वे सर्वमत एव स्वरूपसम्बन्धः न तु व्यापकत्वं, अन्यथा दर्शितव्याप्तिलक्षणप्रविष्टसाध्यप्रतियोगिकत्वसामान्याभावस्यापि व्यापकतान्तरघटिततया महागौरवापत्तेरित्याह । सम्बन्धादिनिष्ठेति । आदिपदं सम्बन्धान्तरावच्छिन्नाभावपरिग्राहकम् । सम्बन्धप्रतियोगित्वाभावप्रतियोगित्वयोर्वैलक्षण्येऽप्यतिप्रसङ्गस्य दुर्वारताव्यञ्जकम् । तस्य । सामान्याभावस्य । स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदककत्वाभिधानेऽपि तादृशसाध्यतावच्छेदकीयसम्बन्धस्याधिकस्य हेतोर्द्विधा विषयतायाश्च कारणतावच्छेदके निवेशनीयतया व्याप्यवत्तापरामर्शहेतुतागौरवं दुष्परिहरमेवेति भावः । व्यापकसामानाधिकरण्यरूपव्याप्तिधीहेतुतामतेऽपि व्यापकताप्रदर्शकोदाहरणप्रयोगसङ्गतेरत एवेत्याद्युपष्टम्भासङ्गतिरत आह । साधनेति ।

(चि०) अत एव यो यो धूमवान् स सोऽग्निमानि-

---

(१) इति फलितार्थ इति पु० पा० ।

त्युदाहरणवाक्ये साध्यायोगव्यवच्छेदेन धूमव्यापकता वह्नेरुपदर्श्यते, अन्यथा वह्निमानेव धूमवानित्यन्ययोगव्यवच्छेदेनोदाहरणशरीरं स्यात् दोषोऽपि व्यभिचारादिर्न पक्षधर्मव्यापकं साध्यमित्येवोद्भाव्यः ।

(दी०) तद्धेतुतावादिनं निरस्यति । अत एवेत्यादिना । वीप्सासमभिव्याहारादिवशादुद्देश्यधर्मवद्वृत्तेरत्यन्ताभावस्यान्योन्याभावस्य वा प्रतियोगित्वाभावो विधेयधर्मे तद्वति वा भासते, न तु विधेयधर्मतद्वतोरत्यन्तान्योन्याभावानधिकरणत्वमुद्देश्यधर्मवति, यद्यदभिधेयं तत्प्रमेयमित्यादावसम्भवादिति भावः । साध्येति । अयोगः । अभावप्रतियोगित्वम्, तथा च साध्ये साधनवन्निष्ठाभावप्रतियोगित्वव्यवच्छेदेनेत्यर्थः । स्यादिति । न स्याच्च केवलान्वय्यनुमानमित्यपि द्रष्टव्यम् । न पक्षेति । एतच्च विरोधस्यातिस्फुटत्वमभिसन्धाय, साध्याभाववद्वृत्तित्वबुद्धेरपि व्यापकताधीविरोधित्वादिति वदन्ति ।

(गा०) ननु वीप्सावशात् उद्देश्यधर्मधूमादौ विधेयवह्निमदन्यावृत्तित्वमेव प्रतीयते, न तु विधेयधर्मे उद्देश्यगतधर्मव्यापकत्वं इत्युपेयमतो न साध्यवदन्यावृत्तित्वज्ञानहेतुतामतेऽप्युक्तोदाहरणासङ्गतिरित्यत आह । वीप्सेति । वीप्सासमभिव्याहारः । वीप्सितपदसमभिव्याहारः।उद्देश्यधर्मः। उद्देश्यगतधर्मः, स च वीप्सितयत्पदेतरोद्देश्यवाचकपदघटितवाक्ये ग्रामो ग्रामो रमणीय इत्यादौ तत्पदोपस्थाप्यो ग्रामत्वादिरूपोद्देश्यतावच्छेदकधर्म एव यत्पदवीप्सास्थले यो यो धूम-

वानित्यादौ तु यत्पदार्थविधेयतया विवक्षितो धूमादिः तस्यापि यत्तद्घटितवाक्यद्वयोद्देश्यधर्मिसम्बद्धतया विवक्षितत्वात् । अन्योन्याभावघटितव्यापकताया लघुत्वादन्योन्याभावस्य चरममुपादानम् । प्रतियोगित्वाभावः । प्रतियोगितानवच्छेदकावच्छिन्नत्वम् । विधेयधर्मे । विधेयकोटिनिविष्टधर्मे । स च धर्मो ग्रामो ग्रामो रमणीय इत्यादौ यथायोगं द्विरुक्तोद्देश्यवाचकपदसमभिव्याहृतपदोपस्थाप्यो विधेयतावच्छेदकरमणीयत्वादिः विधेयो रमणीयाभेदादिश्च, यो यो धूमवान् स वह्निमान् स न ह्रद इत्यादौ च वीप्सितपदघटितवाक्यान्तरस्थपदोपस्थाप्यो वह्न्यादिरूपविधेयतावच्छेदको ह्रदभेदादिरूपो विधेयश्च विधेयधर्मतद्वतोरत्यन्तान्योन्याभावप्रतियोगित्वाभ्यां यथासंख्यमन्वयः । उद्देश्यविधेयधर्मौ वीप्सितपदघटितवाक्योपस्थाप्योद्देश्यतावच्छेदकविधेयावित्यपव्याख्यानम्, यो यो धूमवान् स वह्निमानित्यादौ धूमवह्न्याद्योर्विभिन्नवाक्योपस्थाप्ययोर्यत्तत्पदार्थांशे विधेयत्वात्, धूमादेर्वह्न्याद्युद्देश्यतावच्छेदकत्वविरहात् ।

यत्तु यत्तत्पदयोस्तात्पर्यग्राहकत्वमेव, धूमवान् वह्निमानित्यनयोरेवोद्देश्यविधेयभावेनान्वय इति, तदशुद्धम्, यो य इच्छति स जानाति इत्यादावाख्यातार्थस्य व्युत्पत्तिविरोधेन धर्मानुपस्थित्या च उद्देश्यतावच्छेदकत्वासम्भवात् । यत्पदाभ्यां विरूपेणोपस्थितयोरपि तत्पदेन परामर्शादिति मणिकारलिखनविरोधाच्च ।

एतेन पूर्ववाक्यमेव निरर्थकं उत्तरवाक्यस्थतत्पदं धूमाद्यवच्छिन्नपरमित्यपि निरस्तम् । अप्रक्रान्तस्य तत्पदेन परामर्शायोगाच्च । विधेयधर्मतद्वतोरत्यन्तान्योन्याभावाभ्यां यथासंख्यमन्वयः । उद्देश्यधर्मवतीति । न तु भासते इत्यनेनान्वयः । धूमवति वह्नितद्वतोरत्यन्तान्योन्याभावानधिकरणत्वभाने अर्थाद् धूमे वह्निमदन्याधिकरणत्वाभावरूपव्याप्तिलाभः सम्भवतीति न परानभिमतप्रतिक्षेपशङ्का । अत एव वह्निमानेव धूमवानित्यादिमूलस्यापि सङ्गतिः, वह्निमदन्यतादात्म्यव्यवच्छेदवत्त्वेन धूमवत एव तादृशवाक्यात् प्रतीतिः । असम्भवादिति । विधेयधर्माद्यभावाप्रसिद्धेरित्यर्थः । इदमत्रावधेयम्, ग्रामो ग्रामो रमणीय इत्यादौ ग्रामत्वव्यापकत्वविशिष्टभेदादेरुद्देश्ये रमणीयादिसम्बन्धत्वोपगमाद्व्यापकता-

बोधनिर्वाहः, व्यापकत्वस्यापदार्थत्वेन प्रकारत्वायोगात् ।

न च द्विरुक्तग्रामपदं ग्रामत्वव्यापकताविशिष्टार्थकं तस्य चाभेदसम्बन्धेन विधेयान्वयः शक्तिग्राहकन्तु द्विरुक्तानुशासनमेवेति वाच्यम् । तथा सति उद्देश्यतया ग्रामादीनामन्वयानुपपत्तेः स्वातन्त्र्येणानुपस्थितत्वात् ।

न चैकग्रामपदं उद्देश्यवाचकमपरश्चोक्तार्थकमिति वाच्यम् । एकपदस्थाने उभयात्मकपदद्वयादेशात् (१)पदद्वयस्यैवाभावात्, द्वितीयाद्यर्थकर्मत्वादौ प्रकृत्यर्थस्याधेयतयैवान्वयस्य व्युत्पन्नतया ग्रामं ग्रामं ददातीत्यादौ वीप्सितपदस्य व्यापकतार्थकत्वे व्यापकादिकर्मकदानादेः प्रत्ययापत्तेश्च । न चोद्देश्यविधेयभावस्थले वीप्सां विनापि उद्देश्यतावच्छेदकावच्छेदेन विधेयभानाद्व्यापकताबोधार्थं द्विरुक्तप्रयोगो व्यर्थ एव यदि व्यापकताया न प्रकारतेति वाच्यम् । उद्देश्यतावच्छेदकसामानाधिकरण्यमात्रेणापि क्वचिद्विधेयबोधाद्व्यापकतापरत्वस्फुटीकरणाय द्विरुक्त्यादरात् ।

अस्तु वा रमणीयादिपदस्यैव ग्रामत्वव्यापकरमणीयत्वादिना निरूढलक्षणा निरूढलक्षणाया द्विरुक्तोद्देश्यवाचकपदसमभिव्याहारानियतत्वाच्च तन्निर्वचनवैयर्थ्यम्, ग्रामं ग्रामं ददातीत्यादौ कर्मत्वादिरूपविधेयवाचकविभक्तेस्तु न लक्षणा सम्भवति सुविभक्तित्वादतस्तत्र व्यापकत्वं सम्बन्ध एव, दानकर्मतात्वादिना कर्मत्वादेरनुपस्थितावपि तद्रूपावच्छिन्नव्यापकत्वं कर्मत्वादौ ग्रामादेः सम्बन्धः न तु शुद्धकर्मतात्वावच्छिन्नमतिप्रसङ्गात् । यो यो धूमवान् स वह्निमान् इत्यादौ तु द्विरुक्तयत्पदस्य व्यापकत्वमर्थः, तत्र प्रतियोगित्वेन धूमस्यानुयोगित्वेन वह्नेरन्वय इति प्रलपितमपि तुच्छम्, नामार्थयोर्भेदान्वयायोगात् यत्पदस्य धूमवत्पदसामानाधिकरण्याभावेन सामान्यतया नपुंसकतापत्तेः, यत्र यत्र धूम इत्यादौ आधारत्वरूपार्थानन्वयेन सप्तम्यनुपपत्तेश्च । यो यो धूमवानित्यादौ तु वह्न्यादिपदस्य धूमव्यापकवह्नित्वादिना निरूढलक्षणैव उद्देश्यतावच्छेदकस्य व्यापकताया एव विधेयसंसर्गघटकतया भानस्य प्रामाणिकतया पूर्वोक्तयुक्त्या च तत्र धूमादेरुद्देश्य-

(१) समुदायादेशादिति पु० पा० ।

तावच्छेदकताविरहेण तद्व्यापकतायाः संसर्गघटकत्वासम्भवात् ।

प्राञ्चस्तु वीप्सास्थले व्यापकताया न शाब्दबोधः किन्तु द्विरुक्तग्रामादिपदाद् ग्रामत्वादिनोपस्थितेषु सकलग्रामादिषु, द्विरुक्तयत्पदाच्च महानसत्वमहानसान्यत्वादिना उपस्थितेषु, तत्पदेन च तेन तेन रूपेण परामृष्टेषु सकलधूमादिमत्सु विधेयसम्बन्धः शब्दात् प्रतीयते, तावता क्वचिदपि व्याप्याधिकरणे व्यापकाभावशङ्काया अभावात् (१) व्यभिचारज्ञानाभावसहकृतसहचारदर्शनसत्वात्, तदुत्तरकालं मानस एव व्यापकताबोधः । सकृदुच्चरितेत्यादिनियमस्य प्रामाणिकत्वेऽगत्या तस्य सङ्कोचः ।

अथ तादृशनियमासत्वे द्विरुक्तवैयर्थ्यमिति चेन्न । सकलव्यक्तिपरत्वग्राहकतया तदुपयोगात् यो य इत्यस्य पदद्वयभ्रमेण महानसचत्वरादिरूपधर्मिद्वयमात्रपरत्वभ्रमसम्भवादातिस्फुटत्वाय न्यायातिरिक्तस्थले तत्पदेऽपि वीप्सा दृश्यते एकतत्पदेनापि धर्मिद्वयपरामर्शसम्भवात्तन्मात्रपरत्वे तत्पदान्तरवैयर्थ्यमिति प्रतिसन्धानेन तादृशभ्रमनिवृत्तिसम्भवात्, एकदा यावद्व्यक्तिप्रत्यायनेच्छैव वीप्सापदार्थः, युगपद्व्याप्तुमिच्छा वीप्सा इत्यभियुक्तैर्वारणात्, न तु व्यापकत्वप्रत्यायनेच्छा युगपदित्यस्य वैयर्थ्यापत्तेः । यो यो धूमवानित्यादौ यत्पदार्थव्यापकत्वबोधात् यत्पदं द्विर्वचनानुपपत्तेश्चेत्याहुः । अत्र व्यापकतायाः शाब्दबोधानुपगमे यत्पदेन महानसत्वादिना सकलव्यक्तिषु वह्न्यादिमत्ताबोधेऽपि धूमादिमत्त्वेन तेष्वेव वह्न्याद्यभाववत्त्वशङ्कासम्भवान्न मनसा व्यापकतानिश्चयः सम्भवतीत्यनुपपत्तिः समानविषयकत्वमात्रेण विरोधिताव्यवस्थापनमन्तरेण दुर्धारैवेति चिन्त्यम् ।

साध्यायोगव्यवच्छेदपदेन व्यापकतालाभार्थं व्याचष्टे । अयोग इति । अभावप्रतियोगित्वम् । हेतुमन्निष्ठाभावप्रतियोगित्वम्, विरोध्यर्थकनञा तदधिकरणयोगविरोधिनोऽयोगपदार्थत्वं बोध्यत इत्यभिप्रायः । साध्यस्यायोगान्वये तन्निष्ठव्यापकत्वालाभाद्व्यवच्छेदान्वयितया व्याचष्टे । तथा चेति । व्यवच्छेदेनेति । व्यापकतान्वयी अभेदस्तृतीयार्थः, न्यूनताभङ्गाय साध्यवदन्यावृत्तित्वधीहेतुतायां (२)केवलान्वय्यनुमा-

(१) असम्भवात् इति पु० पा० ।

(२) साध्यवदन्यावृत्तित्वधीहेतुतामत इति पु० पा० ।

नानुपपत्तिदोषमपि दर्शयति। न स्याच्चेति । हेतौ साध्यप्रतियोगिकाभावसामानाधिकरण्यरूपव्यभिचारधियः साध्ये हेतुमन्निष्ठाभावप्रतियोगित्वविषयकतया समानविषयकत्वेन विरोधितामते व्यापकताधीविरोधित्वमावश्यकमिति हेतुः साध्यव्यभिचारीत्युद्भावनस्यापि युक्तत्वाद्दोषोऽपीत्यादिमूलासङ्गतिरत आह । एतच्चेति। विरोधस्य। व्यापकताधीप्रतिबन्धकत्वस्य। (१)अतिस्फुटत्वम्। सर्ववादिसिद्धत्वं, अभिसन्धाय न तु हेतुधर्मिकव्यभिचारधियोऽविरोधित्वम्। अत्रैवं हेतुमाह। साध्याभावेति। समानविषयत्वेन विरोधितामतमवलम्ब्येति भावः। स्वयं समानप्रकारकधिय एव विरोधित्वोपगमाद् वदन्तीति।

(चि०) अथ पर्वतवृत्तिधूमव्यापको वह्निरिति परामर्शो यदि तदा पर्वतीयधूमं प्रति व्यापकतायाः पर्वतधूमसामानाधिकरण्यनैयत्यात् पर्वतवह्निः परामर्शविषय एवेति किमनुमेयमिति चेत्? तर्हि पर्वतीयधूमे नियतसाध्यसामानाधिकरण्यस्य व्याप्यत्वस्य भानं साध्यसामानाधिकरण्यभाननियतमिति व्याप्यत्वभानेऽपि तुल्यम्। यदि च स्मृता व्याप्तिर्धूमेऽवगम्यते तदा व्यापकत्वेऽपि समानम्। वस्तुतस्तु व्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं न तु धूमसामानाधिकरण्यं, व्याप्यत्वन्तु सामानाधिकरण्यविशेष इति तवैवानुमितिरफला स्यात्। न चैवं परामर्शस्य चाक्षुषत्वं न स्याद्व्यापकस्य विशेष्यस्येन्द्रियासन्निकर्षादिति वाच्यम्। इष्टत्वात्, असन्निकृष्टधूमादाविव मानस एव हि सर्वत्र परामर्शः, चक्षुरन्वयव्यतिरेकानुविधानञ्च पक्षवृत्तिधूमोपनयोपक्षीणम्।

(१) 'विरोधस्य' अव्यापकताधियो व्यापकताधीप्रतिरोधस्य इति पु० पा०।

(दी०) मानस एवेति । प्रायिकत्वाभिप्रायेण, तेन क्वचिच्छब्दादिना क्वचिच्च साध्येन्द्रियसन्निकर्षात् परामर्शोऽपि न क्षतिः, पक्षे साध्यसम्बन्धस्याग्रहात् ग्रहेऽप्यनुमितेस्तया अनुमितिसम्भवात ।

(गा०) मूले किमनुमेयमिति सर्वत्र वास्तवपक्षीयसाध्यभानमेवानुमानफलमित्यभिमानेन, स्मृता व्याप्तिः पक्षतावच्छेदकविशिष्टे साध्यसम्बन्धमगृहीत्वैव धूमेऽवगम्यते पक्षतावच्छेदकानवच्छिन्नेऽपि पक्षे साध्यसम्बन्धग्रहादनुमानवैफल्ये वैपरीत्यमेव इत्याह । वस्तुतस्त्विति । न तु धूमसामानाधिकरण्यमिति । येन पर्वतीयधूमसामानाधिकरण्यस्य वह्नौ भाने तादृशधूमाधिकरणपक्षसम्बन्धस्य तत्र भानमावश्यकमिति शङ्क्येतेति शेषः । मानस एव परामर्श इति योजना, सर्वत्र हेतुरिति शेषः । अत्र सर्वपदस्यानुमितिसामान्यार्थकत्वेऽसङ्गतिः साध्यविशेष्यकस्यापि परोक्षरूपस्य कदाचिच्चाक्षुषादिरूपस्य च परामर्शस्यानुमितिजनकत्वसम्भवादत आह दीधितौ । प्रायिकत्वाभिप्रायेणेति । इन्द्रियासन्निकृष्टसाध्यकप्रत्यक्षपरामर्शजन्यानुमितिसामान्याभिप्रायेण इत्यर्थः, साध्येन्द्रियसन्निकर्षसत्त्वे प्रत्यक्षतः साध्यसिद्धेः कथं परामर्शेनानुमितिर्जननीयेत्याकाङ्क्षायां तदुपपादकं हेतुमाह । पक्ष इति ।

(चि०) अथ जनकज्ञाने उपसर्जनतया भातस्य पक्षस्य पर्वतादेरनुमितौ प्राधान्येन भानं न स्यात्, न हि जनकज्ञाने उपसर्जनतयाऽवगतं जन्यज्ञाने प्राधान्येन भासते, तथा दर्शनात् । न चानुमितेस्तथात्वमसिद्धम्, पर्वतोऽयं वह्निमानित्यनुमितेर्लोकसिद्धत्वादिति चेन्न । पुरुषस्य दण्ड इति ज्ञानानन्तरं दण्डी पुरुष इति ज्ञानजन्यज्ञानदर्शनात् अन्यथा तत्रापि कथं पक्षविशेष्यकत्वनियमः, न हि कारणीभूतज्ञाने यद् विशेष्यतया भासते तत्कार्यीभूतेऽपि तथा, इह भूतले घ-

टो नास्तीति ज्ञानजन्ये घटाभाववद् भूतलमिति ज्ञाने तत्र च व्यभिचारात् तस्मात् पक्षवृत्तिलिङ्गपरामर्शस्यायं स्वभावो यत्स्वाश्रयविशेष्यिकामनुमितिं जनयति नातथाभूतामेवं ममापि तुल्यमिति ।

(दी०) व्यभिचारादिति । नच यत्र यदुभयवैशिष्ट्यावगाहि ज्ञानं कारणं तत्र तेदकतरोपसर्जनस्यान्यतरस्य जन्यज्ञाने प्राधान्येन न भानमिति वाच्यम् । मानाभावात् । अत्र चेदमस्वरसबीजम्, पक्षधर्मसमानाधिकरणाभावप्रतियोगित्वत्वेनाभावज्ञानं वह्न्यादावभ्रान्तमसम्भवि तादृशप्रतियोगित्वप्रतियोगिताकाभावावगाहि चातिप्रसक्तं पक्षधर्मधूमसमानाधिकरणाभावप्रतियोगित्वत्वेन च तज्ज्ञानं न व्यापकं येन रूपेण पक्षधर्मताग्रहः तद्रूपावच्छिन्ने व्यापकताज्ञानं च मीमांसकमतनिरासेनैव निरस्तमिति । स्वर्गकामो यजेतेत्यादावन्वयबोधं शब्दमणिदीधितौ विवेचयिष्यामः ।

(गा०) जनकज्ञान इत्यादिनियमे विशेषणपूरणेन व्यभिचारोद्धारमाशङ्कते । यदुभयेति । यदुभयनिरूपितवैशिष्ट्यविषयतावच्छिन्नस्वजनकताश्रयज्ञाने तयोरेकतरांशे उपसर्जनतया भातस्य तदुभयान्यतरस्य न प्राधान्येन स्वविषयतेत्यर्थः । दण्डी पुरुष इति ज्ञाननिरूपितायां पुरुषे दण्ड इति ज्ञाननिष्ठजनकतायां च दण्डपुरुषोभयवैशिष्ट्यविषयिता नावच्छेदिका अपि तु दण्डदण्डत्ववैशिष्ट्यविषयतैवेति पुरुषे दण्ड इति ज्ञाने दण्डोपसर्जनतया भातस्यापि पुरुषस्य फलीभूत दण्डी पुरुष इति ज्ञाने प्राधान्येन भानेऽपि न क्षतिरिति भावः ।

चैत्रानुयोगिकदण्डवैशिष्ट्यज्ञानत्वेन दण्डविशिष्टचैत्रानुयोगिककुण्डलवैशिष्ट्यज्ञानजनके दण्डिचैत्रे कुण्डलमिति ज्ञाने कुण्डलांशे उपसर्जनतया भातस्य चैत्रस्य फलीभूतज्ञाने प्राधान्येन ज्ञानात् तयोरेकतरांशे इति दण्डानुयोगिकरक्तत्ववैशिष्ट्यज्ञानत्वे-

न रक्तदण्डवान् पुरुष इति विशिष्टवैशिष्ट्यधीजनके पुरुषे रक्तद-ण्ड इति ज्ञाने दण्डोपसर्जनतया भातस्य पुरुषस्य फलीभूतज्ञाने प्राधान्येन भानात्तदुभयान्यतरस्येति ।

अथैवमपि व्याप्यविशेष्यकपक्षविशेषणकपरामर्शात्पक्षविशेष्य-कानुमितेरुत्पत्त्या व्यभिचारः ।

यदि चानुभवे विवदमानस्तत्र साध्यविशेष्यकानुमितिमेव स्वीकरोति तथाऽपि व्याप्त्यंशे उपसर्जनतया जनकज्ञाने भातसा-ध्यस्यानुमितौ प्राधान्येन भानाद्व्यभिचारो दुर्वार एव यदि चा-नुमितेः॰ पक्षविशेष्यकत्वनियमानुभवस्य उक्तनियमस्य चानुरोधा-त्पक्षविशेष्यक एव परामर्शोऽनुमितिहेतुरुच्यते तदाऽपि यत्र प-क्षस्यैव हेतुता तत्र पक्षांशे उपसर्जनतया भातस्य हेतुरूपपक्षस्या-नुमितौ प्राधान्येन भानाद्व्यभिचारः । अभावादिपक्षकानुमितौ प्राधा-न्येन भासमानस्याप्यभावादेर्जनकीभूतव्याप्तिज्ञाने प्रतियोगितांशे उपसर्जनतया भानाच्च व्यभिचारः । एवं च दण्डिचैत्रे दण्ड इति ज्ञाने दण्डांशे प्रकारीभूतस्य चैत्रस्य तज्जन्ये दण्डी चैत्रः कु-ण्डलीति ज्ञाने प्राधान्येन भानादपि व्यभिचार इति चेत् ? मैवम् । उपसर्जनतयेति सावधारणं तथा च तदेकतरांश उपसर्जनत-या भातस्येत्यस्य तदेकतरविशेष्यतया भातस्येत्यर्थः । विशेष्य-त्वं च साक्षात्परंपरासाधारणमतोऽभावादिपक्षकानुमितिजनकपरा-मर्शेऽभावादिरूपपक्षस्य व्याप्त्यन्तर्गतप्रतियोगिताद्यंशे प्रकारतयेव परंपरया विशेष्यतयाऽपि ज्ञानान्न तद्विशेष्यतयाऽभातत्वरूपहेतुस-त्वमिति न व्यभिचारः ।

न च परामर्शे तादृशपक्षस्य परम्परया विशेष्यत्वेऽपि कारणी-भूतव्याप्तिज्ञाने उपसर्जनतयैव भानात् व्यभिचारस्य दुर्वारता, जन-कज्ञानसामान्ये तद्विशेष्यत्वनिवेशे च व्यापकतापरामर्शहेतुतामते-ऽपि क्वचित्समूहालम्बनरूपज्ञाने पक्षस्य विशेष्यतया तत्र हेतुस-त्वदुर्भिक्षमिति वाच्यम् । फलोपधायकज्ञानसामान्ये साक्षाज्जन-कयत्किञ्चिज्ज्ञाने वाऽविशेष्यकत्वस्य विवक्षणात् व्याप्यविशेष्य-कपरामर्शश्च नानुमितौ हेतुरित्याशयः। पक्षस्य व्यापकतापरामर्शे प-क्षतावच्छेदकांशे विशेष्यत्वेऽपि तदुभयेत्यनेन पक्षहेतूभयमुपादाय तदेकतराविशेष्यतया तस्य हेतुमत्त्वं सुघटम् ।

न चैवमपि रक्तो दण्ड इति ज्ञाने विशेषणतयैव भातस्य रक्तत्वस्य तज्जन्ये रक्तदण्डवान् पुरुषः रक्तत्वं प्रमेयमित्यादौ प्राधान्येन भानाद्व्यभिचार इति वाच्यम् । न प्राधान्येन भानमित्यस्य न तज्ज्ञानीयप्रकारतावच्छिन्नत्वे सति तद्विषयत्वमित्यर्थकत्वात् ।

यत्तु यदुभयवैशिष्ट्येति धर्मितावच्छेदकावच्छिन्नविषयतानिरूपितप्रकारतात्वेन यज्जनकतायामवच्छेदिका या स्वनिरूपितविशेष्यताव्यधिकरणप्रकारता तदाश्रयस्तज्जनकताप्रतियोगिकजनतावच्छेदकीभूता या विशेष्यता तदनाश्रय इत्यर्थः । सास्नाभावव्याप्यगोत्वाभाववान् गोत्वाभाव इति ज्ञानजन्ये गोत्वाभावः सास्नाभाववानिति ज्ञाने विशेष्यतया भासमाने गोत्वाभावे गोत्वाभावत्वावच्छिन्नविषयतानिरूपितप्रकारतात्वेन जनकतावच्छेदिका या प्रकारता तदाश्रये व्यभिचारवारणाय स्वनिरूपितविशेष्यताव्यधिकरणत्वं हेतुघटकप्रकारतायां निवेशितम् । वह्निव्याप्यः पर्वते इत्याकारकज्ञानजन्यानुमितिविशेष्ये व्याप्यत्वावच्छिन्नविषयतानिरूपितविषयतात्वेन जनकतावच्छेदिका या प्रकारता तदाश्रये व्यभिचारवारणाय प्रकारतात्वेन 'जनकतावच्छेदकत्वविवक्षणम्' । व्याप्यपक्षविशेष्यकपरामर्शयोरनुगमरक्षार्थं उक्तपरामर्शीयपक्षविषयतायाः प्रकारतात्वेन जनकतावच्छेदकत्वानुपगमात् तथा विवक्षणे तादृशव्यभिचारानवकाशात् गोत्वाभावव्याप्यसास्नाभाववान् गोत्वाभाव इति पक्षविशेष्यकतादृशज्ञानजन्यानुमितिविशेष्ये गोत्वाभावे व्याप्तिविशिष्टसामानाधिकरण्यान्तर्गताधिकरणांशे प्रकारतायाः स्वाधिकरणविषयतानिरूपितप्रकारतात्वेन जनकतावच्छेदिकाया आश्रये व्यभिचारवारणाय धर्मितावच्छेदकावच्छिन्नविषयतानिरूपितत्वेनावच्छेकसाध्यभानस्यानुमित्यनुपयोगितया धर्मितावच्छेदकावच्छिन्नत्वेनाधिकरणविषयताया अनुमितिजनकतानवच्छेदकत्वान्न तत्र व्यभिचारः । साध्ये जन्यज्ञानीयविशेष्यतामुपेक्ष्य जन्यतावच्छेदकीभूतविशेष्यतानिवेशात् दण्डी पुरुष इति ज्ञानप्रकारताश्रये दण्डपुरुषे दण्ड इति तज्जन्यज्ञानविशेष्यताश्रये दण्डे न व्यभिचारः । तादृशविशेष्यतायाः दण्डी पुरुष इति विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकत्वाभावादिति । तच्चिन्त्यम् । पर्वतविशेष्य-

कपरामर्शजन्यपक्षीयधूमत्वावच्छिन्नलिङ्गकपर्वतपक्षकानुमितिविशेष्यपर्वते स्वनिरूपितविशेष्यतासमानाधिकरणविशेष्यतावच्छेदकीभूतधूमत्वावच्छिन्नविषयतानिरूपितप्रकारताश्रये व्यभिचारादिति।

अत्र । व्यापकतापरामर्शस्यानुमितिहेतुत्वे । पक्षधर्मेति । पक्षधर्मसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नाभावस्य ज्ञानं पक्षधर्मरासभादिसमानाधिकरणाभावप्रतियोगित्ववति वह्न्यादौ प्रमात्मकं न सम्भवतीत्यर्थः । तथा च तस्यानुमितिहेतुत्वेऽभ्रान्तस्याऽनुमितिः स्यादिति भावः । तादृशप्रतियोगित्वप्रतियोगिकत्वेन धूमादिसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नाभावज्ञानस्य हेतुतायामुक्तदोषाभावात्तत्र दोषान्तरमाह । तादृशेति । अवगाहितेत्यत्र ज्ञानमित्यनुषञ्जनीयम् । अतिप्रसक्तमिति । व्यभिचारात् साधारणमित्यर्थः । पक्षधर्मधूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रतियोगिताकत्वावगाह्यभावज्ञानहेतुतां दूषयति । पक्षधर्मेति । तज्ज्ञानम् । अभावावगाहित्वम् । अव्यापकम् । विशुद्धधूमत्वादिरूपहेतुतावच्छेदकावच्छिन्नव्यापकताज्ञानासङ्ग्राहकम् । पक्षधर्मधूमत्वावच्छिन्नव्यापकतात्मकादभावाद् धूमत्वावच्छिन्ननिरूपितव्यापकतात्मकस्य सामान्याभावस्यान्यत्वादिति भावः ।

न च तादृशज्ञानासङ्ग्रहो न दोषाय सर्वत्र पक्षीयधूमादिसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नाभावज्ञानादेवानुमितिरूपगन्तव्येति वाच्यम् । ईदृशव्यापकतया ग्रहे यत्र पर्वतीयधूमस्तत्र वह्निरिति सहचारग्रहस्यापेक्षिततया महानसादौ सहचारदर्शनेनास्यागृहीतत्वेन पक्षीयधूमदर्शनदशायामुपनयासम्भवात् । कथञ्चित् उपनयसम्भवेऽपि पूर्वगृहीतव्यापकताया अनुपयोगितापत्त्या तज्ज्ञानादनुमितिस्वीकारेऽनुभवविरोधात ।

न च पक्षीयधूमत्वावच्छिन्नव्यापकताज्ञानाद्भवतामपि क्वचिदनुमित्युत्पत्त्या तद्धेतुत्वे कथमनुभवविरोध इति वाच्यम् । पक्षीयधूमत्वेन पक्षधर्मतावगाहिन एतादृशव्यापकताघटितव्याप्तिविषयकपरामर्शस्य मयाऽनुमितिहेतुत्वोपगमात् । तेन रूपेण पक्षधर्मताज्ञानं विना तादृशव्यापकताज्ञानादनुमितेरनुभवविरुद्धोत्पादत्वात् ।

यत्तु धूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन पक्षधर्मधूमसमानाधिकरणाभावप्रतियोगित्वत्वेन

तादृशाभावप्रतियोगित्वप्रकारकमभावज्ञानमनुमितिहेतुरिति । तदसत् । यादृशधर्मप्रकारेण प्रतियोगिनोऽभावांशे प्रकारता तादृशस्यैव प्रतियोगित्वावच्छेदकत्वभानं न न्यूनेऽधिके चेत्यनुभवेन पक्षीयत्वघटितधर्मप्रकारेण प्रतियोगिनि भासमाने पक्षीयत्वांशं परित्यज्य प्रतियोगितावच्छेदकत्वस्य विरुद्धत्वात् । न हि नीलो घटो नास्तीत्याद्याकारिका कदाचिदपि घटादिसामान्याभावबुद्धिः । मा वा तादृशं प्रतियोगितावच्छेदकत्वभानमनुभवोऽविरोत्सीत् । तथाप्युक्तज्ञानस्य तादृशज्ञानत्वरूपेणानुमितिहेतुत्वे धूमसमानाधिकरणाभावाद्यंशस्य सम्बन्धविधया विषयतायाः प्रकारत्वेन विषयतायाश्चावच्छेदकतयाऽनुप्रवेशाद्गौरवम् । व्याप्यवत्ताधीहेतुतामते च प्रतियोगितासम्बन्धेन धूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रकारकस्यैव लघोरवच्छेदकत्वात् ।

न चोभयत्वाद्यवच्छिन्नप्रतियोगिताकत्वं सम्बन्धविधया धूमसमानाधिकरणाभावप्रतियोगित्ववत्वं च प्रतियोगित्वांशे प्रकारतयाऽवगाहमानां बुद्धिं वारयितुं व्याप्यपरामर्शहेतुतावादिनाऽपि धूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रतियोगितासंसर्गकत्वपर्यन्तं निवेश्यमिति क्व लाघवमिति वाच्यम् । प्रतियोगिप्रकारतावच्छेदकधर्मावच्छिन्नत्वोपरागेणैव प्रतियोगितायाः संसर्गत्वोपगमेनोक्तज्ञानस्यैवासिद्धेः ।

अथ व्यापकताधीहेतुतामतेऽपि प्रतियोगितासंसर्गकत्वमात्रं निवेश्यम्, शुद्धप्रतियोगित्वत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गकज्ञानादनुमितिरिष्यत एव, उभयत्वाद्यवच्छिन्नप्रतियोगिताकत्वसम्बन्धेन पक्षीयधूमसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रकारकं ज्ञानं तेनापि नेष्यते प्रतियोगिनि प्रकारीभूतो यादृशो धर्मस्तदवच्छिन्नत्वतद्घटकधर्मावच्छिन्नत्वान्यतररूपेणैव प्रतियोगितायाः संसर्गतोपगमात् इति चेत् ? माभूदेवं गौरवम्, तथाऽपि किञ्चिदंशपरित्यागेन प्रतियोगिप्रकारीभूतधर्मे प्रतियोगितावच्छेदकत्वपर्याप्त्यवगाहनोपगमे बाधादिबुद्धेः प्रतिबन्धकतायां गौरवेण तस्य हेतुतया उक्तपरामर्शहेतुत्वासम्भवस्तथा हि घटत्वाद्यवच्छिन्नविशिष्टबुद्धिं प्रति घटादिसामान्याभावज्ञानस्य तादृशज्ञानत्वेन न प्रतिबन्धकता घटादिसामान्याभावत्वेनाऽभावान्तरावगाहि-

प्रमासंग्रहात् । नाऽपि प्रतियोगितासम्बन्धेनाभावांशे शुद्धघट-त्वाद्यवच्छिन्नप्रकारकज्ञानत्वेन शुद्धघटत्वाद्यवच्छिन्नप्रतियोगिता-कत्वसंसर्गकनीलघटत्वाद्यवच्छिन्नप्रकारकभवन्मतसिद्धज्ञानासङ्ग्रहा-त्नापि शुद्धघटत्वाद्यवच्छिन्नप्रतियोगितासंसर्गेण प्रतियोगिप्रका-रकाभावज्ञानत्वेन, शुद्धघटत्वाद्यवच्छिन्नतया तदनवच्छिन्नप्रति-योगित्वावगाहिभ्रमासङ्ग्रहात् । किन्तु संसर्गघटकतया घटत्वाद्यंशे प्रतियोगित्वावच्छेदकत्वपर्याप्त्यवगाहिज्ञानत्वेनैव अस्मन्मते च प्रतियोगितासंसर्गकघटत्वादिपर्याप्तप्रकारतावच्छेदकताकज्ञानत्वेन स्वरूपसत्पर्याप्तिनिवेशापेक्षया च पर्याप्त्यवगाहितानिवेशमते ऽने-कविषयतावनिवेशाधिक्याद्गौरवमिति सर्वत्र पक्षीयत्वविशिष्टतत्त-द्धेतुनिरूपितव्यापकतापरामर्शादेवानुमितिः, तादृशव्यापकतायाः प्रागग्रहेऽपि तद्घटकप्रत्येकपदार्थज्ञानाद्विशिष्टविषयकोपनीतभा-नात्मकस्तद्विषयकपरामर्शः सुघटः । धूमादिसामान्यव्यापकताग्रहः पक्षीयधूमाद्यव्यापकत्वशङ्कानिरासद्वारा उक्तपरामर्शे उपयुज्यत इति तु समीचीनतया प्रतिभाति ।

ननूक्तव्यापकताज्ञानवत् स्वर्गकामो यजेतेत्यादिविधिवाक्यज-न्यस्वर्गजनकताघटकव्यापकताबोधोऽपि वितर्कग्रस्त इति भवता-मपि का गतिस्तथा हि तत्र स्वर्गव्यापकत्वं स्वर्गसमानाधिकरणा-भावप्रतियोगित्वत्वावच्छिन्नाभावः तच्च यागत्वावच्छिन्ने तद्बाधो गङ्गास्नानादिजन्यस्वर्गस्य यागव्यभिचारात् । नापि स्वर्गसमाना-धिकरणाभावप्रतियोगित्वप्रतियोगिकोऽभावः अतिप्रसक्तस्य द्वित्वा-द्यवच्छिन्नतदभावस्यापि तथात्वात् । नापि विजातीयस्वर्गसमा-नाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नाऽभावः । कार्यकारणभावे गृहीत एव तदन्यथाऽनुपपत्त्या कार्यतावच्छेदकजातिकल्पनात् प्र-थमं मानाभावेन तादृशजात्यनुपस्थित्या तद्घटितरूपावच्छिन्ना-भावस्य विधिना बोधयितुमशक्यत्वादित्यत आह । स्वर्गेति । अय-म्भावः, स्वावच्छेदकक्षणाव्यवहितोत्तरक्षणावच्छिन्नत्वस्वानुयोग्य-नुयोगिकत्वोभयसम्बन्धेन तद्रूपावच्छिन्नाभावाधिकरणताविशि-ष्टस्वक्षणावच्छिन्नाधिकरणतानिरूपकतानवच्छेदकतद्रूपावच्छिन्ननि-ष्ठाऽन्यथासिद्धिनिरूपकतानवच्छेदकधर्मवत्तत्कत्वमेव तद्रूपावच्छि-न्नस्य तज्जनकत्वं ईदृशं तु यागत्वाद्यवच्छिन्नं स्वर्गादिजनकत्वं

जन्यतावच्छेदकजातेर्विशिष्यापरिचयेऽपि सुग्रहम्, केवलान्वयिनीश्वरज्ञानादावेतादृशकारणत्वासम्भवेऽपि न क्षतिः। प्रवृत्त्युपयोगिकारणताया एव निरुक्तरूपत्वात्।

अथ वा स्वरूपसम्बन्धविशेष एव कारणत्वं नत्वनन्यथासिद्धनियतपूर्ववर्त्तित्वम्, अन्यथासिद्ध्यभावकूटस्य दुर्ज्ञेयत्वात्। एवं च प्रमाणान्तरावेद्यजातिविशेषस्य यागादिनिष्ठजनकतावच्छेदकघटितस्य निरुक्तरूपस्य दुर्ग्रहत्वेऽपि न क्षतिरिति दिक्।

(चि०) एवं लिङ्गपरामर्शः कारणं न तु परामृश्यमाणं लिङ्गम्। अथ परामर्शमात्रं न हेतुरपि तु लिङ्गपरामर्शः। तथा च लिङ्गमपि हेतुः विशिष्टकारणताग्राहकमानेन बाधकं विना विशेषणस्यापि हेतुत्वग्रहात्। न च लिङ्गं परामर्शपरिचायकत्वेनान्यथासिद्धम्, परिचये विशेषणान्तराभावेन लिङ्गमेव विशेषकं तथा चानन्यथासिद्धत्वात् तदपि हेतुः अन्यथा परिचायकतया संयोगेनान्यथासिद्धमिन्द्रियमपि कारणं न स्यात्। अपि च धूमवान् वह्निमानिति धूमसमानकालवह्निविषया धूमविशेषणिकाऽनुमितिः ज्ञायमानविशेषणजन्या विशेषणसमानकालतया विशेष्यविषयेऽशाब्दविशिष्टभानत्वात् दण्डी पुरुष इति विशिष्टप्रत्ययवत्। अत एव ज्ञायमानविशेषणजन्यत्वेन विशेषणकालवृत्तितया विशेष्यभानैयत्यं यथा दण्डी पुरुष इति प्रत्यक्षे तेन धूमसमानकालीनवह्निसिद्धिः। अन्यथा तत्तद्धूमकालवृत्तिवह्न्यनुमानं न स्यात् समयविशेषमन्तर्भाव्य व्याप्त्यग्रहात्। किं च लिङ्गकरणत्वपक्षे परामर्श एव तद्व्यापारः परामर्शस्य तु न व्यापारान्तरमस्ति चरमकारणत्वा-

दिति न तत् करणम् ।

(दी०) परिचायकत्वं परिचेयव्यावर्त्तकत्वं तच्च नोपल क्षणतयेत्याह । परिचेय इति । विशेषणतया तत्त्वे पुनराह । तथा चेति । अवच्छेदकतामात्रेण चान्यथासिद्धावाह । अन्यथासिद्धावाह । अन्यथेति । अपि चेत्यादि । या यद्विशेषणसमानकालीनत्वेन तादृशी बुद्धिः सा ज्ञायमानतद्विशेषणजन्येति सामान्यव्याप्तौ पक्षधर्मतासम्पत्तये धूमविशेषणिकेत्यादि । ताद्रूप्यस्यानुभविकत्वप्रदर्शनाय धूमवानित्यादि । ज्ञायमानेति च तज्ज्ञानस्यापि जनकत्वलाभाय । साध्यविशिष्टानुमितेः साध्याजन्यत्वात् विशेषणसमानकालतयेति । धूमकालीनवह्निमान् धूमध्वंसादित्यनुमितेर्धूमाजन्यत्वाद्विशेष्येति । विशेष्ये विशेषणभावापन्नं यत्समानकालीनत्वेन धर्मान्तरवैशिष्ट्यावगाहीत्यर्थः ।

(गा०) उपलक्षणस्यैव परिचायकत्वेन प्रसिद्धतया परिचायकत्वाप्रतिक्षेपण लिङ्गमेव विशेषणमिति विशेषणत्वोपगमो मूलेऽसङ्गतः ।

न च परिचायकत्वप्रतिक्षेपक एवायं ग्रन्थः । अग्रिमस्येन्द्रियसंयोगपरिचायकत्वाभिधानस्याऽसङ्गतेः, अत एवोपलक्षणविशेषणसाधारणपरिचायकत्वपरतां प्रकृते दर्शयति । परिचायकत्वमिति । परिचायकत्वमन्यथासिद्धिप्रयोजकत्वेनाभिहितमिति तन्निराकरणमाकाङ्क्षितमिति परिचय इत्यादेरुपलक्षणतया परिचायकत्वनिराकरणपरतामाह । तच्चेति ।

विशेषणमपि परिचायकत्वेनान्यथासिद्धमेवेत्याशङ्कायां अन्यथासिद्धिप्रयोजकं उपलक्षणतया परिचायकत्वमेवेति भावं स्फुटीकर्तुं तथा चेति मूलमवतारयति । विशेषणतयेति । तत्त्वे । परिचायकत्वे । अवच्छेदकतयाऽन्यथासिद्धिरुपलक्षणतयेव विशेषणतयाऽपि परिचायकस्याविशिष्टेत्याशङ्कायामन्यथेत्यादिप्रतीकमवतारयति । अवच्छेदकतेति । मात्रपदेन विशेषणत्वस्याप्रयोजकत्व-

मुक्तम् । ज्ञायमानलिङ्गजन्यत्वसाध्यकानुमाने विशेषणजन्यत्वेन सामान्यतः साध्यत्वे पक्षतावच्छेदकादिजन्यतयाऽर्थान्तरम् । अनुमितौ च व्यभिचारवारकान्यहेतुविशेषणानां च वैयर्थ्यं सर्वत्रैवानुमितौ किञ्चिद्विशेषणजन्यत्वेन साध्यसत्त्वात् धूमजन्यत्वत्वेन साध्यत्वे दृष्टान्ताभिधानविरोध इत्यतः सामान्यव्याप्त्या पक्षधर्मताबलात् धूमजन्यत्वसिद्धिरिति प्रदर्शयन् पदप्रयोजनान्याह। या यदिति । समानकालीनतयेति । विषयतारूपवैशिष्ट्यं तृतीयार्थः, तस्य च बुद्धावन्वयः । तादृशी । अशाब्दी । पक्षधर्मतासम्पत्तये । धूमजन्यत्वासिद्धौपयिकविशेषणीभवद्धूमकालीनत्वावगाहित्वघटितहेतोः पक्षवृत्तित्वलाभाय । अनुमितौ धूमस्याविशेषणत्वे तत्कालीनताया वह्न्यादावभाने च तत्र तादृशहेतुसत्त्वानिर्वाहादिति भावः । धूमविशेषणिकेत्यादीति । आदिपदाद् धूमसमानकालवह्निविषयेत्यस्य परिग्रहः । एवञ्च धूमविशेषणिकेत्यस्य यथाहेतुव्याख्यानं विशेष्ये धूमविशेषणिकेत्यर्थकत्वमवसेयम् । ताद्रूप्यस्य । यथाव्याख्येयधूमविशेषणकत्वस्य । आनुभविकत्वप्रदर्शनायेति । अन्यथा तत्र प्रमाणानुयोगानिवृत्तेरिति भावः ।

धूमवानित्यादीति । धूमवान् वह्निमान् इत्याकारकज्ञानमित्यर्थः। ननु साध्ये विशेषणस्य ज्ञायमानत्वकथनम् न तेन रूपेण जनकतासिद्धये प्रत्यक्षविशिष्टवैशिष्ट्यबुद्धौ विशेष्यतावच्छेदकस्य विषयविधयैव हेतुत्वस्य सर्वमतसिद्धतया ज्ञायमानत्वेन हेतुताया असिद्धा दृष्टान्तविरोधेन तद्रूपावच्छिन्नजन्यत्वस्य साध्यत्वासम्भवादिति तद्वैयर्थ्यमित्यत आह । ज्ञायमानेतीति । तज्ज्ञानस्य। लिङ्गज्ञानस्य । जनकत्वलाभाय । जनकत्वे एतदनुमतत्वलाभाय, न तु तद्विशिष्टजन्यत्वस्य सिद्धा तस्य जनकत्वसिद्धौ इत्यर्थस्तत्राविवादात् । साध्यविशिष्टानुमितेरिति ।

यद्यपि यद्विशेषणकत्वमात्रस्याशाब्दबुद्धिविशेषणत्वे पक्षतावच्छेदकादिविशिष्टविषयकानुमितिः पक्षतावच्छेदकाद्यजन्यतयाऽपि व्यभिचारः प्रसज्ज्यते तथाऽप्युद्देश्यतावच्छेदकविशिष्टे यद्विशेष्यकेत्युक्तौ न तथा व्यभिचार इति साध्यमात्रोपादानम् । धूमेति। धूमस्यातीततयाऽनुमित्यजनकत्वं सूचयितुं धूमध्वंसस्य हेतुत्वानुसरणम् ।

विशेष्यविषयकत्वस्य बुद्धिविशेषणत्वेऽपि दर्शितव्यभिचारस्य दुर्वारतया विशेष्यविषये यद्विशेषणं तत्समानकालतयेति योजनामादृत्य व्याचष्टे । विशेष्य इति । मुख्यविशेष्यतानिरूपितविशेषणतयाऽवच्छिन्ना या विशेषणान्तरांशे भासमानसमानकालीनत्वविषयतानिरूपिता यदीयविशेषणता तत्प्रतियोगीत्यर्थः । धूमवान् पर्वतो वह्निमानित्याद्यनुमितौ वन्ह्यंशे भासमानसमानकालीनत्वसम्बन्धेन विधेयांशे विलक्षणप्रकारत्वमेवासिद्धमिति कथं तस्य प्रतियोगितया हेतुभानं धर्मिपारतन्त्र्येणैव न तु स्वातन्त्र्येण धूमसमानकालीनवह्निमानित्याकारकतापत्तेः । तत्पारतन्त्र्येण भानं च तन्निष्ठविशेष्यतानिरूपितविशेषणतावच्छिन्नं विशेषणत्वमिति । तादृशानुमितेर्यत्पदोपादेयधूमघटितहेतुमत्त्वमव्याहतम् ।

यत्तु एकधर्मिपारतन्त्र्येणाऽन्यांशे विशेषणत्वं तद्धर्मिनिरूपितविशेषणत्वाभिन्नविशेषणत्वमेव, तथा चावच्छिन्नत्वस्थलेऽभेद एव निवेशनीय इति, तदसत् ।

तथा सति तुल्ययुक्त्या विशिष्टप्रतियोगिकवैशिष्ट्यबुद्धावपि विशेषणपारतंत्र्येण विशेष्यांशे परंपरासम्बन्धेन विशेषणतावच्छेदकभानस्य विशेषणनिरूपितविशेषणत्वाभिन्नविशेष्यतानिरूपितविशेषणत्वात्मकतया पर्वतो धूमकालीनवह्निमान् धूमध्वंसादित्यादिस्थलीयधूमाजन्यानुमितेः पर्वतनिरूपितप्रकारत्वाभिन्नसमानकालीनत्वविषयतानिरूपितधूमनिष्ठप्रकारताप्रतियोगित्वेन व्यभिचारस्य दुर्वारत्वापत्तेः । अस्मन्मते च तत्र मुख्यविशेष्यांशे या धूमीयप्रकारता सा विशेषणांशे धूमीयप्रकारतयाऽवच्छिन्ना न तु वैपरीत्यमिति व्यभिचारानवकाशः ।

(दी०) तदानीं धूमवान् धूमकालीनवह्निमान् धूमध्वंसादिसादौ च विशेषणे विशेषणतापन्नस्य धूमस्य समानकालत्वं वह्नौ भासते न तु विशेष्ये तथात्वापन्नस्य, अनुभवसिद्धो ह्ययं विशिष्टबुद्धीनां विशेषणताविशेषः, विशेषणं धर्मितावच्छेदकं विशेष्यं च विधेयम् । तथा च विधेयतावच्छेदकावच्छिन्नं यद्धर्मिविशिष्टे तत्समानकालीनत्वेनावगाहते या अशाब्दी बुद्धिः

सा तद्धर्मजन्येति पर्यवसितोऽर्थः । धूमकालीनवह्निमानित्यादौ च विधेयतावच्छेदकधूमकालीनवह्नित्वावच्छिन्नं न धूमकालीनत्वेन भासते परं तु वह्नित्वावच्छिन्नम् । धूमवानयं धूमकालीनवह्निमान् पर्वतो वह्निमानालोकादित्यादौ च न धूमवत्त्वविशिष्ट धूमकालीनवह्निमत्त्वं भासते किं तु तादृशविशिष्टपक्षतावच्छेदकवति वह्निमत्त्वं सम्बन्धमर्यादया यत्समानकालीनत्वमवगाहते इत्यपि वदंति ।

(गा०) मुख्यविशेष्यांशे या विशेषणता तत्सामानाधिकरण्यमुपेक्ष्य तदवच्छिन्नत्वनिवेशनस्य मुख्यविशेष्यतानिवेशनस्य च प्रयोजनमाह । तदानीमिति । धूमस्य मुख्यविशेष्यांशे विशेषणतामाविष्कर्तुं धूमवानित्यंतं पक्षविशेषणम् । वर्तमानवैशिष्ट्यस्य मतुपा प्रायशो बोधनात्तदानीमित्यनुक्तौ धूमस्यानुमितिसमये विद्यमानतालाभसंभवात्तस्य तत्र जनकत्वमपि संभाव्येतोर्त तदुक्तिः । विशेषण इति । वह्निविषयतानिरूपितसमानकालीनत्वसंसर्गावच्छिन्ना धूमविशेषणता विशेषणीभूतकालनिरूपितविशेषणतावच्छिन्नैव न तु मुख्यविशेष्यतानिरूपितविशेषणतावच्छिन्नेत्यर्थः । इदं च विशेषणविशेषणघटितपरंपरासम्बन्धेन तद्विशेष्यांशे विशेषणत्वमित्याशयेनोक्तम् । ननु पर्वतविशेषणतापन्नस्य धूमस्य कालीनत्वसम्बन्धेन विधेयांशे विलक्षणप्रकारत्वमेवासिद्धमिति कथं तस्य हेतुघटकत्वमित्यत आह । अनुभवेति ।

अयमाशयः एकत्र द्वयमितिरीत्या दण्डकुंडलवैशिष्ट्यावगाहिज्ञानविलक्षणे तयोरेकविशिष्टेऽपरवैशिष्ट्यज्ञाने विशेष्यतावच्छेदकधर्माधिकरणतावन्निष्ठतदवच्छेदककालावच्छिन्नाधिकरणताकत्वं विधेये भासते । अत एवासमानकालीनयोरेकविशिष्टेऽपरवैशिष्ट्यज्ञानस्य भ्रमत्वम् निरुक्तरूपमेव च समानकालीनत्वमित्युच्यते यथाश्रुतस्य धर्म्यंतर एव समानकाले वर्त्तमानयोरतिप्रसक्ततया तादृशयोस्तथाविधज्ञाने भ्रमत्वानिर्वाहकत्वात् निरुक्तसमानकालीनत्वभानोपगमे च तद्रूपविशिष्टविधेयवैशिष्ट्यस्य च धर्म्यान्तरे एव स

त्वेनान्यधर्मिकज्ञानस्य तदवगाहित्वेन भ्रमत्वोपपत्तेः । समानकालीनत्वस्य नियतोपस्थितिविरहेण संसर्गतयैव भानमुपेयम् । अनुपस्थितस्य विशेषणत्वायोगात् एवं च दण्डी कुण्डलीत्यादिविशिष्टवैशिष्ट्यबोधस्य दण्डकालीनकुण्डलीत्याकारकतावारणाय प्रकारताविलक्षण्यमावश्यकम् । यदि च लाघवाद्विशिष्टवैशिष्ट्यबोधे विशेष्यतावच्छेदकाधिकरणकालावच्छिन्नाधिकरणतैव विधेयस्य सम्बन्ध इत्युच्यते तदा तदनुसारेणान्यथैव हेतुर्निर्वाच्य इति पक्षतावच्छेदकसाध्ययोः सामानाधिकरण्यमात्रमनुमितिविषयः न त्वेकविशिष्टेऽपरवैशिष्ट्यमिति प्राचीनमतानुसारेण पक्षतावच्छेदकावच्छिन्नाधिकरणत्वमेतद्विशिष्टानुयोगिकवैशिष्ट्यं भासते न तु निरुक्तरूपमित्यभिप्रायेणैवेदमनुमानं नातः पक्षतावच्छेदकमादाय क्वापि व्यभिचार इत्यग्रे व्यक्तीभविष्यति ।

विशेष्यविषय इत्यस्य व्यत्यासमसहमानः प्रकारान्तरेण हेतुमुपक्रमते । विशेषणमिति । धर्मितावच्छेदकम् । स्वधर्मितावच्छेदकम । विधेयम् । विधेयतावच्छेदकावच्छिन्नम् । विशेष्यविषय इति सप्तम्याश्च बुद्ध्यन्वयिविषयित्वार्थकतया विधेयतावच्छेदकावच्छिन्नं स्वधर्मितावच्छेदकयद्धर्मसमानकालीनतयाऽवगाहते या बुद्धिरित्यर्थो लभ्यते तत्र च धूमकालीनवह्निमान् पर्वतो वह्निमान् धूमध्वंसादित्यादौ व्यभिचारवारणायोपात्तं स्वधर्मितावच्छेदकत्वं धर्मविशेषणमव्यावर्तकं धूमादेर्ज्ञानान्तर एव तस्य वह्नित्वावच्छिन्नधर्मितावच्छेदकत्वात् स्वनिरूपितत्तज्ज्ञानीयधर्मितावच्छेदकतानिवेशेऽपि तत्रैव धूमस्याधिकस्य पक्षताच्छेदकप्रवेशेन व्यभिचारो दर्शयिष्यत इति स्वसमानकालीनतया विधेयतावच्छेदकावच्छिन्नभानांशे धर्मितावच्छेदकत्वं निवेशयति । तथा चेति । यद्धर्मविशिष्टे यद्धर्मं धर्मितावच्छेदकीकृत्य तत्समानकालीनत्वेन विधेयतावच्छेदकावच्छिन्नमवगाहते विधेयतावच्छेदकतापर्याप्त्यधिकरणं यद्रूपं यत्समानकालीनत्वधर्मितावच्छेदकतापन्नं तद्रूपावच्छिन्नावगाहिनी या बुद्धिरित्यर्थः ।' विधेयतावच्छेदकतापर्याप्त्यधिकरणे समानकालीनत्वधर्मितावच्छेकतापन्नत्वपर्यन्तानवेशप्रयोजनमाह । धूमकालीनेति । धूमं धर्मितावच्छेदकीकृत्य साध्यतावच्छेदकधूमकालीनत्वेन विधेयमवगाह्यमानायामपि धूमवानयं धूमकालीनवह्निमानित्यन्य-

लिङ्गकानुमितौ विधेयतावच्छेदकतापर्याप्त्यधिकरणधूमकालीनत्वसहितं वह्नित्वं न धूमकालीनत्वधर्मितावच्छेदकतया भासते अपि तु शुद्धवह्नित्वमेवेति न तत्र व्यभिचार इत्यर्थः।

यद्यपि शुद्धवह्नित्वमप्यनुमित्यन्तरस्य समूहालंबनरूपधूमविशिष्टपक्षकशुद्धवह्नित्वावच्छिन्नधूमकालीनवह्नित्वावच्छिन्नोभयसाध्यकप्रकृतानुमितेश्च विधेयतायाः अवच्छेदकत्वपर्याप्त्याधिकरणं भवतीति व्यभिचारो दुर्वारः।

अथ तत्कालीनत्वधर्मितावच्छेदकतापन्नपर्याप्तविधेयतावच्छेदकताकत्वनिवेशात् नायं व्यभिचारः समूहालम्बनानुमितौ धूमकालीनत्वधर्मितावच्छेदकत्वेन विधेयान्तरावच्छेदकत्वेन च शुद्धवह्नित्वस्य भाने ऽपि धूमकालीनत्वधर्मितावच्छेदकतानापन्नस्यैव तस्य विधेयत्वान्तरावच्छेदकत्वादिति चेत्? एवं सति यद्धर्मविशिष्ट इत्यस्य वैयर्थ्यं वक्ष्यमाणधूमकालीनवह्न्यवच्छिन्नपक्षकानुमितौ उद्देश्यतावच्छेदकमध्य एव धूमकालीनत्वधर्मितावच्छेदकतया वह्नित्वभानात् विधेयतावच्छेदकतया तस्मिन् भासमाने तदवच्छिन्ने समानकालीनत्वाभानेन तादृशविषयत्वस्येतरधर्मितावच्छेदकतानवच्छिन्न एव तत्र पर्याप्तेर्व्यभिचाराप्रसक्तेः।

यत्तु विधेयत्वसमानकालीनत्वधर्मितावच्छेदकतापन्नतदवच्छेदकावच्छिन्नविषयतयोरेकविषयतानिरूपितत्वनिवेशान्नोक्तसमूहालम्बनानुमितौ व्यभिचारः। तत्र शुद्धवह्नित्वावच्छिन्नविधेयत्वधूमसमानकालीनत्वधर्मितावच्छेदकतापन्नवह्नित्वावच्छिन्नविधेयत्वनिरूपकधर्मिविषयत्वयोः परस्परपरिहारेण प्रत्येकसाध्यकानुमितिसम्बद्धयोर्भेदादिति। तदपि न साधु। धूमवान् धूमकालीनवह्निमान्पर्वतो वह्निमानिति वक्ष्यमाणानुमितावपि धूमसमानकालीनत्वधर्मितावच्छेदकतापन्नवह्नित्वावच्छिन्नविषयतानिरूपकशुद्धपर्वतत्वावच्छिन्नधर्मिविषयतातो विशेषणद्वयविशिष्टपर्वतत्वावच्छिन्नाया विधेयतानिरूपकधर्मिविषयताया भेदेन यद्विशिष्ट इत्यस्य वैयर्थ्यापरिहारात्तथापि स्वानिरूपकज्ञानानिरूपितविधेयतावच्छेदकतापर्याप्त्यधिकरणं यद्रूपं समानकालीनत्वधर्मितावच्छेदकतापन्नतदवच्छिन्नविषयतानिवेशान्नोक्तो व्यभिचारो न वा यद्विशिष्ट इत्यस्य वैयर्थ्यं, समूहालम्बनरूपोक्तानुमितौ समानकालीनत्वधर्मितावच्छेदकतापन्नं

यद्वह्नित्वं यादृशविषयतायामवच्छेदकं तादृशविषयत्वानिरूपकशुद्ध-वह्नित्वावच्छिन्नमात्रसाध्यकानुमितिनिरूपितविधेयताया एवावच्छे-कत्वपर्याप्तिस्तत्र न तु स्वनिरूपकज्ञानमात्रीयविधेयताया इति निरु-क्तहेतुसत्त्वात् धूमतत्समानकालीनवह्निधर्मितावच्छेदकतापन्नपर्वत-त्वावच्छिन्नपक्षकशुद्धवह्नित्वावच्छिन्नविधेयताकानुमितौ च शुद्धव-ह्नित्वावच्छिन्नविधेयतायाः स्वनिरूपितोद्देश्यतावच्छेदकतारूपधूम-कालीनत्वावच्छिन्नवह्निविषयतानिरूपकमात्रनिरूपितत्वेन हेतुसत्त्वात्।

यद्विशिष्ट इत्यस्य प्रयोजनमाह । धूमवानयमिति । अत्र च धूम-धूमकालीनवह्न्योः परस्परविशेषणविशेष्यतावच्छेदकभावानापन्न-योर्विधेयधर्मितावच्छेदकत्वमिति सूचयितुं मध्येऽप्ययमिति विशेष्य-वाचकपदनिर्देशः । विशिष्टपक्षतावच्छेदकवतीति । तदुभयधर्मिता-वच्छेदकतापन्नपर्वतत्वावच्छिन्न इत्यर्थः । वह्निमत्त्वमिति । भासत इत्यनुषज्यते । एकधर्मावच्छिन्नविशेषणतापन्नयोर्विधेयधर्मितावच्छे-दकयोरेव तथात्वं न तु क्वापि विशेषणविशेष्यतावच्छेदकभावाप-न्नयोरिति हृदयम् ।

अथ स्नेहगंधविशिष्टस्य द्रव्यत्वस्य यत्र पक्षतावच्छेदकता तत्राश्रयासिद्धेर्दोषत्वानुरोधेनान्यतरविशिष्टद्रव्यत्वस्यान्यतरधर्मिता-वच्छेदकत्वमावश्यकम्, अन्यथा शुद्धद्रव्यत्वावच्छेदेनान्यतराभाव-स्याप्रसिद्ध्या तत्सामानाधिकरण्येनान्यतराभावस्याविरोधितया तत्र दोष एव दुर्लभः स्यादिति एकधर्मावच्छिन्नविशेषणतापन्नस्य वि-धेयधर्मितावच्छेदकत्वे एव विशेषणधर्मितावच्छेदकभाव इति नियमासम्भव इति चेत् ? तादृशनियमाभावेऽपि तादृशधर्मद्वये ध-र्मितावच्छेदकविशेषणभावस्याप्यनियमात् यत्रातथाभूतयोरेव गं-धस्नेहयोः द्रव्यत्वावच्छिन्नविशेषणविशेषणतया पक्षतावच्छेदके प्रवेशस्तत्रासिद्धेर्दुर्घटतयाऽनुभवानुरोधेन उभयत्वाप्रकारकमपि द्रव्यत्वं धर्मितावच्छेदकीकृत्य एकत्र द्वयमिति न्यायेन गंधस्नेहप्र-कारकं ज्ञानं प्रति उभयाभावप्रकारकज्ञानस्य विरोधित्वमुपगम्य द्रव्यत्वावच्छेदेन तदुभयाभाववत्त्वस्यैव तत्र दोषत्वमुपपाद्यमित्युक्त-नियमेऽपि सामंजस्यात् ।

न चैवमपि यत्र पर्वतत्वस्येव धूमस्यैव धूमसमानकालीनव-ह्निधर्मितावच्छेदकतापन्नस्य शुद्धवह्नित्वावच्छिन्नसाध्यकान्यलिङ्ग-

कानुमितौ पक्षतावच्छेदकता धूमाजन्यायां तत्र निरुक्तहेतुसत्त्वेन व्यभिचारो दुर्वार एवेति वाच्यम्। यद्धर्मविशिष्ट इत्यस्य किञ्चिद्धर्मावच्छिन्नविशेषणतापन्नयद्धर्मविशिष्ट इत्यर्थकतोपगमात्।

विशेषणसमानकालतया विशेष्यविषयकत्वं समानकालीनत्वसम्बन्धेन यद्विशेषणविशिष्टविषयकत्वरूपं विवक्षितं धूमकालीनवह्नित्वावच्छिन्नस्य यत्र साध्यता पक्षतावच्छेदकतावत् तत्र समानकालीनत्वं प्रकारो न तु संसर्गः अगत्या तल्लिङ्गकानुमितावेव तत्समानकालीनत्वस्य साध्यांशे संसर्गतोपगमात् अन्यत्र तत्संसर्गतायाः अप्रामाणिकत्वादिति केचिदाहुस्तन्मतमुपन्यस्यति 'संसर्गेति। अन्यत्र समानकालीनत्वस्य न संसर्गतेत्यत्र विवादादस्वरसः उक्तकल्पे पर्वतत्वावच्छिन्नविशेषणतापन्नधूमस्य धूमसमानकालीनवह्निधर्मितावच्छेदकतापन्नस्य यत्र पक्षतावच्छेदकघटकता तत्र व्यभिचारो दुर्वारः। सुन्दरनीलपर्वतो वह्निमानित्यादौ नीलादेः सौंदर्यादिधर्मितावच्छेदकताया आनुभविकत्वेन उक्तनियमासिद्धेः। भवतु वा तथाविधज्ञानान्तरे नीलसौंदर्यादेर्विशेषणविशेष्यतावच्छेदकभावानापन्नस्यैव पर्वतत्वाद्यवच्छिन्ने प्रकारता तादृशवाक्यजन्यशाब्दबोधे तु प्रथमकर्मधारयलभ्यनीलपदार्थविशिष्टपर्वतादौ सुन्दरपदार्थस्य कर्मधारयांतरबलादन्वये नीलादेः सुन्दरादिपदार्थधर्मितावच्छेदकतापन्नस्यैव विधेयधर्मितावच्छेदकतया भानान्न तादृशनियमः।

न चानुमितावेव किञ्चिद्विशिष्टविशेषणतापन्नैकोद्देश्यतावच्छेदकस्यापरोद्देश्यतावच्छेदकधर्मितानवच्छेदकत्वनियम इति वाच्यम्। व्याप्यवत्तापरामर्शे हेतुधर्मितावच्छेदकतया पक्षतावच्छेदकस्य यादृशं भानमनुमितावपि तस्य साध्यधर्मितावच्छेदकतया च तादृशभानमित्यनुभवस्य दुरपह्नवतया यत्र परामर्शे धूमकालीनवह्निधर्मितावच्छेदकतापन्नधूमस्य पर्वतत्वविशिष्टविशेषणतापन्नस्यालोकादिरूपहेतुधर्मितावच्छेदकता तत्रानुमितावपि धूमस्य तादृशस्यैव साध्यधर्मितावच्छेदकताया अवर्जनीयत्वात्।

न चोक्तनियमाभावेऽपि न व्यभिचारः इतरधर्मितावच्छेदकतानापन्नं यद्धर्मि धर्मितावच्छेदकीकृत्येति विवक्षणीयत्वात्। धूमस्यैव धूमकालीनवह्निधर्मितावच्छेदकतापन्नधूमावच्छिन्नपक्षकस्थले विधेयधर्मितावच्छेदकतापन्नधूमस्यैव धूमकालीनत्वेन भासमानवह्नि-

धर्मितावच्छेदकतया विवक्षणीयहेतोस्तत्रासत्त्वादिति वाच्यम् । एवं सति धूमवान् पर्वतो धूमकालीनवह्निमानालोकादित्यादौ पक्षतावच्छेदकधूमस्य हेतुधर्मितावच्छेदकतापन्नस्यैव साध्यधर्मितावच्छेदकतया व्यभिचाराभावेन विधेयतावच्छेदकावच्छिन्नत्वनिवेशस्य कथितव्यावृत्त्यसंगतेः ।

न चोक्तव्याख्यायामपि धूमकालीनवह्निधर्मितावच्छेदकतापन्नधूमवत्पर्वतादिवृत्तित्वादिना वह्न्यादेर्यत्र साध्यता तादृशानुमितावितरधर्मितावच्छेदकत्वेन धूमाभानात् तत्र व्यभिचारवारणाय विधेयतावच्छेदकावच्छिन्नत्वनिवेशनमावश्यकमिति वाच्यम् । एवमपि यत्समानकालीनतयेत्यंशवैयर्थ्यस्य दुर्वारत्वात् । धूमघटितपक्षतावच्छेदकावच्छिन्ने विधेयतावच्छेदकावच्छिन्नावगाहिन्यामन्यलिङ्गकानुमितौ धूमस्य हेतुधर्मितावच्छेदकतापन्नस्यैव विधेयधर्मितावच्छेदकतया साध्यतावच्छेदकघटकधूमस्यान्यधर्मितानवच्छेदकत्वेऽपि तस्य विधेयतावच्छेदकावच्छिन्नधर्मितावच्छेदकत्वासम्भवेन व्यभिचारानवकाशादित्यनुशयेन प्रकारान्तरेण हेतुं व्याख्यातुमुपक्रमते । अथ वेति ।

(दी०) अथ वा विशिष्टत्वं व्यावृत्तत्वं तच्च तत्समानकालीनत्वग्रहाजन्यत्वं विशेषणविशेष्यपदे च धर्मद्वयमात्रोपदर्शके । तथा चैकस्मिन् धर्मे यद्धर्मसमानकालत्वग्रहाजन्या या अशाब्दी तद्धर्मसमानकालीनत्वबुद्धिः सा ज्ञायमानतद्धर्मजन्येत्यर्थः । एवं न क्वापि व्यभिचारशङ्का । साध्यस्य पक्षतावच्छेदकसमानकालीनत्वं न क्वाप्यनुमितिविषयो मानाभावात् । नवीननये तु कालादेः पक्षतावच्छेदकत्वे तदवच्छिन्नत्वं साध्यस्य भासत इत्यन्यदेतत् । दण्डी पुरुषो गच्छतीत्यादिशाब्दधीवारणाय अशाब्देति । तुल्यन्यायतयोपनीतभानवारणाय तदन्यत्वमपि वाच्यमित्यपि वदन्ति । एतन्नये चातीतत्वाग्रहेऽप्यतीतादिलिङ्गज्ञानान्नानुमितिरिति नातीतलिङ्गकालीनत्वावगाह्यनुमितौ व्यभिचारः । कालोऽत्र वर्त्तमानो विवक्षितः तद्वैशिष्ट्यांशे च प्र-

मात्वं वाच्यं वर्त्तमानत्वं वा तादृशधर्मविशेषणमित्यपि कश्चित्। केचित्तु विशेषणं विशेष्यतावच्छेदकं तथा च वर्त्तमानविशेष्यतावच्छेदकसमानकालीनतया धर्मान्तरवैशिष्ट्यावगाह्यशाब्दज्ञानत्वादित्यर्थः। सतश्च पक्षतावच्छेदकस्य हेतुत्वमिष्टमेव। समानकालीनत्वानुसरणं तु ताद्रूप्यविषयत्वे प्रतिज्ञायमानविशेष्यतावच्छेदकजन्यत्वस्य प्रयोजकत्वसूचनायेत्याहुः। परामर्श एवेति। न च कारणतावच्छेदकस्य तस्य न व्यापारता परामृष्यमाणत्वेन परामर्शाजननादिति वाच्यम्। व्यापारं प्रति रूपान्तरेण हेतुत्वेऽपि फलं प्रति ताद्रूप्येण हेतुतायां विरोधाभावात्। लिङ्गत्वेनैवानुमितिहेतुता परामर्शस्तु व्यापारमात्रमित्यपि केचित्।

(गा०) व्यावृत्तत्वं विलक्षणत्वं धूमकालीनवह्नित्वाद्यवच्छिन्नसाध्यकान्यलिङ्गकानुमितेरपि केनचिद्रूपेण कुतश्चिद्विलक्षणतया न व्यावृत्तिसम्भव इति समानकालीनत्वग्रहजन्यानुमितिव्यावृत्तधर्मवत्त्वरूपतया तद्व्याकुरुते। तच्चेति। समानकालीनत्वेति। किञ्चिद्धर्मविशिष्टे किंचिद्धर्मसमानकालीनत्वग्रहाजन्यत्वमित्यर्थः। विशेषणत्वविशेष्यत्वयोर्वैयर्थ्यमाशंक्याह। विशेषणेति। धर्मद्वयोपदर्शक इति। विशिष्टपदार्थघटकधर्मयोस्तद्धर्मत्वेन बोधक इत्यर्थः।

समुदितार्थमाह। तथा चेति। एकस्मिन् धर्म इति। यद्धर्मसमानकालीनत्वग्रहाजन्या या अशाब्दी तद्धर्मे तद्धर्मसमानकालीनत्वबुद्धिरित्यर्थः। आलोककालीनवह्निमानयं वह्निमान् धूमाद् धूमकालीनालोकवानयं वह्निमान् धूमादित्यादेः संग्रहाय समानकालीनत्वप्रतियोग्यनुयोगिधर्मयोर्वैशिष्ट्योपादानम्। रूपान्तरेण धूमवह्न्योर्यत्र समानकालीनतानिरूपकतया पक्षतावच्छेदकप्रवेशः धूमत्वावच्छिन्नलिङ्गकवह्नित्वावच्छिन्नसाध्यकतादृशानुमितिसंग्रहाय यद्धर्मावच्छिन्ने यद्धर्मावच्छिन्नसमानकालीनताग्रहाजन्यत्यादि विवक्षणीयम्। एवं चायं धूमकालीनवह्निमान् धूमादित्यादेरपि संग्रहः धूमकालीवह्नित्वावच्छिन्ने धूमकालीनत्वावगाहिन्यास्तादृशानुमितेस्तादृशवह्नित्वावच्छिन्ने धूमकालीनत्वग्रहाजन्यत्वात्। धूमकाली-

नवह्निमानयं पर्वतो वह्निमान् धूमादित्याद्यनुमितिस्त्वगत्या पक्षाद्बहिर्भावनीया । समानकालीनत्वविषयत्वाप्रयोज्यसमानकालीनत्वविषयतां निवेश्य तादृशानुमितिसंग्रहे एकस्मिन्धर्म इत्यादेर्वैयर्थ्यात् ।

वस्तुतस्तु समानकालीनत्वविषयत्वाप्रयोज्यत्वं न समानकालीनत्वविषयकज्ञानजन्यतानवच्छेदकत्वं धूमकालीनवह्निमान् धूमादित्यादौ धूमकालीनवह्नित्वावच्छिन्नांशे धूमकालीनविषयताया अपि धूमकालीनत्वविषयकपरामर्शजन्यतावच्छेदकत्वात्तदसंग्रहापत्तेः । नापि समानकालीनत्वविषयताघटितधर्मावच्छिन्नकारणतानिरूपितावैशिष्ट्यानुभवत्वावच्छिन्नकार्यतानवच्छेदकत्वं कालीनत्वसम्बन्धेन धूमविशिष्टवह्निसाध्यकान्यलिङ्गकानुमितौ संसर्गविधया समानकालीनत्वविषयतायाः विशेषणज्ञानजन्यतानवच्छेदिकायास्तादृशत्वात्तत्र व्यभिचारापत्तेः ।

न च तादृशविषयताया अपि वह्निविशेष्यकसमानकालीनत्वसंसर्गकधूमरूपविशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकत्वान्न तादृशानुमितौ व्यभिचार इति वाच्यम् । विशेष्ये विशेषणमिति रीत्या तथाविधज्ञाने तादृशविशेषणतावच्छेदकप्रकारकधियो हेतुत्वाद्व्यभिचारस्य दुर्वारत्वात् ।

न च प्रयोज्यत्वं स्वरूपसम्बन्धविशेषः धूमकालीनवह्नित्वावच्छिन्ने हेतुभूतधूमकालीनत्वविषयतायास्तद्विषयकपरामर्शजन्यतावच्छेदकत्वेऽपि न परामर्शीयसमानकालीनत्वविषयतायाः स्वरूपसम्बन्धरूपं प्रयोजकत्वं परामर्शस्य व्यापकतावच्छेदकतया धूमकालीनत्वविषयकत्वेऽपि लिङ्गतया धूमानवगाहने साध्यतावच्छेदकावच्छिन्ने धूमकालीनत्वाभानाल्लिङ्गतया धूमविषयताया एव तादृशभानप्रयोजकत्वादिति वाच्यम । साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्त्यादिमत्स्वरूपलिङ्गत्वविशिष्टविषयतायाः प्रयोजकत्वे तदन्तःपातिसाध्यतावच्छेदकघटकसमानकालीनत्वविषयताया अपि प्रयोजकताया दुर्वारत्वात् ।

न च वह्न्यादिपक्षकधूमादिकालीनत्वसाध्यकान्यलिङ्गकानुमितौ वह्न्याद्यंशे धूमादिसमानकालीनत्वग्रहाजन्यायां तदंशे धूमसमानकालत्वावगाहिन्यां धूमजन्यायां व्यभिचार इति वाच्यम् । इतरविशेषणतापन्नधर्मांशे समानकालतावगाहिताया विवक्षणेन सामंजस्यात् ।

ननु गंधप्रागभावादिपक्षतावच्छेदकविशिष्टे पृथिवीत्वादिहेतुक-गन्धाद्यनुमितिः कदाचित्तद्विशिष्टानुयोगिकसाध्यवैशिष्ट्यावगाहिनी कदाचित्तदुपलक्षितानुयोगिकसाध्यवैशिष्ट्यावगाहिनी जायते तयो-र्वैलक्षण्यायाद्यायां विधेये पक्षतावच्छेदकसमानकालीनत्वभानोपगम आवश्यकः तथा च साध्यांशे पक्षतावच्छेदककालीनत्वावगाहिज्ञाना-जन्यायां तदंशे तत्कालीनत्वावगाहिन्यां तज्जन्यत्वाभावेन व्यभिचारः।

अथ पक्षतावच्छेदकविशिष्टानुयोगिकवैशिष्ट्यावगाहिन्यामनु-मितौ विशिष्टानुयोगिकवैशिष्ट्यं साध्यस्य सम्बन्धतया भासते त-द्विशिष्टानुयोगिकत्वं च तदवच्छिन्नानुयोगिताकत्वं एकक्षणावच्छे-देन एकदेशवृत्तिकयोरेव परस्परावच्छिन्नाधिकरणताकत्वमिति गंध-प्रागभावादेर्गंधाधिकरणतानवच्छेदकतया गंधादिसम्बन्धानुयोगि-तायां गन्धप्रागभावाद्यवच्छिन्नत्वबाधेन तत्र तदवगाहिन्याः स-ल्लिङ्गजाया अप्यनुमितेर्भ्रमत्वनिर्वाहः तथा च तस्याः साध्यांशे तत्स-म्बन्धांशे वा पक्षताच्छेदकसमानकालीनत्वानवगाहितया हेत्वस-त्त्वान्न व्यभिचारः।

यदि चैकधर्मस्य तदधिकरणत्वस्य वा ऽपरनिरूपिताधिकरणत्वे स्वरूपसम्बन्धरूपमवच्छेदकत्वं न कुत्रापि अत एव हेत्वधिकरणत्वस्य स्वाधिकरणतावच्छेदकतापरतया साध्यसम्बन्धितावच्छेदकरूपवत्वं व्याप्तिरिति व्याप्तिलक्षणं व्याकुर्वतां मते न्यूनाधिकवृत्तिधर्मद्वयाधि-करणतयोर्न्यूनाधिकवृत्तित्वे तुल्यवृत्तिधर्मद्वयाधिकरणतयोश्चावच्छे-द्यावच्छेदकभावे विनिगमनाविरहेण स्वरूपसम्बन्धरूपावच्छेदकभा-वासम्भवं दीधितिकृदाहेति मन्यते तदा पक्षतावच्छेदकविशिष्टानुयो-गिकवैशिष्ट्यविषयकानुमितौ स्वसमानानुयोगिकपक्षतावच्छेदक-धर्माधिकरणतावच्छेदकक्षणावच्छिन्नाधिकरणतैव साध्यसम्बन्ध-तया भासत इत्युपगंतव्यम्।तादृशाधिकरणतैव विशिष्टानुयोगिकवै-शिष्ट्यमिति चेत्? एवं सति लिङ्गोपधानमतेऽपि धूमाद्यवच्छिन्नं स्व-समानाधिकरणधूमाधिकरणतावच्छेदकक्षणावच्छिन्नं वाऽधिकरणत्वं वह्न्यादेः सम्बन्धः। दण्डी चैत्रो गच्छतीति प्रत्यक्षेऽपि तादृशं दंडा-दिविशिष्टानुयोगिकं वैशिष्ट्यं विधेयसम्बन्ध इत्येव स्यात् तद-नुसारेणैव प्रकृते हेतुर्व्याख्येयः युक्तं चैतत् विधेये अनुयोगिताव-च्छेदकसमानकालीनत्वभानेनैवैकत्र द्वयमिति रीत्या बोधात् वि-

शिष्टानुयोगिकवैशिष्ट्यबोधवैलक्षण्यानिर्वाहोपगमे यस्मिन्धर्मिणि दण्डकुण्डलयोर्विभिन्नकालावच्छेदेनैव सत्त्वमन्यत्र वा एककालावच्छेदेन सत्त्वं तदेकतरविशिष्टतद्धर्म्यनुयोगिकापरवैशिष्ट्यबोधस्य प्रमात्वापत्तेः । तयोरेव दण्डकुण्डलयोरेककालीनतया एकावच्छेदेनैकदेशवृत्तितायाश्चाबाधितत्वात् । तथा च तद्धर्मावच्छिन्नपक्षकानुमितौ तद्धर्मघटितहेतोर्व्यभिचारो दुर्वार इत्याशंक्य धूमगंधप्रागभावादिविशिष्टे वह्निगंधादिसाध्यकानुमितौ पक्षतावच्छेदकसमानकालीनत्वं साध्यांशे पक्षतावच्छेदकाधिकरणत्वावच्छेदककालावच्छिन्नत्वं वा साध्यसंबंधांशे कदाचिदपि न भासते अतो नानुमितौ पक्षधर्मघटितहेतुसत्त्वम्

न चानुमितौ साध्यपक्षतावच्छेदकयोरेकत्र द्वयमिति रीत्यैव भाने तादृशानुमितेः पक्षतावच्छेदकावच्छेदेन साध्याभावज्ञानाप्रतिबध्यतया गंधप्रागभावादिविशिष्टे गंधादिसाधनेऽसिद्धिव्यभिचाराभ्यां बाधस्यासंकरो मूलदर्शितो विरुद्ध इति वाच्यम् । गंधप्रागभावकालरूपपक्षतावच्छेदकविशिष्टे गंधादिसाधने तादृशकालावच्छिन्नत्वस्य गंधाद्यंशे तत्संबंधांशे वा भानोपगमेन तत्र तदवच्छेदेन साध्याभावबुद्धेर्विरोधितया तत्रैव बाधासंकरस्य निष्प्रत्यूहत्वात् । मणिकृतापि गंधप्रागभावादिपक्षतावच्छेदकस्थले एकधर्मस्य तदधिकरणतायाश्चापरधर्माधिकरणतावच्छेदकत्वेऽविवादेन एकधर्मविशिष्टेऽपरसाधने तद्धर्मस्य तदधिकरणतायाश्चावच्छेदकत्वभानानिर्वाहमाकलय्य कालावच्छिन्नपक्षकस्थले एव बाधासंकरे निर्भरः कृतः तथा च न व्यभिचारप्रसक्तिरित्याशयेन समाधत्ते । साध्यस्येति ।

नन्वेवमपि धूमकालावच्छिन्नपर्वतपक्षकान्यलिंगकानुमितौ धूमकालावच्छिन्नत्वभानेन व्यभिचारो दुर्वार एवेत्यत आह । नवीननये इति । अन्यदेतदिति । हेतुसमानकालवृत्तित्वस्यानुमित्या ऽनवगाहने तदवगाहित्वघटितहेतोः न तत्कालावच्छिन्नत्वावगाहिन्यामनुमितौ व्यभिचारः आधेयत्वाद्यवच्छेद्यत्वयोराधारत्वावच्छेदकत्वबन्देदात् यदि विशिष्टानुयोगिकवैशिष्ट्यबोधमात्र एव कालावच्छिन्नत्वं भासते तदा तल्लिंगकानुमितौ तल्लिंगकालावच्छिन्नत्वभानेऽवच्छिन्नत्वांशे तद्विशेषणकालस्य संबंधांतरं भासते धूमादिकालस्य पक्षतावच्छेदकत्वे चावच्छिन्नत्वस्य कालसंबंधतया भानात् तत्र कालसंबंधाभानेन

वैलक्षण्यान्न व्यभिचारः।

यदि च धूमादिलिंगकानुमितौ धूमाधिकरणतावच्छेदककालावच्छिन्नाधिकरणता विधेयस्य संबंधस्तदापि तत्रोक्ताधिकरणतायां प्रथमाधिकरणतासमानदेशस्याप्यधिकस्य भानाद् धूमाधिकरणतावच्छेदककालावच्छिन्नपक्षकस्थले तादृशकालावच्छिन्नाधिकरणतायाः साध्यसंबंधरूपत्वे स्वाधिकरणतायां समानदेशत्वाभावेन वैलक्षण्यात् सामंजस्यमिति भावः।

ननु धूमरूपपक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहिन्यामन्यलिंगकानुमितौ व्यभिचारः पक्षतावच्छेदकोपलक्षिते साध्यवैशिष्ट्यावगाह्यनुमितितो वैलक्षण्याय तस्यास्साध्यांशे पक्षतावच्छेदकसमानकालीनत्वभानस्यावश्योपेयत्वात्। तज्जनकज्ञाने च तदभानादित्यत आह। साध्यस्येति। मानाभावादिति। पक्षतावच्छेदकसाध्ययोरेकत्र द्वयमिति रीत्यैव भानं न तु क्वापि विशिष्टे वैशिष्ट्यमिति रीत्या तथा भानेऽपि पक्षतावच्छेदकावच्छिन्नत्वमेव तत्र भासते न तु तत्समानकालीनत्वम्। अवच्छिन्नत्वं तु समानकालीनत्वादिनियतं स्वरूपसंबंधविशेषः अतो विभिन्नकालीनपक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाह्यनुमितेर्न प्रमात्वप्रसंगो ऽनुभवबलेन चानुमितेः साध्यांशे लिंगसमानकालीनत्वावगाहितासिद्धिरिति भावः।

ननु धूमकालस्य यत्र पक्षतावच्छेदकता तत्रत्यायामवच्छेदकावच्छेदेन साध्यवत्त्वावगाह्यन्यलिंगकानुमितौ व्यभिचारः साध्यांशे धूमकालावच्छिन्नत्वात्मकतत्कालीनत्वावगाहिन्यास्तादृशानुमितेस्तदंशे तद्ग्रहाजन्यत्वादित्यत आह। नवीननये इति। अन्यदेतदिति। एतत्कालावच्छिन्नत्वभानं तत्कालीनत्वभानादन्यादित्यर्थः। तत्कालीनत्वघटकाधेयतातोऽवच्छिन्नत्वस्य भेदादिति भावः।

शाब्दधीवारणायेति। अन्यथा दण्डादिसमानकालीनत्वावगाहिन्या अपि तादृशशाब्दबुद्धेस्तदजन्यतया व्यभिचारापत्तेरिति भावः।

यद्यपि पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यविषयकानुमिताविव तादृशशाब्दबुद्धावपि संसर्गतया विशेष्यतावच्छेदकसमानकालीनत्वभाने मानाभावः। मतुपा गमनादिरूपविधेयसमानकालीनत्वस्य दण्डादौ बोधनेऽपि तादृशबुद्धेस्तदंशे समानकालीनत्वावगाहियोग्यताज्ञानजन्यतया न निरुक्तहेतुमत्त्वं तथाऽपि एकपदार्थेऽपरप-

द्वार्थवत्त्वं न योग्यता किं तु विशेषणे विशेष्यनिष्ठाभावप्रतियोगित्वमिति मते मतुप्जन्यसमानकालीनत्वबुद्धेर्विशेष्यांशे समानकालीनत्वग्रहाजन्यत्वात्तद्वारणायाशाब्दत्वनिवेशनमावश्यकम् ।

तुल्यन्यायतयेति । शाब्दबुद्धिवदुपनीतभानस्यापि विषयाजन्यत्वेत्यर्थः । उपनीतभानवारणाय । धर्म्यन्तरगृहीतस्य समानकालीनत्वस्यान्यत्रोपनयप्रत्यासत्तिजन्यज्ञानवारणाय । स्मरणात्मकसमानकालीनत्वभानस्य स्वसमानधर्मिकतदनुभवाधीनतया न तत्र व्यभिचार इति ध्येयम् ।

नन्वतीतादिलिङ्गज्ञानजन्यानुमितौ लिङ्गस्याव्यवहितपूर्ववर्तिताविरहेणाजनकतया व्यभिचारस्तत्रापि समानकालीनत्वभानविरोधिज्ञानासत्त्वेऽसतोऽपि तस्य भानादित्यत आह । एतन्नये चेति । अतीतत्वाग्रहेऽपि । साध्यहेत्वोरसमानकालीनत्वाग्रहेऽपि । अपिनाऽतीतत्वग्रहे प्रतिबन्धकवशाद्यथा नानुमितिरिति दृष्टांतः सूचितः ।

नानुमितिरिति । लिङ्गरूपकारणविरहान्न समानकालीनत्वावगाह्यनुमितिरित्यर्थः । समानकालीनत्वानवगाहिनी पुनरनुमितिर्भवतु मा वोभयथाऽपि न प्रकृते क्षतिरिति ध्येयम् ।

तत्रानुमितिं स्वीकृत्य हेतौ विशेषणान्तरप्रक्षेपेण व्यभिचारं वारयतो मतमाह । कालोऽत्रेति । अत्र । तत्कालीनत्वशरीरे । वर्तमानः। प्रकृतबुद्ध्यव्यवहितपूर्वः ।

नन्वेवमपि अतीतादिलिङ्गाधिकरणत्वेन स्वाव्यवहितप्राक्कालविषयिण्यामनुमितौ व्यभिचारो दुर्वार एवेत्यत आह । तद्वैशिष्ट्येति । तादृशकालस्य धर्मवैशिष्ट्यांशे इत्यर्थः । तथा च तद्धर्मविषयतानिरूपितवास्तवतद्धर्मवद्वर्तमानकालविषयतानिरूपितवृत्तिविषयताशालित्वं हेतुघटकमिति फलितम् । प्रमात्वघटकस्य धर्मे तादृशकालवृत्तित्वस्य वास्तवस्य निवेशेनैवोपपत्तावन्यांशप्रवेशेनालमित्यत आह । वर्तमानत्वं वेति । अव्यवहितप्राक्कालवृत्तित्वं वेत्यर्थः । धर्मविशेषणम् । यत्पदोपादेयधर्मविशेषणम् । कालीनत्वघटकस्वाव्यवहितप्राक्काले वास्तवं तादृशधर्मवत्त्वं विशेषणमिति तु परमार्थः । ज्ञायमानलिङ्गकरणतामते कारणविरहेण तत्रानुमित्यसम्भवात् तद्वारकविशेषणदानं न युक्तमित्यस्वरसः ।

स्वाव्यवहितप्राक्क्षणविद्यमानधूमाद्यवच्छिन्नविशेष्यकानुमिति-

त्वमेव धूमादिजन्यतावच्छेदकमिति तदवच्छिन्नविशेष्यकतत्का- लीनत्वावच्छिन्नसाध्यकान्यालिङ्गकानुमितावपि तज्जन्यत्वस्याव्याह- ततया तत्र व्यभिचारवारणाय विशेषणान्तरप्रवेशो व्यर्थ इति व- दतां मिश्राणां मतमाह । केचित्त्विति विशेषणपदस्य यथाश्रुतपर- त्वे धूमानवच्छिन्नविशेष्यकान्यलिंगकधूमकालीनवह्न्यनुमितेर्धूमज- न्यतावच्छेदकोक्तरूपानाक्रांततया व्यभिचार इति तद्व्याचष्टे । विशे- षणमिति । अतीतादिधूमावच्छिन्नविशेष्यकतत्कालीनत्वावच्छिन्न- साध्यकानुमितौ व्यभिचारवारणाय विशेष्यतावच्छेदके स्वाव्य- वहितप्राक्क्षणसत्त्वमधिकं प्रवेश्य समुदितार्थमाह । तथा चेति । सतः । स्वाव्यवहितप्राक्काले सतः ।

नन्वेवं वर्तमानतद्विशेष्यतावच्छेदकावगाहित्वमेव हेतुरस्तु धूम- कालीनत्वानवगाहिन्या अपि वर्तमानधूमावच्छिन्नविशेष्यकानुमितेः दर्शितधूमजन्यतावच्छेदकरूपाक्रांततया व्यभिचारानवकाशात् किं समानकालीनत्वावगाहित्वानुसरणेनेत्यत आह । समानेति । ताद्रू- प्यविषयकत्वे । तत्समानकालीनत्वग्रहाजन्यानुमितेस्तदवगाहित्वे । विशेष्यतावच्छेदकेति । विशेष्यतावच्छेदकतद्धर्मेत्यर्थः । प्रयोजकत्व- सूचनायेति । तथा च तल्लिङ्गकानुमितेस्तदजन्यत्वे तत्कालीनत्वाव- गाहितानियामकाभावेन तदवगाहितानियमो न स्यादिति विषय- परिशोधकतर्कस्फोरणायैव तदुक्तिर्न तु हेतौ तत्प्रवेश इति भावः ।

न च समानकालीनत्वविषयताया लिङ्गजन्यतानवच्छेदकत्वे त- ज्जन्यताया न तत्प्रयोजकत्वसम्भव इति तस्यास्तथात्वमावश्यकं तथा प्रतिबंधकवशेन विद्यमानविशेष्यतावच्छेदककालीनत्वमनव- गाहमानाया अनुमितेस्तज्जन्यतावच्छेदकानाक्रांततया व्यभिचार- वारणाय समानकालीनत्वावगाहिताया हेतुघटकत्वमावश्यकमिति वाच्यम् । समानकालीनत्वविषयताया लिङ्गजन्यतानवच्छेदकत्वेऽपि तद्घटितसामग्रीघटकाविरोधिज्ञानाद्यभावजन्यतावच्छेदिकायां तस्यां तदघटितसामग्रीघटकविरोधिज्ञानाद्यभावजन्यसामग्र्याः प्रयोज- कत्वसम्भवात् । एतन्मते चासति विरोधिनि अविद्यमानपक्षता- वच्छेदकसमानकालीनत्वमपि नियमेनानुमितिविषयः । प्रयोजकस- त्वात्प्रमात्मकादपि परामर्शात्क्वचिद् भ्रांतानुमितिरिष्टैव ।

अत्र चैवं विशेषणपदस्य विद्यमानविशेषणमात्रपरत्वेनाप्युपपत्ते-

१ अस्यां चौखम्बा—संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते। एकस्मिन् स्तबके एक एव ग्रन्थो मुद्रयते।
२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्रन्था एवाऽत्र सुपरिष्कृत्य मुद्रयन्ते।
३ काशिकराजकीयप्रधानसंस्कृतपाठशालाध्यापकाः पण्डिता अन्ये च शास्त्रदृष्ट्यो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति।
४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्—मुद्राः १० आणकाः ८
५ देशान्तरीयैरतद्ग्राहकैर्देयं वार्षिकमग्रिमं ... ... मूल्यम्—मुद्राः २० " ०
६ प्रापणव्ययः पृथग् नास्ति। ... ...
७ अन्यैर्देयं प्रतिस्तबकं ... ... " " १ " ८

(१) संस्काररत्नमाला। गोपीनाथभट्टकृता ख० २ ३)
(२) शब्दकौस्तुभः। भट्टोजिदीक्षितकृतः प्रथमाध्यायमारभ्य तृतीयाध्यायद्वितीयपादचतुर्थाध्यायपर्यन्तम् ३३)
(३) श्लोकवार्तिकं भट्टकुमारिलविरचितं पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यया व्याख्यया सहितम् १५)
(४) भाष्योपबृंहितं तत्त्वत्रयम्। विशिष्टाद्वैतदर्शनप्रकरणम्। श्रीमल्लोकाचार्यप्रणीतम्। श्रीनारायणतीर्थविरचितभाट्टभाषाप्रकाशसहितं सम्पूर्णम् (वेदान्तः) ३)
(५) करणप्रकाशः। श्रीब्रह्मदेवविरचितः ... १॥)
(६) भाट्टचिन्तामणिः। महामहोपाध्यायश्रीगागाभट्टविरचित तर्कपादः (मीमांसा) ... ... ३)
(७) न्यायरत्नमाला श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णा ३)
(८) ब्रह्मसूत्रभाष्यम्—बादरायणप्रणीतवेदान्तसूत्रस्य यतीन्द्रश्रीमद्विज्ञानभिक्षुकृतव्याख्यानं। सम्पूर्णम्। (वेदान्तः) ९)
(९) स्याद्वादमञ्जरीमल्लिषेणनिर्मिता सम्पूर्णा। ... ३)
(१०) सिद्धित्रयम्—विशिष्टाद्वैतब्रह्मनिरूपणपरम् श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम्। १॥)
(११) न्यायमकरन्दः। श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः। आचार्यचित्सुखमुनिविरचितव्याख्योपेतः (वेदान्तः) ६)
(१२) विभक्त्यर्थनिर्णयो न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायविरचितः सम्पूर्णः (न्यायः) ... ... ७॥)
(१३) विधिरसायनम्। श्रीमदप्पय्यदीक्षितकृतं सम्पूर्णम् ३)
(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता। (मीमांसा) ... ... २४)
(१५) शिवस्तोत्रावली। उत्पलदेवविरचिता श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) ... ... ३)
(१६) मीमांसाबालप्रकाशः। जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः। (मीमांसा) ३)
(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि—मीमांसादर्शनम्। महामहोपाध्यायशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृत मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ५)
(१८) अद्वैतसिद्धिसिद्धान्तसारः। पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः। (वेदान्तः) ४॥)
(१९) कात्यायनश्रौतसूत्रम्। महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् (यन्त्रस्थः) ३०)
(२०) ब्रह्मसूत्रभाष्यम्। श्रीभास्कराचार्यविरचित ४॥)
(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम्। आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीति प्रसिद्धया समेतम्। (वेदान्तः) २१)
(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता ... १॥)
(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् ... ... १२)
(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता। ३)
(२५) क्रोडपत्रसंग्रहः। अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्याः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ख० ७ ... ... १०॥)
(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम्। श्रीसुन्दरभट्टरचितसिद्धान्तजाह्नवीयुतम् ... ... ३)
(२७) षड्दर्शनसमुच्चयः। बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः। मणिभद्रकृतटीकया सहितः। हरिभद्रसूरिकृतः ... ... १॥)
(२८) शुद्धाद्वैतमार्तण्डप्रकाशव्याख्यासहितःप्रमेयरत्नार्णवः १॥)
(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका ... ... ३०)
(३०) श्रीसुबोधिनी। श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतविरचितटिप्पणीसहिता। श्रीमद्भागवतदशमस्कन्धजन्मप्रकरण श्रीसुबोधिनीटिप्पण्योः—प्रकाशः गोस्वामि श्री पुरुषोत्तमजीमहाराज विरचितः ... ४॥)
(३१) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः ६)
(३२) वेदान्तरत्नमञ्जूषा। श्रीभगवत्पुरुषोत्तमाचार्यकृता ३)
(३३) प्रस्थानरत्नाकरः। गोस्वामिश्रीपुरुषोत्तमजीमहाराज विरचितः ... ... ३)
(३४) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् ... ... १॥)
(३५) योगदर्शनम्। परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित—योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् ... ... ३)
(३६) वेदान्तदर्शनम्। परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृतब्रह्मामृतवर्षिणीसमाख्यव्याख्यासंवलितम् ... . ६)
(३७) विश्वप्रकाशः ... कोशः। विद्वद्वरश्रीमहेश्वरसूरिविरचितः २)

(३८) वीरमित्रोदयः महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा-संस्कारप्रकाशात्मकः। सापिण्ड्यदीपकश्च१६॥)

(३९) वीरमित्रोदयः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ... ... ९)

(४०) वीरमित्रोदयः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः ... ... ६)

(४१) वीरमित्रोदयः। लक्षणप्रकाशः। महामहोपाध्यायश्रीमित्रमिश्रविरचितः खण्डा ७ ... १०॥)

(४२) वीरमित्रोदयः। राजनीतिप्रकाशः। महामहोपाध्यायश्रीमित्रमिश्रविराचितः... ... ... ७॥)

(४३) वीरमित्रोदयः। तीर्थप्रकाशः। महामहोपाध्याय श्रीमित्रमिश्रविरचितः खण्डा ६ ... ... ९)

(४४) वेदान्तसिद्धान्तसंग्रहः। श्रुतिसिद्धान्तापरनामकः। श्रीब्रह्मचारिवनमालिमिश्रविरचितः। वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद शर्मकृता अध्यात्मसुधातरङ्गिण्याख्य टीकया सहिता ... ... ४॥)

(४५) स्वानुभवादर्शः। श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमविरचितः स्वकृतटीकाविभूषितश्च ... ... ३)

(४६) याज्ञवल्क्यस्मृतिः। बालम्भट्टीसमाख्यव्याख्यासमलङ्कृतमिताक्षरासहिता। व्यवहाराध्यायः ... १६॥)

(४७) गादाधरी। श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता। श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता ख०१४ २१)

(४८) शास्त्रदीपिका। श्रीपार्थसारथिमिश्रप्रणीता। रामकृष्णविरचितयुक्तिस्नेहप्रपूरण्याख्यव्याख्यया सहिता तर्कपादः ... ... ९)

(४९) वैयाकरणसिद्धान्तलघुमञ्जूषा म० म० श्रीनागेशभट्टविरचिता। श्रीमद्दुर्बलाचार्य-बालम्भटाभ्यांविरचितकुञ्चिकाकलाह्वटीकाद्वयसंवलिता ख० ११ ११)

(५०) व्याकरणसिद्धान्तसुधानिधिः। पर्वतीय विश्वेश्वरसूरिविराचितः खण्डा १२ ... ... १८)

(५१) बृहदारण्यकवार्त्तिकसारः श्रीमद्विद्यारण्यस्वामिविरचितः। महेश्वरतीर्थकृतयालघुसंग्रहाख्ययाटीकयासमलंकृतः१५)

(५२) पूर्वमीमांसाअधिकरणकौमुदी। श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्यविरचिता नेने इत्युपाख्य गोपालशास्त्रिणा परिशिष्टाधिकरणनिरूपणपूर्वकं टिप्पण्या परिष्कृत। ... ... १॥)

(५३) प्रशस्तपादभाष्यटीकासंग्रहः। तत्र कणादरहस्यम्। श्रीशंकरमिश्रविरचितम् ख० ७ ... ३)

(५४) क्रमदीपिका। श्रीमन्महामहोपाध्याय काश्मीरिककेशवभट्टविरचिता। विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणोपेता ... ... ४॥)

(५५) [illegible] ...नम् श्रीचिमानन्द ...थार्थ्यदीपनम् भा... ...ख्या सर्वोपका... ...वसमाससूत्रविवर... ...यतत्त्वप्रदीपिका। साख्यतत्त्वप्रदीपः। तत्त्वमीमां[illegible] च खण्डे २ ... ... ३)

(५६) न्यायपरिशुद्धिः। श्रीमद्वेङ्कटनाथ श्रीवेदान्ताचार्यप्रसादिता। श्रीनिवासाचार्यविरचित न्यायसारसमाख्यया टीकया युता ख० ५ ... ... ७॥)

(५७) निर्णयसिन्धु—कमलाकरभट्टविरचितः, कृष्णभट्टकृतव्याख्यासहितः खण्डा १२ ... ... १२)

(५८) न्यायप्रकाश, श्रीमदापदेवविरचितः। श्रीमदनन्तदेवविरचितया "भाट्टालङ्काराख्य" व्याख्ययासहिता ५)

(५९) सांख्यतत्त्वकौमुदी—षड्दर्शनकृद्वाचस्पतिमिश्रविरचिता। पण्डितराड़—वंशीधरमिश्रविरचित "तत्त्वविभाकर" टीकासहिता खण्डे ५ ... ... ६।)

(६०) न्यायदर्शनं सभाष्यसटीकं खद्योत सहितम्-खण्डे ६ ९)

(६१) साङ्ख्यकारिका ईश्वरकृष्णविरचिता। माठराचार्यविरचिता—माठरवृत्तिसहिता। ... ... १॥)

(६२) पुष्पसूत्रं। सामप्रातिशाख्यं पुष्पर्षिप्रणीतम् श्रीमदजातशत्रुकृतभाष्यसहितम् ख० ३ ... ४॥)

मुद्यमाणा ग्रन्थाः।

(६३) मीमांसाकौस्तुभः-श्रीखण्डदेवविरचितःखण्डाः ४ ६)

(६४) वीरमित्रोदयः। व्यवहारप्रकाशः। महामहोपाध्याय श्रीमन्मित्रमिश्रविरचितः। खण्डाः ४ ... ६)

(६५) प्रशस्तपादभाष्यटीकासंग्रहः (तत्र व्योमशिवचार्यकृता व्योमवती—पद्मनाभमिश्रकृतः सेतुः—जगदीशभट्टाचार्यकृता-सूक्तिश्च)। खण्डाः ४ ... ६)

(६६) आत्मतत्त्वविवेकः उदयनाचार्यकृतः। शङ्करमिश्रविरचित कल्पलता व्याख्ययासमन्वित। खण्डाः ४ ६)

(६७) श्रीमच्छङ्कराचार्यकृता-जयमङ्गलाख्या सांख्यकारिकायाटीका। खण्डः १ ... १॥)

(६८) न्यायचन्द्रिका। श्रीनारायणतीर्थ विरचिता-भाषापरिच्छेदव्याख्या। खण्डः १ ... ... १॥)

(६९) याज्ञवल्क्यस्मृतिः। श्रीमन्मित्रमिश्रविराचिता 'वीरमित्रोदया'ख्यटीकया च सहिता। खण्डाः ४ ६)

(७०) काव्यप्रकाशः श्रीभीमसेनविराचितया 'सुधासागर' टीकया विशद टिप्पणेन च सहितः। खण्डाः ४ ६)

(७१) संस्कारगणपतिः। पण्डितवर श्रीरामकृष्ण विरचितः खण्डाः ४ ... ... ६)

अग्रे मुद्यमाणा ग्रन्थाः।

(१) अनुमानखण्डालोकः। महामहोपाध्याय श्रीजयदेवमिश्रविरचितः। ... ...

(२) वीरमित्रोदयः। समयप्रकाशः श्रीमन्मित्रमिश्रविरचितः।

(३) वीरमित्रोदयः। शुद्धिप्रकाशः श्रीमन्मित्रमिश्रविराचितः।

(४) अलङ्कारकौस्तुभः। श्रीकविकर्णपूर विरचितस्तेनैवकृतया टीकया च सहितः। ... ...

(५) धर्मसंग्रहः। ... ...

(६) वादार्थसंग्रहः। ... ...

(७) कालमाधवः। श्री'लक्ष्मी' अपरनामधेय बालम्भट्टी टीकया सहितः—

—:०:—